मध्यसिद्धान्तकौमुदी

पत्राणि १३०

नं० ११६-घ

मध्यसिद्धान्तकौमुदी

पत्राणि १३०

नं० ११६-घ

१३० पत्राणि





म० कौ० १

ॐ श्रीगणेशाय नमः ॐ नत्वा वरदराजः श्रीगुरून्महोजिदीक्षितान् करोति पा
णिनीयानां मध्यसिद्धान्तकौमुदीं १ अइउण् ऋऌक् एओङ् ऐऔच् हयवर
ट् लण् ञमङणनम् झभञ् घढधष् जबगडदश् खफछठथचटतव्
कपय् शषसर् हल् इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि एषाम
न्त्या इतः हकारादिष्वकार उच्चारणार्थः लण्मध्ये त्वित्संज्ञकः हकारो द्विरु
पात्तो यमटि शल्यपि वोक्तानां अहैणुद्दितिदितवद्धयेसिद्धे भविष्यति हल
न्त्यम् ।१।३।३ उपदेशेऽजनुनासिक इत् स्यात् उपदेश आद्योच्चारणम् सूत्रेष्वदृ
ष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र अदर्शनं लोपः १।१।६० । प्रसक्तस्या
दर्शनं लोपसंज्ञं स्यात् तस्य लोपः ।१।३।९ तस्येतो लोपः स्यात् ॥ ॥ १

लोपः ॥ तस्येतो लोपः स्यात् ॥ णादयो णाद्यर्थाः ॥ आदिरंत्येन सहेता ॥ अंत्येनेता स
हित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् ॥ यथा अणिति अ इ उ वर्णानां संज्ञा ॥
एवमच् हल् अल् इत्यादयः ॥ ऊकालोऽज्ह्रस्वदीर्घप्लुतः ॥ उश्च ऊश्च ऊ३श्च वः वां
काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् ॥ स प्रत्येकमुदात्ता
दिभेदेन त्रिधा ॥ उच्चैरुदात्तः ॥ नीचैरनुदात्तः ॥ समवृत्त्या स्वरितः ॥ स नवविधोऽपि
प्रत्येकमुदात्तमनुनासिकाननुनासिकत्वाभ्यां द्विधा ॥ मुखनासिकावचनोऽनु
नासिकः ॥ मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ॥
तदित्थं अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः ॥ ऌवर्णस्य द्वादश ॥

समाहारः स्वरितः ॥ ५

२

तस्यदीर्घाभावात्॥ एचामपिद्वादश॥ तेषांह्रस्वाभावात्॥ तुल्यास्यप्रयत्नंस
वर्णं॥ ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयंयस्ययेनतुल्यंतन्मिथःसव
र्णंस्यात्॥ ऋलृवर्णयोर्मिथःसावर्ण्यंवाच्यं॥ अकुहविसर्जनीयानांकंठः॥
इचुयशानांतालुः॥ ऋटुरषाणांमूर्द्धा॥ लृतुलसानांदंताः॥ उपूपध्मानीया
नामोष्ठौ॥ ञमङणनानांनासिकाच॥ एदैतोःकंठतालुः॥ ओदौतोःकंठोष्ठं॥
वकारस्यदंतोष्ठं॥ जिह्वामूलीयस्यजिह्वामूलं॥ नासिकाऽनुस्वारस्य॥ यत्नो
द्विधा॥ आभ्यंतरोबाह्यश्च॥ आद्यःपंचधा॥ स्पृष्टेषत्स्पृष्टेषद्विवृतविवृत
संवृतभेदात्॥ तत्रस्पृष्टंप्रयत्नंस्पर्शानां॥ ईषत्स्पृष्टमंतस्थानां॥ ईषद्विवृत

२

वर्गाणां द्वितीयचतुर्थौ शलश्च ५

ष्मणां॥ विवृतं स्वराणां॥ ह्रस्वस्यावर्णस्य प्रयोगे संवृतं॥ प्रक्रियादशायां तु
विवृतमेव॥ बाह्यस्त्वेकादशधा॥ विवारः संवारः श्वासो नादो घोषो ऽघोषो
ऽल्पप्राणो महाप्राण उदात्तोनुदात्तः स्वरितश्चेति॥ खरो विवाराः श्वासा
अघोषाश्च॥ हशः संवारा नादा घोषाश्च॥ वर्गाणां प्रथमतृतीयपंचमा य
णश्चाल्पप्राणाः॥ अन्ये महाप्राणाः॥ कादयो मावसानाः स्पर्शाः॥ यणोंत
स्थाः॥ शल ऊष्माणः॥ अचः स्वराः॥ ≍क ≍ख इति कखाभ्यां प्रागर्धविस
र्गसदृशौ उपध्मानीयः॥ अं अः इत्यचः परावनुस्वारविसर्गौ॥ अणुदि
त्सवर्णस्य चाप्रत्ययः॥ अविधीयमानोऽणुदित्सवर्णस्य संज्ञा स्यात्॥

जिह्वामूलीयः॥ ≍प ≍फ इति पफाभ्यां प्रागर्धविसर्गसदृशः ×२

३

अनेवाणपरेणकारेण॥ कुखुदुउउरतेउदिताः तदेवमह्यप्टादशानांसंज्ञा॥
तथैकारोकारो॥ लकारस्त्रिंशतः॥ एवंलृकारोपि॥ एचोद्वादशानां॥ अनुना
सिकानुनासिकभेदेनयवलाद्विधा॥ तेनाननुनासिकास्तेद्वयोर्द्वयोःसंज्ञा॥
परःसंन्निकर्षःसंहिता॥ वर्णानामतिशयितःसंन्निधिःसंहितासंज्ञःस्यात्॥ हलो
नंतराःसंयोगः॥ अज्भिरव्यवहिताहलःसंयोगसंज्ञाःस्युः॥ सुप्तिङंतंपदं॥ सुबंतं
तिङंतंपदसंज्ञंस्यात्॥ १॥ इकोयणचि॥ इकःस्थानेयणस्यात्अचिसंहि
तायांविषये॥ सुधीउपास्यइतिस्थिते॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥ सप्तमी
निर्देशेनविधीयमानंकार्यंवर्णांतरेणाव्यवहितस्यपूर्वस्यज्ञेयं॥ स्थानेंतर

तमः ॥ प्रसंगेसति सदृशतम ॥ आदेशः स्यात् ॥ सुध्य् उपास्य इति जाते ॥ अनचि च ॥ अचः परस्य यरो द्वे वा स्तो न त्वचि ॥ झलां जश् झशि ॥ इति धकारस्य दकारः ॥ संयोगांतस्य लोपः ॥ संयोगांतं यत्पदं तस्य लोपः स्यात् ॥ अलोंत्यस्य ॥ षष्ठी निर्दिष्टांत्यस्यादेशः ॥ इति प्राप्ते ॥ यणः प्रतिषेधो वाच्यः ॥ सुध्युपास्यः ॥ मध्वरिः ॥ धात्रंशः ॥ लाकृतिः ॥ एचोयवायावः ॥ एचो ॥ य् अव् आय् आव् एते स्युरचि ॥ यथासंख्यमनुदेशः समानां ॥ समसंबंधी विधिर्यथासंख्यं स्यात् ॥ हरये ॥ विष्णवे ॥ नायकः ॥ पावकः ॥ वांतो यि प्रत्यये ॥ यादौ प्रत्यये परे ओदौतोरवावौ स्तः ॥ गव्यं ॥ नाव्यं ॥ अध्वपरिमाणे च ॥ गव्यूतिः ॥ धातोस्तन्निमि

लोपं ५ (margin)

x अध्वीनं परेण संयोज्यं ॥ x५

तस्यैव॥ यादौ प्रत्ययेपरे धातोरेचश्चैवां तादेशात्‌ हितन्निमित्तस्यैवनान्यस्य
लव्यं॥ अवश्यलाव्यं॥ तन्निमित्तस्यैवेति किं॥ ओयते॥ औयत॥ ह्यजय्यौ
शक्यार्थे॥ यांतादेशनिपातौ॥ शक्यार्थे किं॥
॥ हेतुं जेतुं योग्यं॥ पापं॥ जेयंमनः॥ क्षय्यस्त
दर्थे॥ क्षेतारः॥ क्रीणीशुरिति बुध्वा आपणे प्रसारितं क्रय्यं॥ क्रेयमन्यत्‌॥ अ
यणोर्हमित्यर्थः॥ अदेङ्‌ गुणः॥ अदेङ्‌ च गुणसंज्ञः स्यात्‌॥ तपरस्तत्का
लस्य॥ तपरस्तात्परश्चैवाउच्चार्यमाणो वर्णः समकालस्यैव संज्ञा स्यात्‌॥
एकः पूर्वपरयोरित्यधिकृत्य॥ आद्गुणः॥ अवर्णादचि पूर्वपरयोरेको

× ज त्वतुंयिकान्यायेन रेफस्योर्ध्वगमनं ४

गुणादेशः संहितायां ॥ उपेंद्रः ॥ गंगोदकं ॥ उपदेशेजनुनासिक इत् ॥ उपदेशेनु
नासिकोजित्संज्ञः स्यात् ॥ प्रतिज्ञानुनासिक्याः पाणिनीयाः ॥ लण्सूत्रस्था
वर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ॥ उरण्रपरः ॥ ऋ इति त्रिंशतः सं
ज्ञेत्युक्तं तत्स्थाने योण् स रपरः सन्नेव प्रवर्तते ॥ कृष्णर्द्धिः ॥ तवल्कारः ॥ व ४
लोपः शाकल्यस्य ॥ अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे ॥ आम्फुण

इति प्राप्ते

पूर्वत्रासिद्धं ॥ सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्र
ति परं शास्त्रमसिद्धं ॥ हर इह ॥ हरयिह ॥ विष्ण इह ॥ विष्णविह ॥ वृद्धिरादै
च् ॥ आदैच्च वृद्धिसंज्ञः स्यात् ॥ वृद्धिरेचि ॥ आदेचि परे वृद्धिरेकादेशो गुणा

५

पवादः॥ लक्ष्मीकल्तं॥ गंगौघः॥ देवैश्वर्यं॥ छक्षौकं शुं॥ एत्येधत्यू ठ्सु॥ अव

र्ण्णादेजाद्योरेत्येधत्योरू ठिच परे पूर्वपरयोर्वृद्धिरेकादेशः स्यात्॥ उपैति

उपैधते॥ प्रष्ठौहः॥ एजाद्योः किं॥ उपेतः॥ माभवान्प्रेदिधत्॥ स्वादीरेरिणोः॥

५ स्वैरिणी स्वैरं॥ स्वैरी॥ अक्षादूहिन्यामुपसंख्यानं॥ अक्षौहिणीसेना॥ प्रादूहोढोढ्ये

षैष्येषु॥ प्रौहः॥ प्रौढः॥ प्रौढिः॥ प्रैषः॥ प्रैष्यः॥ ऋते च तृतीयासमासे॥ सुखेन ऋतः

तिव सुखार्त्तः॥ तृतीयेति किं॥ परमर्त्तः॥ प्रवत्सतरकंबलवसनार्णदशानामृणे॥ प्रा

र्णमित्यादि॥ उपसर्गाः क्रियायोगे॥ प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः॥

प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति ५

सु उत् अभि प्रति परि उप एते प्रादयः ॥ भ्वादयो धातवः ॥ क्रियावाचिनो भ्वा
दयो धातुसंज्ञाः स्युः ॥ उपसर्गादृति धातौ ॥ अवर्णान्तादुपसर्गादृकारादौ धातौ
परे पूर्वपरयोरार् इति रेफादेशः ॥ प्रार्छति ॥ वा सुप्यापिशलेः ॥ आदुपसर्गादृका
रादौ सुपधातौ परे वृद्धिर्वा ॥ आपिशलि ग्रहणं पूजार्थं ॥ अचो रहाभ्यां द्वे ॥ अ
चः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्त इति प्राप्ते ॥ शरोऽचि ॥ अचि परे शरो
द्वे न स्तः ॥ प्रार्षभीयति ॥ प्रर्षभीयति ॥ एङि पररूपं ॥ आदुपसर्गादेङादौ धा
तौ परे पररूपमेकादेशः ॥ प्रेजते ॥ उपोषति ॥ अचोऽन्त्यादि टि ॥ अचां मध्ये योऽन्त्यः
स आदिर्यस्य तत् टि संज्ञं स्यात् ॥ शकन्ध्वादिषु पररूपं वाच्यं ॥ तच्च टेः ॥ शकन्धुः

६

कर्कंधुः कुलटा ॥ सीमंतः केशवेशे सीमांतोन्य ॥ मनीषा हलीषा पतंजलिः सारंगः ॥
पशुपक्षिणोः सारंगोन्यः आकृतिगणोयं ॥ एवेचानियोगे ॥ क्वेवभोक्ष्यसे ॥ अ
नियोगे किं ॥ तवैव ॥ ओत्वोष्ठयोः समासे वा ॥ स्थूलोतुः स्थूलोतुः बिंबोष्ठः
बिंबौष्ठः समासे किं ॥ तवौष्ठः ॥ ओमाङोश्च ॥ शिवोमि आङि च पररूपमेका
देशः स्यात् ॥ शिवायोंनमः ॥ शिवएहि ॥ शिवेहि ॥ अंतादिवच्च ॥ योयमेका
देशः सपूर्वस्यांतवत् परस्यादिवत् ॥ अकः सवर्णे दीर्घः ॥ एकादेशः स्या
त् दैत्यारिः ॥ श्रीशः ॥ विष्णूदयः होतृकारः ॥ एङः पदांतादति ॥ पदांतादे
ङोतिपरे पूर्वरूपमेकादेशः ॥ हरेव ॥ विष्णोव ॥ सर्वत्रविभाषागोः ॥ लोकेवेदे

६

४ अकः सवर्णे दचिपरे दीर्घ ४.३

अनेकाल्त्वादेशः शित्त्व सर्वस्य स्यात्

वैङंतस्य गोरतिवा प्रकृतिभावः पदांते ॥ गो अग्रं ॥ गोग्रं ॥ एङः तस्य किं ॥ चित्र
ग्वग्रं ॥ पदांते किं ॥ गोः ॥ अत्र ङ: सि ङ: सोऽयं इति पूर्वरूपं ॥ अनेकाल्शित्स
र्वस्येति प्राप्ते ॥ ङि: च ॥ ङि: दनेकाल्प्यं स्यैव स्यात् ॥ अवङ् स्फोटायन
स्य ॥ पदांते एङः तस्य गोरवङ् वाचि ॥ गवाग्रं ॥ पदांते किं ॥ गवि ॥ इंद्रे च ॥ गो
रवङ् इंद्रे ॥ गवेंद्रः ॥ व्यवस्थितविभाषया गवाक्षः ॥ दूराद्धूते च ॥ दूरात्संबोधने
वाक्यस्य टेः प्लुतो वा ॥ प्लुतप्रगृह्या अचि नित्यं ॥ एतेऽचि प्रकृत्या स्युः ॥ गच्छ कृष्ण
३ अत्र गौश्चरति ॥ ह्रस्वं लघु: ॥ संयोगे गुरु ॥ संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ॥
दीर्घं च ॥ गुरु स्यात् ॥ गुरोरनृतोऽनंत्यस्याप्येकैकस्य प्राचां ॥ प्लुतो वा ॥ अपि शब्दा

४८ गो अग्रं ॥ गोग्रं ॥ × स्यात्

दूराद्धूते यद्वाक्यं तस्य टेर्द्धि न्नस्यानंत्यस्यापि गुरोः

नित्यं

दत्यस्याप्यसुरोगस्तुतोवा। देवदत्त। दिवदा अ। देवदत्ता अयुरोःकिं॥
वकारादकारस्यमाभूत्। अन्ततःकिं॥ कुधा अ। एकैकग्रहणं पर्यायार्थं॥
ईदूदेद्विवचनंप्रगृह्यं॥ ईदूदेद्विवचनंप्रगृह्यसंज्ञं स्यात्॥ हरीएतौ॥
विष्णूइमौ॥ गंगे अमू॥ मणीवोष्ट्रस्येति इवार्थेवशब्दो वाशब्दोवा
बोध्यः॥ अदसोमात्॥ अस्मात्परावीदूतौप्रगृह्यौस्तः॥ अमीईशाः॥ रा
मकृष्णावमू आसाते॥ मात्किं॥ अमुकेत्र॥ असतिमात् हरो एकारो
प्यनुवर्तेत॥ चादयोसत्वे॥ अद्रव्यार्थाश्चादयोनिपातसंज्ञाःस्युः॥ प्रादयः॥
एतेपितथा॥ निपातएकाजनाङ्॥ एकोजिन्निपातः आङ्वर्जःप्रगृह्यः स्यात्॥ इ इंद्रः॥ ८

१ ×वस्त्वपलक्षणंयत्रसजेनामपरभुज्यते प्रयोगि ... तेसोर्थेभिधेयेलनविवक्षितः॥१॥×१×

उउमेषाः वाक्यस्मरणयोरङित् ईषदर्थे क्रियायोगे मर्यादाभिविधौ चयः एतमा
तेङिन्तं विद्याद्वाक्यस्मरणयोरङित् आ एवं मन्यसे आ एवं किल तत् अन्यत्र ङि
त् ईषदुष्णं ओष्णं ओत् ओदन्तो निपातः प्रगृह्यः अहो ईशाः संबुद्धौ शाक
ल्यस्येतावनार्षे संबुद्धिनिमित्तक ओकारो वा प्रगृह्यो अवैदिके इतौ परे
विष्णो इति १ विष्ण इति विष्णविति मय उञो वो वा मयः परस्यो ऽ ञो वो
वा स्यात् किमु उक्तं किम्वुक्तं ४ इको ऽसवर्णे शाकल्यस्य ह्रस्वश्च पदान्ताद्
को ह्रस्वो वा स्यात् असवर्णे ऽ वि ह्रस्वविधिसामर्थ्यान्न स्वरसंधिः चक्रि अत्र व
क्रात्र पदान्तात् किं गौर्यौ न समासे वाप्यश्वः ऋत्यकः ऋति परे पदान्तात् अकः

प्रागवन् ब्रह्मऋषिः ब्रह्मर्षिः पदान्ताः किंआर्छन् इतिस्वरसंधिः स्तोःश्चुनाश्चुः
सकारतवर्गयोः शकारचवर्गाभ्यांयोगे शकारचवर्गौस्तः हरिश्शेते रामश्चि
नोति सच्चित् शार्ङ्गिंजय शात् शात्परस्योक्तेनस्यात् विश्न प्रश्नः ष्टुनाष्टुः
स्तोः ष्टुनायोगेष्टुः रामष्षष्ठः रामष्टीकते पेष्टा तट्टीका चक्रिण्ढौकसे न
पदान्ताट्टोरनाम् पदान्ताट्टवर्गात्परस्यस्तोःष्टुर्न षट्सन्तः षट्ते पदान्तात्किं
ईट्टे टोः किं सर्पिष्टमम् अनाम्नवतिनगरीणामितिवाच्यं षण्णां षण्णवति
षण्णगर्यः नोषि तवर्गस्यषकारेपरेनष्टुत्वंस्यात् सन्षष्ठः झलांजशोन्ते प
दान्तेझलांजशः स्युः वागीशः यरोनुनासिकेनुनासिकोवा परःपदान्तस्यात्

नासिके परेऽनुनासिको वा एतन्मुरारिः एतद्मुरारिः प्रत्यये भाषायां नित्यं
तन्मात्रम् चिन्मयम् नोर्लि तवर्गस्य लकारे परे परसवर्णः स्यात् तल्लय वि
द्वाल्लिखति नस्यानुनासिको लः उदः स्थास्तम्भोः पूर्वस्य उदः परयोः स्थास्तम्भोः पू
र्वसवर्णः स्यात् तस्मादित्युत्तरस्य पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णा
न्तरेणाव्यवहितस्य परस्य ज्ञेयं आदेः परस्य परस्य पद्विहितं तत्तस्यादेर्बोध्यं उत्थो
षस्य महाप्राणस्य समस्य नादघोषवत्थकारः इति सस्य थः झरो झरि सवर्णे
हलः परस्य झरो लोपो वा सवर्णे झरि खरि च झलां चरः स्युः इत्युदोदस्य
तः उत्थानं उत्तम्भनं झयो होऽन्यतरस्याम् झयः परस्य हस्य वा पूर्वसवर्णे

म.कौ.
सू. ९
७

नादस्यघोषस्यसंवारस्यमहाप्राणस्यह्रस्यतादृशोवर्गोवर्णर्थः वाग्घरिः वाग्घरि
शश्छोटि पदान्तात् कयःपरस्यशस्यछोवास्यादटि तच्छिवः तच्छिनः पदान्ता
त्किं विरच्यो छत्वममीतिवाच्यं तच्छ्लोकेन तश्लोकेन प्रशमिकिं वाकस्थोन
ति मोनुस्वारः मान्तस्यपदस्यानुस्वारोहलि हरिंवन्दे पदान्तस्यकिम्
गम्यते नश्चापदान्तस्यझलि नस्यमस्यचापदान्तस्यझल्यनुस्वारः यशां
सि आक्रंस्यते झलिकिं मन्यते अनुस्वारस्यययिपरसवर्णः शान्तः
चापदान्तस्य पदान्तस्यानुस्वारस्यययिपरेपरसवर्णोवास्यात् त्वंकरोषि
तङ्करोषि सोयाजिसमःकौ किंवनेराजयानैःपरेसमोमस्यमएवस्यात्

९

सम्राट् ह्मपरे वा मपरे हकारे परे मस्य मो वा किम्ह्मलयति किंह्मलय
ति यवलपरे यवला वा यवलपरे हकारे परे मस्य यवला वा स्युः किँय्ह्यः
किंह्यः किँव्ह्वलयति किंह्वलयति किँल्ह्लादयति किंह्लादयति नपरे
नः नपरे हकारे परे मस्य नो वा किन्ह्नुते किंह्नुते ङ्णोः कुक्टुक् शरि ङका
रणपरे मस्य नो वा, कारयोः कुक्टुकावागमौ वा स्तः आद्यन्तौ टकितौ टित्कि
तौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः प्राङ्षष्ठः प्राङ्क्षष्ठः सुगण्ट्ष
ष्ठः सुगण्षष्ठः ङःसि धुट् ङात्परस्य सस्य धुड्वा षट्त्सन्तः षट्सन्तः नश्च
नान्तात्परस्य सस्य धुड्वा सन्त्सः सन्सः शि तुक् पदान्तस्य नस्य शे तुग्वा सञ्छ

म·कौ·
पू·
१०
10

म्भुः सञ्ज्ञाम्भुः सञ्ज्ञाम्भुः सञ्ज्ञाम्भुः ङमो ह्रस्वादचि ङमुण्नित्यम् ह्रस्वात्प
रो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नित्यं ङमुट् स्यात् प्रत्यङ्ङात्मा सुगण्णी
शः सन्नच्युतः समः सुटि सम्मोः सुटि अत्रानुनासिकः पूर्वस्य तु वा अत्र
प्रकरणे रोः पूर्वस्यानुनासिको वा अनुनासिकात्परोऽनुस्वारः अनुनासिकं वि
हाय रोः पूर्वस्मात्परोऽनुस्वारागमः खरवसानयोर्विसर्जनीयः खरि अव
साने च पदान्तस्य रस्य विसर्गः संपुंकानां सो वक्तव्यः सँस्स्कर्त्ता पुमः खय्य
म्परे अम्परे खयि पुमो रुः पुंस्कोकिलः पुंस्कोकिलः नश्छव्यप्रशान् अ
म्परे छवि नान्तस्य पदस्य रुः विसर्जनीयस्य सः खरि परे विसर्जनीय

१०

स्य सः स्यात् चक्रिँस्त्रायस्व चक्रिंस्त्रायस्व अप्रशान्किम् प्रशांस्तनोति पदस्य
किम् हन्ति नॄन्ते न्वनित्यस्य हर्वास्यान्यकारे परे कुः खोः ≍क ≍पौ च कवर्गीय
वर्गे च विसर्जनीयस्य ≍क ≍पौ लः चात् विसर्गः नॄँ≍पाहि नॄँ≍पाहि नॄः पाहि
नॄः पाहि नॄन्पाहि सोपदादौ विसर्जनीयस्य सस्यादऽपदाद्योः कुःखोः पयस्पाशे
यशस्कल्पे यशस्के यशस्काम्यति अनव्ययस्येति वाच्यम् प्रातःकल्पं कास्ये
रेरेवेति वाच्यम् नेह गीःकाम्यति इणः षः इणः परस्य विसर्जनीयस्य षः
स्यात् सर्वविषये सर्पिष्कं सर्पिष्काम्यति कस्कादिषु च एभ्यः इणउत्तरस्य वि
सर्जनीयस्य षः स्यात् अन्यस्य तु सः कस्कः कौतस्कुतः सर्पिष्कुण्डिकायन्तश्छः

म॰कौ॰
सू॰ ११

पालम् इत्यादिः आकृतिगणोयं तस्य परमाम्रेडितम् द्विरुक्तस्य परं रूपमा
म्रेडितसंज्ञं स्यात् कानाम्रेडिते कान्नकारस्य रुः आम्रेडिते कांस्कान् कांस्का
न् छे च ह्रस्वस्य छे तुक् शच्छाः आङ्माङोश्च तुक् छे आच्छादयति मा
च्छिदत् दीर्घात् तुक् छे म्लेच्छति पदान्ताद्वा दीर्घात्पदान्ताच्छे तुक् वा ल
क्ष्मीच्छाया लक्ष्मीछाया इति हल्सन्धिः विसर्जनीयस्य सः खरि विसर्जनीयस्य सः स्या
त् शर्परे विसर्जनीयः शर्परे खरि विसर्जनीयस्य विसर्गः स्यात् नतु सत्वम् कः
त्सरुः घनाघनः क्षोभणः वा शरि शरि विसर्जनीयस्य विसर्गो वा हरिः शेते
हरिश्शेते खर्परे शरि वा विसर्जनीयस्य लोपो वक्तव्यः हरिस्फुरति हरिः स्फु

११

इति ससजुषो रुः पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात् अतो रोरप्लुतादप्लुते
अप्लुतादतः परस्य रोरुः स्यादप्लुते इति शिवोऽर्च्यः अतः किं देवा अत्र अतिकिं
स्वश्चागमा अप्लुतात् किम् एहि सुस्रोता३ अत्र स्नाहि प्लुतस्यासिद्धत्वादतः
परोऽप्यप्लुतादिति विशेषणेन तत्सामर्थ्यान्नासिद्धत्वम् तपरकरणस्य तु न
सामर्थ्यं दीर्घनिवृत्त्या चरितार्थत्वात् अप्लुते इति किं तिष्ठतु पय आ३ग्निदत्त ह
शि च अप्लुतादतः परस्य रोरुः स्यात् हशि शिवो वन्द्यः भोभगोअघोअपूर्वस्य
योऽशि एतत्पूर्वस्य रोर्यादेशोऽशि देवा इह देवायिह भोस् भगोस् अघोस् इ
तिसान्ता निपाताः एषां रोर्यत्वे कृते व्योर्लघुप्रयत्नतरः शाकटायनस्य पदान्त

मको॰
घू॰
१२

यो ऽशि ओतोगार्ग्यस्य पदान्तस्यालघुप्रयत्नयकारवकारयोर्लघूच्चारणौ वयौ वा स्तो
शाकटायनस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं लघुप्रयत्नतरः स्यष
स्यानित्यलोपः भोऽच्युत लघुप्रयत्नपदे भोयच्युत पदान्तस्य किं तोयम् ह
लि सर्वेषाम् भोभगोअघोअपूर्वस्य यस्य लोपः स्याद्धलि भोदेवाः भगोनमः
स्ते अघोयाहि देवायान्ति रोऽसुपि अह्नो रेफादेशो न तु सुपि अहरहः अह
र्गणः असुपि किम् अहोभ्याम् अत्राहन्निति रूपम् रूपरात्रिरथन्तरेषु रुत्वं
वाच्यं अहोरूपं गतमहोरात्रिरेषा एकदेशविकृतन्यायेनाहोरात्रः अ
होरथन्तरम् अहरादीनां पत्यादिषु वा रेफो विसर्जनीयापवादः अहर्पति

गीर्यतिः पूर्यतिः पदेविसर्गो यथा नीपी रोरि रेफस्य रेफे परे लोपः ढ्रलोपे
पूर्वस्य दीर्घोऽणः ढ्रेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः पुनारमते हरीर
म्यः शंभूराजते अणः किं तृढः मनस्रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रोरीति
लोपे च प्राप्ते विप्रतिषेधे परं कार्यं तुल्यबलविरोधे परं कार्यं स्यात् इति लोपे
प्राप्ते पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव मनोरथः एतत्तदोः सुलो
पोकोरनञ्समासेहलि अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि नञ्स
मासेन एषविष्णुः सशंभुः अकोः किं एषको रुद्रः अनञ्समासे किं असः
शिवः हलि किं एषोऽत्र सोऽपि लोपे चेत्पादपूरणम् सइत्यस्य सोर्लोपस्स्या

म·कौ·
पृ·
१२
13

त् पादश्चेल्लोपेसत्येवपूर्वेण सेमामविद्धिप्रभृतिं सैषदाशरथीरामः इतिविस
र्गसंधिः अर्थवदधातुरप्रत्ययःप्रातिपदिकं धातुं प्रत्ययं प्रत्ययांतं च वर्जयित्वा ऽर्थ
वच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् कृत्तद्धितसमासाश्च कृत्तद्धितांतौ समासाश्च
तथास्युः स्वौजसमौट्शष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् स्वौजस्
इति प्रथमा अम्औट्शस् द्वितीया टाभ्यांभिस् तृतीया ङेभ्यांभ्यस् चतुर्थी ङसि
भ्यांभ्यस् पंचमी ङसोसाम् षष्ठी ङ्योस्सुप् सप्तमी स्यात् प्रातिपदिकात् उक्तत्वाद
वचनात् प्रातिपदिकात्परे स्यादयः प्रत्ययाः स्युः सुपः सुप त्रीणि त्रीणि वचना
न्येकपृथक्वचनद्विवचनबहुवचनसंज्ञानि स्युः द्व्येकयोर्द्विवचनैकवचने

णा२

ने॥ द्वित्वैकत्वयोरेतेस्तः॥ विरामोवसानं॥ वर्णानामभावोऽवसानंस्यात्॥ कत्वावि
सर्गौ॥ रामः॥ सरूपाणामेकशेषएकविभक्तौ॥ एकविभक्तौयानिसरूपाण्येवदृष्टा
नितेषामेकएवशिष्यते॥ प्रथमयोःपूर्वसवर्णः॥ अकः प्रथमाद्वितीययोरचि
पूर्वसवर्णदीर्घएकादेशः॥ इतिप्राप्ते॥ नादिचि॥ आदिचिनपूर्वसवर्णदीर्घः॥
इद्विरेचि॥ रामौ॥ बहुषुबहुवचनं॥ जुटू॥ प्रत्ययाद्यौचुटू इतौस्तः॥ विभक्ति
श्च॥ सुप्तिङौविभक्तिसंज्ञौस्तः॥ नविभक्तौतुस्माः॥ विभक्तिस्थास्तवर्गस
कारमकाराइतोनस्युः॥ इतिसस्यनेत्वं॥ रामाः॥ एकवचनंसंबुद्धिः॥ संबो
धनेप्रथमायाएकवचनंसंबुद्धिसंज्ञंस्यात्॥ यस्मात्प्रत्ययविधिस्तदादि
प्रत्ययेंगं॥ यः प्रत्ययोयस्मात्क्रियतेतदादिशब्दरूपंतस्मिन्प्रत्ययेपरेऽगं

गसंज्ञं स्यात्॥ एङ्ह्रस्वात्संबुद्धेः॥ एङंताद्ध्रस्वांताच्चांगाद्धल्लुप्यते संबुद्धेश्चेत्॥ हे राम हे रामौ॥ हे रामाः॥ अमि पूर्वः॥ अकोम्यचि पूर्वमेकादेशः॥ रामं रामौ॥ लशक्व तद्धिते॥ तद्धित वर्ज प्रत्ययाद्या लशाः कवर्गाश्चेतः स्युः॥ तस्माच्छसो नः पुंसि॥ पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात् पुंसि॥ अट्कुप्वाङ्नुम्व्यवायेपि॥ अट्कवर्गः पवर्ग आङ्नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेपि रषाभ्यां परस्य नकारस्य णः स्यात्समानपदे इति शाकटे॥ पदांतस्य॥ नस्य णो न॥ रामान्॥ टाङसिङसामिनात्स्याः॥ अदंताद्दादीनामिनादयः स्युः। णत्वं रामेण॥ सुपि च॥ यञादौ सुप्यतोंगस्य दीर्घः॥ रामाभ्यां॥ अतो भिस ऐस्॥ अनेकाल्शित्सर्वस्य॥ रामैः॥ ङेर्यः॥ अतोंगात्परस्य ङेर्यादेशः॥ स्थानिवदादेशो नल्विधौ॥

स्॰ ५

॥ आदेशः स्थानिवत्स्यात् न तु स्थान्यलाश्रयविधौ । इति स्थानिवत्त्वात्सुपि चेति
दीर्घः ॥ रामाय ॥ रामाभ्यां ॥ बहुवचने झल्येत् ॥ झलादौ बहुवचने सुप्यतोंगस्य ए
कारः ॥ रामेभ्यः सुपि किं ॥ पचध्वं ॥ वावसाने ॥ अवसाने झलां चरो वा ॥ रामात् रामाद् ॥
रामाभ्यां ॥ रामेभ्यः ॥ रामस्य । ओसि च ॥ अतोंगस्यैकारः ॥ रामयोः ॥ ह्रस्वनद्या
पो नुट् ॥ ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात् ॥ नामि ॥
अजन्तांगस्य दीर्घः ॥ रामाणां ॥ रामे ॥ रामयोः ॥ एत्वे कृते ॥ आदेशप्रत्य
ययोः ॥ इण्कुभ्यां परस्यापदान्तस्यादेशप्रत्ययावयवश्च यः सस्तस्य मूर्
द्धन्यादेशः ॥ ईषद्विवृतस्य तादृश एव षः ॥ रामेषु ॥ एवं कृष्णमुकुन्दा
दयोप्यदन्ताः ॥

रामाद् ३

रा: २

॥सर्वादीनिसर्वनामानि॥सर्व।विश्व।उभ।उभय।डतर।डतम।अन्य।अन्यतर। ॥इतर।त्वद्।त्व।नेम।सम।सिम।पूर्व।पर। अवर।दक्षिण।उत्तर।अपर। अधर।इति।व्यवस्थायामसंज्ञायां॥स्वमज्ञातिधनाख्यायां॥अंतरंबहि र्योगोपसंव्यानयोः॥त्यद्।तद्।यद्।एतद्।इदम्।अदस्।एक।द्वि।युष्म द्।अस्मद्।भवतु।किम्॥जसःशी॥अदंतात्सर्वनाम्नोजसःशीस्यात्॥अ नेकाल्त्वात्सर्वादेशः॥सर्वे॥सर्वनाम्नःस्मै॥अदंतात्सर्वनाम्नोङेःस्मै॥स र्वस्मै॥ङसिङ्योःस्मात्स्मिनौ॥अतःसर्वनाम्नोएतयोरेतौस्तः॥सर्वस्मा त्॥आमिसर्वनाम्नःसुट्॥अवर्णांतात्परस्यसर्वनाम्नोविहितस्यामःसु

डागमः॥

२४ उभयशब्दस्य द्विवचनं नास्तीति कैय्यटः ॥ अस्तीति हरदत्तः ॥२४

एत्वं षत्वे ॥ सर्वेषां ॥ सर्वस्मिन्‌ ॥ शेषं रामवत्‌ ॥ एवं विश्वादयोऽप्यदन्ताः ॥ उभशब्दो नित्यं द्विवचनान्तः ॥ उभौ ॥ उभौ २ ॥ उभाभ्यां ३ ॥ उभयोः २ ॥ तस्येह पाठो कजर्थः ॥ डतर डतमौ प्रत्ययौ ॥ प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः ॥ नेम इत्यर्धे ॥ समः सर्वपर्यायः ॥ तुल्यपर्यायस्तु न समानामिति ज्ञापकात्‌ ॥ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां ॥ एषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणसूत्रात्‌ सर्वत्र प्राप्ता सा जसि वा ॥ पूर्वे पूर्वाः ॥ स्वाभिधेयापेक्षावधिनियमो व्यवस्था ॥ व्यवस्थायां किं ॥ दक्षिणा गाथकाः कुशला इत्यर्थः ॥ स्वमज्ञातिधनाख्यायां ॥ ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा सा जसि वा ॥ स्वे स्वाः । आत्मीयाः । आत्मान इति वा ॥ ज्ञातिधनवाचिनस्तु ॥ स्वाः ज्ञातयोऽर्था वा ॥ अन्तरे अन्तराः वा गृहाः । बाह्या इत्यर्थः । अन्तरे अं

यो

तरावाशाटका:।परिधानीयाद्यर्थः।अंतरंबहिर्योगोपसंव्यानयोः॥बाह्ये परि
धानीये चार्थे अंतरशब्दस्य प्राप्ता संज्ञा सा जसि वा।पूर्वादिभ्यो नवभ्यो वा॥एभ्यो
ङसिङ्योः स्मात्स्मिनौ वा स्तः।पूर्वस्मात्।पूर्वस्मात्।पूर्वस्मिन्।पूर्वे।एवं परादीनाम
पि।शेषं सर्ववत्।संज्ञोपसर्जनीभूतास्तु न सर्वादयः॥सर्वो नाम कश्चित् तस्मै सर्वा
य देहि।अतिक्रांतः सर्वमतिसर्वस्तस्मै अतिसर्वाय देहि।तृतीयासमासे सर्व न
मतान्॥मासपूर्वाय।तृतीयासमासार्थवाक्येपि न।मासेन पूर्वाय।द्वंद्वे च।उत्तास
मतान्॥मासपूर्वाय।तृतीयासमासार्थवाक्येपि न।मासेन पूर्वाय।द्वंद्वे च।उक्तास
ज्ञानं।वर्णाश्रमेतराणां॥विभाषा जसि॥वर्णाश्रमेतरे।वर्णाश्रमेतराः।प्रथमचर
मतयाल्पार्धकतिपयनेमाश्च॥एते जसु क्तसंज्ञा वा स्युः।प्रथमे प्रथमाः॥
तय:।अल्पाः।द्वितीये।द्वितीयाः॥शेषं रामवत्॥नेमे।नेमाः।शेषं सर्ववत्।तीय

सङि सुवा॥ द्वितीयस्मै॥ द्वितीयायइत्यादि॥ एवंतृतीयः॥ निर्जरः॥ जरायाजरसन्यत
रस्यां॥ जरायाजरस्वाजादौविभक्तौ॥ पदांगाधिरे तस्यचतदंतस्यचनिर्दिश्यमानस्यादे
शाभवंति॥ एकदेशविकृतमनन्यवत्॥ इतिजरशब्दस्यजरस्॥ निर्जरसौइत्यादि॥ प
दोहलादौचरामवत्

[illegible]

[illegible]

[illegible] विश्वपाः॥ दीर्घाज्ज
सिच॥ दीर्घाज्जसिइचिचनपूर्वसवर्णदीर्घः॥ हृद्भिः॥ विश्वपौ॥ विश्वपाः॥ हेविश्वपाः॥
सुडनपुंसकस्य॥ स्वादिपंचवचनानिसर्वनामस्थानसंज्ञानिस्युरक्लीवस्य॥ स्वा

११
17

दिक्षु सर्वनामस्थाने॥ कप्रत्यय याव धिषु स्वादिषु सर्वनामस्थानेषु पूर्वं पदं स्यात्॥
॥यचिभं॥ यादिषु अजादिषु च कप्रत्यये यावधिषु स्वादिषु सर्वनामस्थानेषु पूर्वं भं स्यात्॥ आकडारादेका संज्ञा॥ इत ऊर्द्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया॥ यापवादानवकाशाच॥ आतो धातोः॥ आकारांतो यो धातुस्तदंतस्य भस्यांगस्य लोपः॥ अलोंत्यस्य॥ विश्वपः॥ विश्वपा॥ विश्वपाभ्यामित्यादि॥ एवं शंखध्मादयः धातोः किं॥ हाहान्॥ आत इति योगविभागादधातोरपि क्वचित् लुक्॥ अस्नः॥ हरिः॥ हरी॥ जसि च॥ ह्रस्वांतस्यांगस्य गुणः॥ हरयः॥ ह्रस्वस्य गुणः॥ संबुद्धौ॥ हे हरे॥ हरिं॥ हरी॥ हरीन्॥ शेषो घ्यसखि॥ शेष इति स्पष्टार्थं॥ ह्रस्वौ याविदुतौ तदंतं सखिवर्जं घिसंज्ञं स्यात्॥

आङो नाऽस्त्रियां॥ घेः परस्याङो नास्याद स्त्रियां। आङिति टा संज्ञा॥ हरिणा॥ हरिभ्यां। हरिभिः॥
घेर्ङिति। घिसंज्ञस्य ङिति सुपि परे गुणः॥ हरये। हरिभ्यां। हरिभ्यः॥ गुणे कृते॥ ङसिङसोश्च॥
एङो ङसिङसोरति पूर्वरूपमेकादेशः॥ हरेः। हरिभ्यां। हरिभ्यः। हरेः। हर्योः। हरीणां। अच्च घेः।
इदुद्भ्यामुत्तरस्य ङेरौत घेरत॥ हरौ॥ हर्योः। हरिषु॥ एवं कव्यादयः॥ अनङ् सौ॥ सख्युरङ्ग
स्यानङादेशो संबुद्धौ सौ॥ अलोन्त्यात्पूर्व उपधा॥ अन्त्यादलः पूर्वो वर्णः स उपधासंज्ञः
स्यात्॥ सर्वनामस्थाने चासंबुद्धौ॥ नान्तस्योपधाया दीर्घो संबुद्धौ सर्वनामस्थाने॥ अपृक्त

८प एकाल्प्रत्ययः॥ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्॥ हलन्तात्परं दीर्घौ यो ङ्यापौ तदन्ताच्च प
रं सुतिसीत्येतदपृक्तं हल्लुप्यते॥ प्रत्ययलोपे प्रत्ययलक्षणं॥ प्रत्ययलोपे सति तदाश्रितं का चिर
र्यं स्यात्॥ नलोपः प्रातिपदिकान्तस्य॥ प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः॥ सखा॥
सख्युरसंबुद्धौ॥ सख्युरङ्गात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्॥ अचो ञ्णिति॥ अजं

तांगस्य वृद्धिर्णितिणितिचपरे॥ सखा यौ॥ सखायः॥ सखायं। सखायौ॥ सखीन्॥ सख्या। सखिभ्यां॥ सखिभिः। सख्ये॥ सखिभ्यां। सखिभ्यः॥ ख्यत्यात्परस्य॥ खिति शब्दाभ्यां खीती शब्दाभ्यां कृतयणादेशाभ्यांपरस्य ङसिङसोरत उः॥ सख्युः। सखिभ्यां। सखिभ्यः॥ सख्युः। सख्योः। सखीनां। औत्॥ इतः परस्य ङेरौत्॥ सख्यौ। सख्योः। सखिषु॥ हे सखे। हे सखायौ। हे सखायः॥ पतिः समास एव। घिसंज्ञः॥ पत्या। पत्ये। पत्युः। पत्योः॥ शेषं हरिवत्॥ समासे तु भूपतये॥ कतिर्बहुवचनांतः। बहुगणवतुडति संख्या॥ डति च॥ डत्यंता संख्या षट्संज्ञा स्यात्॥ षड्भ्यो लुक्॥ जश्शसोः॥ प्रत्ययस्य लुक्श्लुलुपः॥ लुक्श्लुलुप शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात्॥ न सिचेति गुणाभावे॥ न लुमतांगस्य॥ लुमता शब्देन लुप्ते तन्निमित्तमंगकार्यं न स्यात्॥ कति। कति। कतिभिः। कतिभ्यः॥ कतीनां। कतिषु॥ त्र्य

श्रा १ सप्तोत्तरषट्संज्ञस्याविष्णुस्वरूपाणां ॥ त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः । त्रेस्त्रयः । आमि । त्रयाणां ॥
त्रिषु ॥ गौणत्वेपि त्रियत्रयाणां ॥ त्यदादीनामः ॥ एषामकारो विभक्तौ ॥ द्विपर्यंतानामेवे
ष्टिः ॥ द्वे । द्वौ । द्वाभ्यां ३ । द्वयोः २ । द्विपर्यंतां नोक्ति ॥ भवान् । भवंतौ । पाति लोकमिति प
पीः सूर्यः । पप्यौ । पप्यः । हेपपीः । पपीं । पप्यौ । पपीन् । पप्या । पपीभ्यां । पपीभिः । पप्ये । प
पीभ्यां । पपीभ्यः । पप्यः । पपीभ्यां । पपीभ्यः । पप्यः । पप्योः । पप्यां । पपी । पप्योः । पपीषु ॥ कि ५
स्यो एवं वातप्रम्यादयः । बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ॥ बहुश्रेयस्यौ । बहुश्रेयस्यः ॥
बहुश्रेयसीं । बहुश्रेयस्यौ ॥ यू स्त्र्याख्यौ नदी ॥ ईदूदंतौ नित्यस्त्रीलिंगौ नदीसंज्ञौ स्तः ॥
॥ प्रथमलिंगग्रहणं च ॥ पूर्वं स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः ॥ अं
बार्थनद्योर्ह्रस्वः ॥ संबुद्धौ । हे बहुश्रेयसि ॥ आण्नद्याः ॥ नद्यंतात्परेषां ङितामाडागमः ॥

४२ बहुश्रेयसीन् ॥ बहुश्रेयस्या । बहुश्रेयसीभ्यां ॥ बहुश्रेयसीभिः ॥ ४३

१५

आट श्र॥ आटोचित्स्त्रि रेकादेशः स्यात्॥ [blacked out]

[blacked out] ॥ बहुश्रेयस्ये। बहुश्रेयसीभ्यां। बहुश्रेयसीभ्यः।

बहुश्रेयस्याः॥ बहुश्रेयसीभ्यां। बहुश्रेयसीभ्यः॥ बहुश्रेयस्याः॥ बहुश्रेयस्योः।

बहुश्रेयसीनां॥ ङेराम्नद्याम्नीभ्यः॥ नद्यंतादावंतात् [blacked out] ङेराम्॥ बहुश्रेय

स्यां। बहुश्रेयस्योः॥ बहुश्रेयसीषु॥ हे बहुश्रेयसि॥ हे बहुश्रेयस्यः॥ अति

लक्ष्मीः॥ शेषं बहुश्रेयसीवत्॥ प्रधीः॥ अचिश्नुधातुभ्रुवां यो रियङुवङौ

॥ श्नुप्रत्ययांतस्येवर्णोवर्णांतधातोर्भ्रू इत्येतस्य चांगस्य यङुवङौ स्तोजादौ प्र

त्यये॥ इतिप्राप्ते॥ एरनेकाचोसंयोगपूर्वस्य॥ धात्ववयवसंयोगपूर्वो न भव

तियइवर्णस्तदंतो यो धातुस्तदंतस्याऽनेकाचोंगस्य यण् अजादौ प्रत्यये॥ प्र

ध्यौ। प्रध्यः। प्रध्यं। प्रध्यौ। शेषं पपीवत्॥ एवं ग्रामणीः॥ ङौत्तु ग्रामण्यां॥ [blacked out]

~~[illegible]~~ ॥ गतिश्च ॥ प्रादयः क्रियायोगे गतिसंज्ञाः स्युः ॥ गतिकारकेतर
पूर्वपदस्य यण् नेष्यते ॥ सुधी ॥ सुधियौ ॥ न भूसुधियोः ॥ एतयोरचि सुपि यण् न ।
सुधियौ ॥ सुधियः ॥ इत्यादि ॥ सुखमिच्छतीति सुखीः ॥ सुख्युः ॥ सुती ॥ सुत्युः
एवं प्रधीवत् ॥ शंभुर्हरिवत् ॥ एवं भान्वादयः ॥ तृज्वत् क्रोष्टुः ॥ असंबुद्धौ स
र्वनामस्थाने क्रोष्टु इत्यस्य क्रोष्टृ शब्दोत्तव्य इत्यर्थः ॥ ऋतो ङि सर्वनाम
स्थानयोः ॥ ऋतोंगस्य गुणो ङौ सर्वनामस्थाने [illegible]ः इति प्राप्ते ॥ ऋदुश
नस्पुरुदंसोनेहसां च ॥ ऋदंतानां उशनसादीनां चानङ् स्यादसंबुद्धौ सौ
॥ अप्तृन्तृच् स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां ॥ अप्वादीनामुप

२८

२०

धायादीर्घोऽसंबुद्धौसर्वनामस्थाने॥क्रोष्टा॥क्रोष्टारौ॥क्रोष्टारः॥क्रोष्टारं॥क्रो
ष्टारौ॥क्रोष्टून्॥विभाषातृतीयादिष्वचि॥तृतीयादिष्वजादिषुक्रोष्टुर्वातृज्व
त्॥क्रोष्ट्रा॥क्रोष्टुना॥क्रोष्टुभ्यां॥क्रोष्टुभिः॥क्रोष्ट्रे॥क्रोष्टवे॥क्रोष्टुभ्यां॥क्रोष्टु
भ्यः॥ऋतउत्॥ऋतोङसिङसोरति॥उरण्रपरः॥उदेकादेशःरपरः॥रात्सस्य॥
रेफात्संयोगांतस्यसस्यैवलोपोनान्यस्यारस्यविसर्गः॥क्रोष्टुः॥क्रोष्टोः
क्रोष्टुभ्यां॥क्रोष्टुभ्यः॥क्रोष्टुः॥क्रोष्टोः॥क्रोष्ट्रोः॥क्रोष्टोः॥नुमचिरतृज्वद्भ्यः
तृज्वद्भावेभ्योनुट्पूर्वविप्रतिषेधेन॥क्रोष्टूनां॥क्रोष्टरि॥क्रोष्टौ॥क्रोष्ट्रोः
क्रोष्ट्रोः॥क्रोष्टुषु॥हेक्रोष्टो॥हेक्रोष्टू॥हेक्रोष्टवः॥पद्बेहलादौचरांस्तुव
त्॥हूहूः॥हूहावित्यादि॥अतिचमूशब्देतुनदीकार्यंविशेषः॥हेअतिचमु

तृलकलविंबर्वेकार्यस्मात
९५२

अतिचमूः। अतिचम्वौ। अतिचम्वः। अतिचम्वं। अतिचम्वौ। अतिचमून्। अति
चम्वा। अतिचमूभ्यां। अतिचमूभिः। अतिचम्वे। अतिचमूभ्यां। अतिचमूभ्यः॥
अतिचम्वाः। अतिचमूभ्यां। अतिचमूभ्यः। अतिचम्वाः। अतिचम्वोः। अतिच
मूनां। अतिचम्वां। अतिचम्वोः। अतिचमूषु। खलपूः। ओः सुपि। धात्ववयव
संयोगपूर्वो न भवति य उवर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोंगस्य यण्स्यादचि
सुपि। खलप्वौ। खलप्वः। एवं सुल्वादयः। ... सुवौ। सुवः। ...
... सुवौ। स्वयंभूः। स्वयंभुवौ। स्वयंभुवः। एवं स्वयंभूः। वर्षा
भूः। वर्षाभ्वः। अस्य यण्स्यादचि सुपि। वर्षाभ्वावित्यादि। दृन्भूः। दृन्करपु
नःपूर्वस्य भुवो यण्वक्तव्यः॥ दृन्भ्वौ। दृन्भ्वः। एवं करभूः। पुनर्भूः। दृन्भ्वौ। कारा
भूः शब्दो स्वयंभूवत्। धाता। धातारौ। धातारः। धातारं। धातारौ। धातॄन्। धा
त्रा। धातृभ्यां। धातृभिः। धात्रे। धातृभ्यां। धातृभ्यः। धातुः। धातृभ्यां। धातृभ्यः

धातुः। धात्रोः। धातॄणां। धातरि। धात्रोः। धातृषु। ~~[illegible]~~ ॥ एवं नप्त्रादयः। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं। उणादिसिद्धानां हृन्तृजंतानांच दीर्घो भवति तदा नप्त्रादीनामेव नान्येषां॥ तेनेह न। पिता। पितरौ पितरः। पितरं। शेषं धातृवत्। एवं जामात्रादयः। उद्गातृशब्दस्य तु दीर्घो भवत्येव। समर्थसूत्रे उद्गातार इति भाष्यप्रयोगात्॥ ना। नरौ। नरः। नृच॥ अस्य नामि वा दीर्घः॥ नॄणां। नृणां। गोतो णित्। ओकारा द्विहितं सर्वनामस्थानं णिद्वत्॥ गौः। गावौ। गावः। औतोऽम्शसोः। ओतोऽम्शसोरचि आकार एकादेशः। गां। गावौ। गाः। गवा। गोभ्यां। गोभिः। गवे। गोभ्यां। गोभ्यः। गोः। गोभ्यां। गोभ्यः। गोः। गवोः। गवां। गवि। गवोः। गोषु। रायो हलि॥ आकारादेशो हलि विभक्तौ॥ राः। रायौ। रायः। रायं। रायौ। रायः। राया। राभ्यामित्यादि। ग्लौः। ग्लावौ। ग्लावः। ग्लौभ्यामित्यादि॥ ॥ इत्यजंताः पुंलिंगाः॥

।।रमा।। औङ आपः।। आबंतादंगादौङः शी।। औङिस्त्वोकारविभक्तेः संज्ञा।।रमे।रमाः।रमां।
रमे।रमाः। संबुद्धौ च।।आप एकारः।।हे रमे।।आङि चापः।।आङि ओसि चाप एका
रः।।रमया।रमाभ्यां।रमाभिः।याडापः।आपो ङितो याट्।।वृद्धिः।रमायै।रमाभ्यां।
रमाभ्यः।रमायाः।रमाभ्यां।रमाभ्यः।।रमायाः।रमयोः।रमाणां।रमायां।रमयोः।
रमासु।।एवं दुर्गा अंबिकादयः।।सर्वनाम्नः स्याड्ढ्रस्वश्च।।आबंतात्सर्वनाम्नो ङि
तस्याडापश्च ह्रस्वः।सर्वा।सर्वे।सर्वाः।सर्वां।सर्वे।सर्वाः।सर्वया।सर्वाभ्यां।सर्वाभिः।।
सर्वस्यै।सर्वाभ्यां।सर्वाभ्यः।सर्वस्याः।सर्वाभ्यां।सर्वाभ्यः।सर्वस्याः।सर्वयोः।सर्वा
सां।सर्वस्यां।सर्वयोः।सर्वासु।हे सर्वे।हे सर्वे।हे सर्वाः।एवं विश्वादयः आबंताः।।
विभाषा दिक्समासे बहुव्रीहौ।।सर्वनामता वा।।उत्तरपूर्वस्यै।।उत्तरपूर्वायै।।अ
पुरीत्युक्तेर्नेह।।अंतरायै।।नगर्यै।तीयस्येति वा।।द्वितीयस्यै।द्वितीयायै।।एवं तृतीया।

२२ अंबार्थेतिह्रस्वः। हे अंब। हे अक्क। हे अल्ल॥ असंयुक्तायेडलकारस्तद्वतांह्रस्वो न॥ हे अंबाडे। हे अंबाले। हे अंबिके॥ जरा। जरसौ। जरे। जरसः। जराः। जरसं। जरां। जरसौ। जरे। जरसः। जराः। जरसा। जरया। जराभ्यां। जराभिः। जरसे। जरायै। जराभ्यां। जराभ्यः। जरसः। जरायाः। जराभ्यां। जराभ्यः। जरसः। जरायाः। जरसोः। जरयोः। जरसां। जराणां। जरसि। जरायां। जरसोः। जरयोः। जरासु॥ जरेत्यादिपदेरमावत्॥ गोपाविश्ववत्॥ मतिः। मती। मतयः। मत्या। मतिभ्यां। मतिभिः॥ ङितिह्रस्वश्च॥ इयङुवङुस्थानौस्त्रीशब्दभिन्नौनित्यस्त्रीलिंगावीदूतौह्रस्वौचइउवर्णौस्त्रियांवानदीसंज्ञौङिति। मत्यै। मतये। मतिभ्यां। मतिभ्यः। मत्याः। मतेः। मतिभ्यां। मतिभ्यः। मत्याः। मतेः। मत्योः। मतीनां॥ नदीत्वपक्षेओदितिङेरौत्वेप्राप्ते॥ इदुद्भ्यां॥ नदीसंज्ञकाभ्यांइउद्भ्यां।

पा६

X मतिं। मती। मतीः। १५X

परस्यङे'राम्॥मत्यां।मतौ।मत्योः।मतिषु॥हेमते।हेमती।हेमतयः।एवंबुद्ध्याद
यः।त्रिचतुरौस्त्रियां तिसृचतसृ॥स्त्रीलिंगयोरेतयोरेतौस्तो विभक्तौ॥अचि
रऋतः॥तिसृचतसृओऋतोरादेशो त्रिगुणादीर्घौ ध्वानामपवादः।तिस्रः।२
तिसृभिः।तिसृभ्यः।३।आमिनुट्॥नतिसृचतसृ॥एतयोर्नामि दीर्घो न॥
तिसृणां।तिसृषु॥द्वे।द्वे।द्वाभ्यां।३।द्वयोः।२।गौरी।गौर्यौ।गौर्यः।गौरीं।गौ
र्यौ।गौरीः।गौर्या॥गौरीभ्यां।गौरीभिः।गौर्यै॥गौरीभ्यां।गौरीभ्यः।गौर्याः।
गौरीभ्यां।गौरीभ्यः।गौर्याः।गौर्योः।गौरीणां।गौर्यां।गौर्योः।गौरीषु॥हे
गौरि॥हेगौर्यौ।हेगौर्यः।एवंनद्यादयः।लक्ष्मीः॥शेषंगौरीवत्॥एवंतरी
तंत्र्यादयः॥स्त्री।[illegible]॥अस्येयङ्जादौप्रत्यये।स्त्रियौ।स्त्रियः।वाम्शसो
सोः॥स्त्रियांवाइयङ्॥स्त्रियंस्त्रीं।स्त्रियौ।स्त्रियः।स्त्रीः।स्त्रिया।स्त्रीभ्यां।

स्त्रियाः।२४

स्त्रीभिः॥ स्त्रियै॥ स्त्रीभ्यां॥ स्त्रीभ्यः॥ स्त्रियाः स्त्रीभ्यां॥ स्त्रीभ्यः॥ स्त्रियाः॥ स्त्रियोः॥ पुरस्ता
त्सुटू॥ स्त्रीणां॥ स्त्रियां॥ स्त्रियोः॥ स्त्रीषु॥ हे स्त्रि हे स्त्रियौ॥ हे स्त्रियः॥ श्रीः॥ श्रियौ॥ श्रि
यः॥ श्रियं॥ श्रियौ॥ श्रियः॥ श्रिया॥ श्रीभ्यां॥ श्रीभिः॥ हे श्रीः॥ हे श्रियौ॥ हे श्रियः॥ श्रियै॥ श्रि
ये॥ श्रीभ्यां॥ श्रीभ्यः॥ श्रियः॥ श्रीभ्यां॥ श्रीभ्यः श्रियः श्रियोः॥ यानि॥ इयङुवङ् स्थानौ स्त्र्याख्यौ॥ श्रियाः
श्रियाः॥ × श्रीभ्यां॥ श्रीभ्यः॥ श्रियः॥ श्रीणां॥ श्रियां॥ श्रियि॥ श्रियोः॥ श्रीषु॥ धेनुर्मतिवत्॥ श्रियां॥
स्त्र्यो॥ यू स्त्र्याख्यौ नदी संज्ञौ न तु स्त्री॥ श्रीणां॥ श्रियां॥ श्रियि॥ श्रियोः॥ श्रीषु॥ धेनुर्मतिवत्॥
स्त्रियां च॥ स्त्रीवाची क्रोष्टुशब्दस्तृजंतवदुपलभ्यते॥ ऋन्नेभ्यो ङीप्॥ ऋदंतेभ्यो नांतेभ्य
श्च स्त्रियां ङीप्॥ क्रोष्ट्री गौरीवत्॥ भ्रूः श्रीवत्॥ स्वयंभूः पुंवत्॥ न षट्स्वस्रादिभ्यः॥ एभ्यो
ङीप् टापौ न स्तः॥ स्वसा तिस्रश्चतस्रश्च ननांदा दुहिता तथा॥ याता माता तिस्र सैते स्वस्रा
दय उदाहृताः॥ स्वसा॥ स्वसारौ॥ स्वसारः॥ स्वसारं॥ स्वसारौ॥ स्वसॄः॥ स्वस्रा॥ स्वसृभ्यां॥ स्वसृ
भिः॥ स्वस्रे॥ स्वसृभ्यां॥ स्वसृभ्यः॥ स्वसुः॥ स्वसृभ्यां॥ स्वसृभ्यः॥ स्वसुः॥ स्वस्रोः॥ स्वसॄणां॥ स्वसरि

स्वस्रोः॥ स्वसृषु॥ माता पितृवत्॥ द्यौर्गोवत्॥ राः पुंवत्॥ नौर्ग्लौवत्॥ इत्यजंताः
स्त्रीलिंगाः॥ अतोम्॥ अतोंगात्क्लीबात्स्वमोरम्॥ ज्ञानं॥ एङ्ह्रस्वादिति संबुद्धिलोपः॥
हे ज्ञान॥ नपुंसकाच्च॥ क्लीबादौङः शी भसंज्ञायां॥ यस्येति च॥ ईकारे तद्धिते च परे भ
स्येवर्णावर्णयोर्लोपः॥ इत्यलोपे प्राप्ते औङः श्यां प्रतिषेधः॥ ज्ञाने॥ जश्शसोः शिः॥
क्लीबात्॥ शि सर्वनामस्थानं॥ नपुंसकस्य झलचः॥ झलंतस्याजंतस्य च क्लीबस्य नु
म् स्यात्सर्वनामस्थाने॥ मिदचोंत्यात्परः॥ अचां मध्ये योंत्यस्तस्मात्परस्तस्यैवां
तावयवो मित्स्यात्॥ उपधादीर्घः॥ ज्ञानानि॥ पुनस्तद्वत्॥ एवं रामवत्॥ एवं ध
नवनफलादयः॥ अद्ड्डतरादिभ्यः पंचभ्यः॥ एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः॥ टेः॥
डिति परे भस्य टेर्लोपः॥ कतरत्॥ कतरद्॥ कतरे॥ कतराणि॥ हे कतरत्॥ पुनस्तद्वत्
शेषं पुंवत्॥ कतमत्॥ इतरत्॥ अन्यत्॥ अन्यतरत्॥ अन्यतमस्य तु अन्यतम

२४ मित्येव॥ एकतरात् इति बोधः॥ एकतरं॥ ह्रस्वो नपुंसके प्रातिपदिकस्य॥ अजंतस्येति
व॥ श्रीपं ज्ञानवत्॥ स्वमोर्नपुंसकात् लुक्॥ वारि॥ इकोचि विभक्तौ॥ इग्यंतस्य क्लीबस्य
नुमागमोचि विभक्तौ॥ वारिणी॥ वारीणि॥ न लुमतेत्यस्यानित्यत्वात् पक्षे संबुद्धि
निमित्तो गुणः॥ हे वारि। हे वारे। घेर्ङितीति गुणे प्राप्ते। वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो
नुम् पूर्वविप्रतिषेधेन॥ वारिणे। वारिणः। वारिणोः॥ नुमचिरेति नुट्॥ वारिणां।
वारिणि॥ हलादौ हरिवत्॥ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य॥ प्रवृत्तिनि
२७ मित्तैक्ये भाषितपुंस्कमिगंतं क्लीबं पुंवद्वा स्याट्टादावचि॥ अनादि। अनादिनी। अना
दीनि॥ पुनरपि॥ अनादि। अनादिनी। अनादीनि॥ अनादिना॥ अनादिभ्यां
अनादिभिः॥ अनादये। अनादिने। अनादिभ्यां। अनादिभ्यः॥ अनादिनः
॥ अनादेः। अनादिभ्यां। अनादिभ्यः। अनादिनः। अनादेः। अनाद्योः। अनादिनोः

अनादीनां। अनादिनि। अनादौ। अनादिनोः। अनाद्योः। अनादिषु। यन्नि
मित्तमुपादाय पुंसि शब्दः प्रवर्त्तते॥ क्लीबवृत्ति तदेव स्यादुक्तं पुंस्कं तदुच्यते॥ १॥
पीलुर्वृक्षस्तत्फलं पीलु तस्मै पीलुने॥ अन्नपुंवत्प्रवृत्तिनिमित्तभेदात्॥ अस्थि
दधिसक्थ्यक्ष्णामनङुदात्तः॥ टादावचि॥ अं लोपोनः॥ अंगावयवोऽसर्वना
मस्थानयजादिस्वादिपरोयोन् तस्याकारस्य लोपः॥ दध्ना। दध्ने। दध्नः। दध्नोः
विभाषाङिश्योः॥ अंगावयवोसर्वनामस्थानयजादिस्वादिपरोयोन् तस्याकारस्य लोपो
वाङिश्योः॥ दध्नि। दधनि। शेषं वारिवत्॥ एवमस्थिसक्थ्यक्षि॥ सुधीः सुधिनी। सुधीनि।
हे सुधि हे सुधे। सुधिने इत्यादि। मधु। मधुनी। मधूनि। हे मधु हे मधो॥ एवमम्बादयः॥ सु
लु। सुलुनी। सुलूनि। सुलुने इत्यादि॥ धातृ। धातृणी। धातॄणि। हे धातः हे धातृ। धातॄणां॥
एवं ज्ञातृकर्त्रादयः॥ एच इग्घ्रस्वादेशे॥ ह्रस्वादेशे कर्त्तव्ये एच इक् स्यात्॥ प्रद्यु। प्रद्युनी। प्रद्यूनि।

प्रद्युने इत्यादि॥प्रति। प्रतिणी। प्रतीणि। प्रतिणा। एकदेशविकृतमनन्यवत्॥ प्रताभ्यां। प्रतीणां॥
सुतु। सुतुनी। सुतूनि। सुतुने इत्यादि। इत्यजंता नपुंसकलिंगाः॥ ॥ हो ढः॥ झलि पदांते च॥
लिट्। लिड्। लिहौ। लिहः। लिड्भ्यां। लिट्सु। लिड्षु॥ दादेर्धातोर्घः॥ झलि पदांते चोपदेशे दादे
र्धातोर्हस्य घः॥ एकाचो बशो भष् झषंतस्य स्ध्वोः॥ धात्ववयवस्यैकाचो झषंतस्य बशो भष्
से ध्वे पदांते च॥ इह व्यपदेशिवद्भावेन धात्ववयवत्वाद्भष्भावः॥ बशो भष् से ध्वे पदां
ते॥ धुक्। धुग्। दुहौ। दुहः। धुग्भ्यां॥ धुक्षु॥ वा द्रुहमुहष्णुहष्णिहां॥ एषां हस्य वा घो झलि प
दांते च॥ ध्रुक्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्यां। ध्रुड्भ्यां॥ ध्रुक्षु। ध्रुट्सु। ध्रुट्षु॥ एवं मुह।
धात्वादेः षः सः॥ स्नुक्। स्नुग्। स्नुट्। स्नुड्। स्नुहौ। स्नुहः॥ एवं स्निह॥ इग्यणः संप्रसारणं।
वाहऊठ्॥ भस्य वाहः संप्रसारणमूठ्॥ संप्रसारणाच्च॥ संप्रसारणादचि पूर्वरूपमेकादेशः।
वृद्धिः॥ विश्ववाट्। विश्ववाड्। विश्ववाहौ॥ विश्ववाहः॥ विश्ववाहं। विश्ववाहौ॥ विश्वौहः।

निमित्तापाये नैमित्तिकस्याप्यपायः॥ ३४

विश्वौहा ॥ विश्ववाड्भ्यां ॥ विश्ववाड्भिः ॥ विश्ववाड्भ्यां ॥ विश्ववाड्भ्यः ॥ विश्वौहः ॥ विश्ववाड्भ्यां ॥
विश्ववाड्भ्यः ॥ विश्वौहः ॥ विश्वौहोः ॥ विश्वौहां ॥ विश्वौहि ॥ विश्वौहोः ॥ विश्ववाट्सु ॥ हे विश्ववाट् ।
हे विश्ववाहौ ॥ हे विश्ववाहः ॥ चतुरनडुहोरामुदात्तः ॥ सर्वनामस्थाने ॥ नावनडुहः ॥ नुम् ॥ आ
द्वीनघोरितिस्त्रना दादित्यधिकारादवर्णात्परोयंनुम् ॥ अतो विशेषविहितेन पिनुमा आ
मनबाध्यते ॥ अमाचनुमन बाध्यते ॥ सुलोपः ॥ संयोगांतस्यलोपः ॥ तस्यासिद्धत्वान्नलोपो
न ॥ नुमविधिसामर्थ्याद्वसुस्रंस्विति दत्वं न ॥ अनड्वान् ॥ अंसंबुद्धौ ॥ चतुरन
डुहोः ॥ हे अनड्वन् ॥ हे अनड्वाहौ ॥ अनड्वाहः ॥ अनड्वाहं ॥ अनड्वाहौ ॥ अनडुहः ॥ अ
नडुहा ॥ वसुस्रंसुध्वंस्वनडुहांदः ॥ सांतवस्वंतस्यस्रंसादेश्चदः पदांते ॥ अनडुद्भ्यां ।
अनडुद्भिः ॥ अनडुहे ॥ अनडुद्भ्यां । अनडुद्भ्यः ॥ अनडुहः ॥ अनडुद्भ्यां । अनडु
द्भ्यः ॥ अनडुहः ॥ अनडुहोः ॥ अनडुहां ॥ अनडुहि । अनडुहोः ॥ अनडुत्सु ॥ पदांते किं

स्रस्तं। ध्वस्तं॥ सहेः (सः॥ साड्रूपस्य सहेः सस्य मूर्द्धन्यादेशः॥ तुराषाट्। तुराषाड्। तुरासाहौ। तुरासाहः॥ तुराषाड्भ्यां॥ तुराषाड्भिरित्यादि। दिव औत्। दिवितिप्रातिपदिकस्यौत् स्यात् सौ॥ सुद्यौः। सुदिवौ॥ सुदिवः॥ दिव उत्॥ पदांते॥ सुद्युभ्यामित्यादि। चत्वारः॥ चतुरः॥ चतुर्भिः॥ चतुर्भ्यः॥ रः॥ षट्चतुर्भ्यश्च॥ एभ्य आमो नुडागमः॥ रषाभ्यां नो णः समान पदे॥ चतुर्णां॥ रोः सुपि॥ रोरेव विसर्जनीयः सुपि॥ चतुर्षु॥ मो नो धातोः॥ पदांते॥ प्रशान्॥ प्रशामौ॥ प्रशामः॥ प्रशामं॥ प्रशामौ॥ प्रशामः॥ प्रशामा। प्रशान्भ्यां। प्रशान्भिः॥ प्रशामे॥ प्रशान्भ्यां। प्रशान्भ्यः॥ प्रशामः प्रशान्भ्यां। प्रशान्भ्यः। प्रशामः। प्रशामोः। प्रशामां। प्रशामि॥ प्रशामोः। प्रशान्सु॥ प्रशान्त्सु॥ किमः कः॥ विभक्तौ॥ कः। कौ। के। कं। इत्यादि॥ इदमो मः॥ सौ॥ त्यदाद्यत्वापवादः॥ इदो य् पुंसि॥ इदम इदो य् सौ पुंसि॥ अयं॥ त्यदाद्यत्वं॥ अतो गुणे॥ अपदांतादतो गुणे पररूपमेकादेशः॥ इमौ॥ इदमो दस्य मः स्याद्विभक्तौ॥ इमौ। इमे॥ त्यदादेः संबोधनं नास्तीत्युत्सर्गः॥ अनाप्यकः॥ अककारस्येदम इदोऽना पि विभक्तौ॥

आवितिप्रत्याहारः॥ अनेन॥ हलिलोपः॥ अककारस्येदम इदोलोप आपि हलादौ॥ नानर्थ केलोंत्यविधिरनभ्यासविकारे॥ आद्यंतवदेकस्मिन्॥ एकस्मिन्क्रियमाणं कार्यमाद्यविवांत इवस्यात्॥ सुपिचेतिदीर्घः॥ आभ्यां॥ नेदमदसोरकोः॥ अककारयोरिदमदसोर्भिस ऐस्न स्यात्॥ एभिः॥ अस्मै॥ एभ्यः॥ अस्मात्। अस्य। अनयोः। एषां। अस्मिन्। अनयोः॥ एषु॥ ॥द्वितीयाटौस्वेनः॥ इदमेतदोरन्वादेशे॥ किंचित्कार्यंविधातुमुपात्तस्यकार्यांतरंविधातुंपुन रुपादानमन्वादेशः॥ यथाऽनेनव्याकरणमधीतमेनंछंदोध्यापयेति॥ अनयोःपवित्रं कुलमेनयोःप्रभूतंस्वमिति॥ एनं। एनौ। एनान्। एनेन। एनयोः॥ २॥ राजा॥ नङिसंबुद्ध्योः॥ नस्यलोपोनङौसंबुद्धौच॥ हेराजन्॥ ङावुत्तरपदेप्रतिषेधः॥ सुपोधातुप्रातिपदिकयोः॥ एतयोरवयवस्यसुपोलुक्॥ ब्रह्मनिष्ठः॥ राजानौ। राजानः॥ राजानं। राजानौ। राज्ञः॥ जेज्ञोर्ज्ञः॥ नलोपः सुप्स्वरसंज्ञातुग्विधिषुकृति॥ सुबिधौस्वरविधौसंज्ञाविधौकृतितुग्विधौचनलोपोऽसिद्धोनान्यत्र॥ राजाभ्यामित्यादौ। इत्यसिद्धत्वादात्वमेत्वमैत्वंचन॥ राजभ्यां॥ राजभिः॥ राजभ्यः

राज्ञि। राजनि। यज्वा। यज्वानौ। यज्वानः॥ न संयोगाद्वमंतात्॥ वमांतसंयोगादनोकारस्य लो
पो न। यज्वनः। यज्वना। यज्वभ्यां॥ ब्रह्मणः। ब्रह्मणा॥ इन्हन्पूषार्यम्णां शौ॥ एषां शावेवोप
धादीर्घः॥ सौ च॥ इन्नादीनामुपधाया दीर्घोऽसंबुद्धौ सौ॥ वृत्रहा। वृत्रहन्॥ एकाजुत्तरपदे
णः॥ एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकांतनुम्वि
भक्तिस्थस्य नस्य णत्वं स्यात्॥ वृत्रहणौ॥ वृत्रहणः॥ हो हंतेर्ञ्णिन्नेषु॥ ञिति णिति प्रत्य
ये नेच परे हंतेर्हस्य कुत्वं स्यात्॥ हंतेः॥ उपसर्गस्थान्निमित्तात्परस्य हंतेर्नस्य णत्वं स्यात्।
प्रहण्यात्॥ अत्पूर्वस्य॥ हंतेरत्पूर्वस्यैव नस्य णो नान्यस्य॥ प्रघ्नंति॥ योगविभागसामर्थ्याद
नंतरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायं बाधित्वा कुमतिं चेति णोऽपि निवर्तते॥ वृत्रघ्न
इत्यादि॥ एवं शार्ङ्गिन्। यशस्विन्। अर्यमन्। पूषन्। प्रभृतयः॥ मघवा बहुलं॥ मघवन्श
ब्दस्य वा तृ इत्यंतादेशः॥ ऋ इत्॥ उगिदचां सर्वनामस्थानेऽधातोः॥ अधातोरुगितो नलो
पिनोंचते श्च नुम्स्यात्सर्वनामस्थाने॥ मघवान्॥ उपधादीर्घे कर्तव्ये संयोगांतलोपः सि

इत्वंनभवतिबहुलग्रहणात्॥मघवंतं॥मघवंतौ॥मघवद्भ्यां॥हल्त्वाभावेसुटिराजव
त्॥मघुवमघोनामतद्धिते॥अन्नंतानांभानामेषामतद्धितेसंप्रसारणंस्यात्॥म
घोनः॥मघवभ्यां॥एवंश्वन्युवन्प्रभृतयः॥नसंप्रसारणेसंप्रसारणं॥अतएव
ज्ञापकात्पूर्वंवस्यैवसंप्रसारणंस्यात्॥शुनः॥युवभ्यांनित्यादि॥अर्वा॥हेअर्व
न्॥अर्वणस्त्रसावनञः॥नञारहितस्यार्वन्नित्यस्यतृइत्यंतादेशोनतुसौ
अर्वंतौ॥अर्वंतः॥अर्वद्भ्यां॥पथिमथ्यृभुक्षामात्सौ॥इतोत्सर्वनामस्थाने।
पथ्यादेः॥थोन्थः॥पथिमथोस्थस्यन्थादेशःस्यात्सर्वनामस्थाने॥पं
थाः॥पन्थानौ॥पन्थानः॥भस्यटेर्लोपः॥भस्यपथ्यादेष्टेर्लोपः॥पथः॥प
था॥पथिभ्यां॥पथिभ्यः॥एवंमंथाः॥ऋभुक्षाः॥ष्णांताषट्॥षांतानांता
संख्याषट्संज्ञास्यात्॥षड्भ्योलुक्॥जश्शसोः॥पंच॥पंच॥पंचभिः॥

पंचभ्यः ।२। षट्चतुर्भ्यश्चेति नुट् ॥ नोपधायाः ॥ नांतस्योपधाया दीर्घो नामि नको
पः ॥ पंचानां । पंचसु ॥ अष्टन आ विभक्तौ ॥ हलादौ वा स्यात् ॥ अष्टाभ्य औश् ॥
कृताकारादष्टनो जश्शसोरौश् ॥ अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसो विं
षये आत्वं ज्ञापयति ॥ अष्टौ ।२। अष्टाभिः । अष्टाभ्यः ।२। अष्टासु ॥ आत्वाभावे
अष्टपंचवत् ॥ ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च ॥ एभ्यः क्विन्
अंचेः सुप्युपपदे क्विन् । युजिक्रुंचोः केवलयोः क्रुंचेर्नलोपाभावश्च निपा
त्यते । कनावितौ ॥ कृदतिङ् ॥ अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्सं
ज्ञकः स्यात् ॥ वेरपृक्तस्य ॥ लोपः ॥ क्विन्प्रत्ययस्य कुः ॥ क्विन्प्रत्ययो यस्मा
त्क्रियते तस्य कवर्गोंतादेशः स्यात्पदांते ॥ ऋत्विक् । ऋत्विजौ । ऋत्विजः ॥
ऋत्विग्भ्यां ॥ युजेरसमासे ॥ नुम् स्यात्सर्वनामस्थाने । सुलोपः ॥ संयोगां

तस्य लोपः ॥ नस्य कुत्वेन ङः ॥ युङ् ॥ [illegible] ॥ युञ्जौ । युञ्जः ॥ युग्भ्यां । चोः कुः ॥ चवर्ग
स्य कवर्गादेशः स्यात् झलि पदांते च ॥ सुयुक् । सुयुजौ । सुयुजः । सुयुग्भ्यां । खन् । ख
ञ्जौ । खञ्जः । खन्भ्यां । व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः ॥ झलि पदांते
च ॥ जश्त्वचर्त्वे ॥ राट् । राड् । राजौ । राजः । राड्भ्यां । एवं विभ्राट् । देवेट् । विश्वसृट्
परिमृट् । परौ व्रजेः षः पदांते ॥ परावुपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदांते तु षत्व
मपि ॥ परित्यज्य सर्वं व्रजतीति परिव्राट् । परिव्राजौ । विश्वस्य वसुराटोः ॥ विश्व
स्य दीर्घो वसौ राटि च परे ॥ विश्वाराट् । विश्वाराजौ । विश्वाराड्भ्यां ॥ स्कोः संयोगा
द्योरंते च ॥ पदांते झलि च यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात् ॥ भृट्
स्य स्थाने लेन शः ॥ झलां जश् झशि ॥ इति शस्य जः ॥ भृज्जौ । भृज्जः । भृड्भ्यां ॥
त्यदाद्यत्वं ॥ पररूपत्वं ॥ तदोः सः सावनंत्ययोः ॥ त्यदादीनां तदयोरनंत्ययोः
सः स्यात्सौ ॥ स्यः ॥ त्यौ । त्ये । सः । तौ । ते । यः । यौ । ये । एषः । एतौ । एते । एतं । एतौ

२९ एतान्॥ एनं। एनौ। एनान्॥ एतेन। एतयोः॥ एनेन। एनयोः॥ ङे प्रथमयोरम्॥ युष्मद
स्मद्भ्यांपरयोर्ङेप्रथमाद्वितीययोश्चामादेशः॥ त्वाहौसौ॥ अनयोर्मपर्यंतस्य। शेषेलोपः।
एतयोष्टिलोपः॥ त्वं। अहं। युवावौद्विवचने॥ द्वयोरुक्तावनयोर्मपर्यंतस्ययुवावौस्तो वि
भक्तौ॥ प्रथमायाश्चद्विवचनेभाषायां॥ ओङ्येतयोरात्वंलोके॥ युवां। आवां। यूयवयौ
जसि॥ अनयोर्मपर्यंतस्य॥ यूयं। वयं। त्वमावेकवचने॥ एकस्योक्तावनयोर्मपर्यंतस्यत्व
मौस्तो विभक्तौ॥ द्वितीयायांच॥ अनयोरात्स्यात्॥ त्वां। मां॥ शसोन॥ अनयोः
शसोनस्याद्द्मोपवादः॥ आदेःपरस्य। संयोगांतस्यलोपः॥ युष्मान्॥ अस्मा
न्॥ योचि॥ अनयोर्यदिशोनादेशोजादौविभक्तौ॥ त्वया। मया। युष्मदस्मदोर
नादेशे॥ अनयोरात्स्यादनादेशेहलादौविभक्तौ॥ युवाभ्यां॥ आवाभ्यां॥
युष्माभिः॥ अस्माभिः॥ तुभ्यमह्योर्ङयि॥ अनयोर्मपर्यंतस्य॥ टिलोपः॥
तुभ्यं। मह्यं॥ भ्यसोभ्यम्॥ आमाँपरस्य॥ युष्मभ्यं॥ अस्मभ्यं॥ एकवच

नस्य च ॥ भ्यां ङसेरत् ॥ त्वत् ॥ मत् ॥ पंचम्या अत् ॥ भ्याभ्यां पंचम्या भ्य
सोऽत स्यान् ॥ युष्मत् ॥ अस्मत् ॥ तव मम ङसि ॥ अनयोर्मपर्यंतस्य ।
युष्मदस्मद्भ्यां ङसोऽश् ॥ तव । मम । युवयोः । आवयोः ॥ साम आकं ॥ आभ्यां
परस्य साम आकं स्यात् ॥ युष्माकं । अस्माकं ॥ त्वयि मयि युष्मासु । अस्मा
सु ॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ॥ पदात्परयोरपादादौ
स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तः ॥ बहुवचनस्य वस्
नसौ ॥ उक्तविधयोरनयोः षष्ठ्यादिबहुवचनांतयोर्वस्नसौ स्तः ॥ तेम
यावेकवचनस्य ॥ उक्तविधयोरनयोः ~~द्विती~~ ~~येकवच~~ षष्ठीचतुर्थ्येकवच
नांतयोस्तेमे एतौ स्तः ॥ त्वामौ द्वितीयायाः ॥ उक्तविधयोरनयोर्द्वितीयैक
वचनांतयोस्त्वामा एतौ स्तः ॥ श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः ॥ स्वा
मी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥ सुखं वां नौ ददात्वीशः पतिर्वामपि

नौ हरिः ॥

तव मम युवाम् आवाम् युवाभ्याम् आवाभ्याम् युवयोः आवयोः

३० युष्मान् अस्मान् युष्मभ्यं अस्मभ्यं युष्माकं अस्माकं

सोव्याद्धोनः शिवंवोनोदद्यात्सेव्योत्रवःसनः ॥२॥ एकवाक्येयुष्मदस्मदादेशावक्तव्याः ॥ एकतिङ्वाक्यं ॥ तेनेहन ॥ ओदनंपच तवभविष्यति ॥ एतेवान्नौ आदयः आदेशा अन्वादेशेवावक्तव्याः ॥ अन्वादेशेतु नित्यंस्युः ॥ धातातेभक्तोस्ति तवभक्तोस्तीतिवा ॥ तस्मैतेनमइत्येव ॥ नचवाहाहैवयुक्ते ॥ चादिपंचकयोगेनैते आदेशाः स्युः ॥ हरिस्त्वांमांचरक्षतु ॥ कथंत्वांमांवानरक्षेदित्यादि ॥ पश्यार्थैश्चानालोचने ॥ अचाक्षुषज्ञानार्थैर्धातुभिर्योगेनैते आदेशाः स्युः ॥ चेतसात्वांमांसमीक्षते ॥ आलोचनेतु भक्तस्त्वांप्रश्यतिचक्षुषा ॥ सपूर्वायाः प्रथमायाविभाषा ॥ विद्यमानपूर्वात्प्रथमांतादन्वादेशेप्यादेशावास्युः ॥ भक्तस्त्वमप्यहंतेनहरिस्त्वांत्रायतेसमां ॥ त्वामेतिवा ॥ सामंत्रितं ॥ संबोधनेयाप्रथमातदंतमामंत्रितसंज्ञंस्यात् ॥ आमंत्रितंपूर्वमविद्यमानवत् ॥ अग्नेतव ॥ देवास्मान्पा

हि॥ नामंचितेसमानाधिकरणेसामान्यवचनं॥ विशेष्यंसमानाधिकरणेञ्चार
मंचितेपरेनाविद्यमानवत्॥ हरेदयालोनःपाहि॥ सुपात्॥ सुपादौ॥ पादःपत्॥
पाच्छब्दांतंयदंगंभंतदवयवस्यपाच्छब्दस्यपदादेशः॥ सुपदः॥ सुपदा॥ सुपाद्भ्यां॥ अग्निमत्
अग्निमद्॥ अग्निमथौ॥ अग्निमथः॥ अग्निमद्भ्यां॥ अनिदितांहलउपधायाःक्ङिति॥
हलंतानामनिदितामंगानाउपधायानस्यलोपःस्यात्किति ङिति॥ तुम्॥ संयोगांतस्यलो
पः॥ नस्यकुलेनङः॥ प्राङ्॥ प्राञ्चौ॥ प्राञ्चः॥ अचः॥ लुप्तनकारस्यांचतेर्भस्याकारस्यलो
पः॥ चौ॥ लुप्ताकारनकारेंचतौपरेपूर्वस्याणोदीर्घः॥ प्राचः॥ प्राग्भ्यां॥ प्रत्यङ्॥ प्रत्यञ्चौ
प्रतीचः॥ प्रत्यग्भ्यां॥ उदङ्॥ उदञ्चौ॥ उदईत्॥ उच्छब्दात्परस्यलुप्तनकारस्यांच
तेर्भस्याकारस्यईत्॥ उदीचः॥ उदग्भ्यां॥ समः समि॥ वप्रत्यये तेंचतौपरे॥ सम्य
ङ्॥ सम्यञ्चौ॥ समीचः॥ सम्यग्भ्यां॥ सहस्यसध्रिः॥ तथा॥ सध्र्यङ्॥ तिरसस्तिर्यलोपे

म॰१

३१ ॥ अत्तुषाकारे च तो वप्रत्यये अंते तिरसस्तिर्यादेशः ॥ तिर्यङ् ॥ तिर्यंचौ ॥ तिरश्चः ॥ तिरश्चा ॥ तिर्यग्भ्यां ॥ नांचेः पूजायां ॥ पूजार्थस्यांचतेरुपधाया नस्य लोपो न ॥ प्राङ् ॥ प्रांचौ ॥ प्रांचः ॥ नलोपाभावादलोपो न ॥ प्राचः ॥ प्राङ्भ्यां ॥ प्राङ्क्षु ॥ एवं पूजार्थे प्रत्यङ्ङादयः ॥ क्रुङ् ॥ क्रुंचौ ॥ क्रुंचः ॥ क्रुङ्भ्यां ॥ पयोमुक् ॥ पयोमुचौ ॥ पयोमुचः ॥ पयोमुग्भ्यां ॥ मह पूजायां ॥ वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च ॥ एते निपात्यंते ॥ शतृवच्चैषां कार्यं स्यात् ॥ उगित्वान्नुम् ॥ सांतमहतः संयोगस्य ॥ सांतसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने ॥ महान् ॥ महांतौ ॥ महांतः ॥ हे महन् ॥ महतः ॥ महद्भ्यां ॥ अत्वसंतस्य चाधातोः ॥ अत्वंतस्योपधाया दीर्घो धातुभिन्नासंतस्य चासंबुद्धौ सौ ॥ धीमान् धीमंतौ ॥ धीमंतः ॥ शसादौ महद्वत् ॥ भातेर्डवतुः ॥ डित्वसामर्थ्यादभस्यापि टेर्लोपः

भवान् ॥ भवंतौ ॥ शासंतस्मत्तुभवन् । उभेभ्यस्तं ॥ षाष्ठद्वित्वप्रकरणेयेद्वेवि
हितेउभेसमुदिते अभ्यस्तसंज्ञेस्तः ॥ नाभ्यस्ताच्छतुः ॥ अभ्यस्ताच्छतुर्नुम्न ।
ददत् । ददतौ ॥ जक्षित्यादयः षट् ॥ षड्धातवोन्येजक्षितिश्चसप्तमएतेभ्य
स्तसंज्ञाः स्युः ॥ जक्षत् । जक्षतौ । जक्षतः ॥ एवंजाग्रत् दरिद्रत् ॥ शासत् ॥
चकासत् ॥ दीधीङ् दीप्तिदेवनयोः ॥ वेवीङ् वेतनातुल्ये ॥ एतौछंद
सौनिपात्येते । दीध्यत् । वेव्यत् ॥ जक्षिजागृदरिद्राशासुदीधीङ्वेवी
ङ् चकास्तथा ॥ अभ्यस्तसंज्ञाविज्ञेयाधातवोमुनिभाषिताः ॥ गुपू ॥ गुपौ ।
गुपः ॥ गुभ्यां ॥ त्यदादिषुदृशोनालोचनेकञ्च ॥ त्यदादिषूपपदेषु अज्ञा
नार्थाद्दृशोधातोः कञ्स्याच्चात्क्विन् ॥ आसर्वनाम्नः ॥ इग्दृशवतुषु ।

४१ कुत्वस्यासिद्धत्वाद्व्रश्चेति षः।तस्य जश्त्वेन डः।कुत्वेन गः।चर्त्वेन पक्षे कः।१४

३२ ताहक्।।ताहशौ।ताहशः।ताहग्भ्यां।व्रश्चेति षः।।जश्त्वचर्त्वे।विट्।विशौ।विशः
विड्भ्यां।।नशेर्वा।।नशेः कवर्गोतादेशो वा पदांते।।नक्।नट्।नशौ।नशः।न
ग्भ्यां।।नड्भ्यां।।३४ स्पृशोनुदके क्विन्।।अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्।।घृतस्पृ
क्।घृतस्पृशौ।घृतस्पृशः।घृतस्पृग्भ्यां।दधृक्।दधृषौ।दधृषः।द
धृग्भ्यां।रत्नमुट्।रत्नमुषौ।रत्नमुषः।रत्नमुड्भ्यां।षट्।षड्।षड्भिः।षड्भ्यः
षण्णां।षट्सु।।यत्तु प्राचा षड्भिरित्युदाहृतं तत्प्रामादिकमेव प्रत्ययेनित्यवचनात्।।वो
रुपधाया दीर्घ इकः।।रेफवांतस्य धातोरुपधाया इको दीर्घः पदांते।।पिपठीः।पिपठि
षौ।पिपठिषः।पिपठीर्भ्यां।।नुम्विसर्जनीयशर्व्यवायेपि।।एतैः प्रत्येकं व्यवधानेपि
इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः।।पिपठीष्षु।पिपठीःषु।चिकीः।चिकीर्षौ।चिकी
र्षः।चिकीर्भ्यां।चिकीर्षु।विद्वान्।विद्वांसौ।हे विद्वन्।वसोः संप्रसारणं।।वस्वंतस्य भस्य

संप्रसारणंस्यात्॥ विदुषः। वसुस्त्वंस्वितिदत्वं। विद्भ्यां। पुंसोसुङ्। सर्वनामस्थाने पु
मान्। हे पुमन्। पुमांसौ। पुमांसः। पुंसः। पुंसा। पुंभ्यां। पुंसु। ऋदुशनेत्यनङ्। उशना
उशनसौ। उशनसः। अस्यसंबुद्धौवानङ् नलोपश्चवावक्तव्यः। हे उशन। हे उशन
न्। हे उशनः। उशनोभ्यां। अनेहाः। अनेहसौ। अनेहसः। हे अनेहः। वेधाः। वे
धसौ। वेधसः। वेधोभ्यां। अदस औ सुलोपश्च। अदस औस्यात्सुलोपश्च। त
दोरितिसः। असौ। औत्वप्रतिषेधःसाकच्कस्यवावक्तव्यः सादुत्वंच। असुकः। अ
सुकौ। त्यदाद्यत्वं। पररूपत्वं। वृद्धिः। अदसोसेर्दादुदोमः। अदसोसांतस्यदात्पर
स्य उदूतौ सोदस्यमश्च। आंतरतम्याद्ध्रस्वस्य उं दीर्घस्य ऊः। अमू। जसःशी।
गुणः। एतईद्बहुवचने। अदसोदात्परस्यैत ईद्दस्यचमो बह्वर्थोक्तौ। अमी॥
पूर्वत्रासिद्धमिति विभक्तिकार्यंप्राक्पश्चादुत्वमुत्वे। अमुं। अमू। अमून्। मुत्वे

सवेगलिकिशानांसहैवप्र हृतिः स हैवातिप रोः॥

33

हते ऽधि संज्ञायां नाभावः ॥ न मुने ॥ नाभावे कर्तव्ये मुभावो नासिद्धः ॥ अमुना ॥ अमूभ्यां ।
अमीभिः ॥ अमुष्मै । अमूभ्यां ॥ अमीभ्यः ॥ अमुष्मात् ॥ अमुष्य । अमुयोः ॥
अमीषां ॥ अमुष्मिन् ॥ अमीषु ॥ इति हलंताः पुंल्लिंगाः ॥ नहो धः ॥ झलि पदां
ते च ॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ क्विवंते षु पूर्वस्य दीर्घः ॥ उपा
नत् । उपानहौ ॥ उपानहः । उपानद्भ्यां । उपानत्सु ॥ क्विन्नंतत्वात्कुत्वेन घः ॥ उ
ष्णिक् । उष्णिहौ ॥ उष्णिहः ॥ उष्णिग्भ्यां । द्यौः ॥ दिवौ । दिवः । द्युभ्यां । गीः । गिरौ । गिरः ।
एवं पूः । चतस्रः ॥ २ । चतसृभिः । चतसृभ्यः २ । चतसृणां । चतसृषु । का । के । काः । सर्वा ।
यः सो ॥ इदमो दस्य । इयं । त्यदाद्यत्वं । टाप् । दश्चेति मः । इमे । इमाः । इमां । इमे ।
इमाः । अनया । हलि लोपः । आभ्यां । आभिः । अस्यै । अस्याः २ । अनयोः । आसां ।
अस्यां । आसु । स्रक् । स्रजौ । स्रजः । स्रग्भ्यां । त्यदाद्यत्वं । टाप् । स्या । ते । त्याः । एवं
तद् ।

यद्। एतद्। वाक्। वाचौ। वाचः। वाग्भ्यां। अप्शब्दो नित्यं बहुवचनांतः। अप्तृन्निति दीर्घः।
आपः। अपः। अपो भि। अप स्तकारो भादौ प्रत्यये॥ अद्भिः। अद्भ्यः। अपां। अप्सु दि
क्। दिशौ। दिशः। दिग्भ्यां। त्यदादिषु इति दृशेः क्विन् विधानादन्यत्रापि कुत्वं। दृक्। दृशौ।
दृशः। दृग्भ्यां। त्विट्। त्विषौ। त्विषः। त्विड्भ्यां। ससजुषोरिति रुत्वं। सजूः। सजुषौ।
सजुषः। सजूर्भ्यां। आशीः। आशिषौ। आशिषः। आशीर्भ्यां। असौ। उत्वमुत्वे।
अमू। अमूः। अमूम्। अमूभ्यां। अमूभिः। अमुष्यै। अमूभ्यां। अमूभ्यः। अमुष्याः।
अमुयोः। अमूषां। अमुष्यां। अमूषु॥ ॥ इति हलंताः स्त्रीलिंगाः॥ स्व
मोर्लुक्॥ दत्वं॥ स्वनडुत्। स्वनडुही। चतुरनडुहोरित्याम्। स्वनड्वांहि॥ पुन
स्तद्वत्॥ शेषं पुंवत्॥ वाः। वारी। वारि। वारा। वार्भ्यां। चत्वारि॥ किं। के। कानि
इदं। इमे। इमानि॥ अन्वादेशे नपुंसके एनद्वक्तव्यः। एनत्। एने। एनानि।
पुनस्तद्वत्। एनेन। एनयोः। ब्रह्म। संबुद्धौ नपुंसकानां नलोपो वा वाच्यः। हे ब्रह्म।

x७ पुनरपि ददत् ददती ददति ७x

हे ब्रह्मन्॥ ब्रह्मणी॥ ब्रह्माणि॥ रोः सुपि॥ अहः॥ विभाषा ङिश्योः॥ अह्नी। अहनी। अहानि। अहन्।
अहन्नित्यस्य रुः पदांते। अहोभ्यां। दंडि। दंडिनी। दंडीनि। सुपथि। टिलोपः। सुपथी। सुपंथानि॥
ऊर्क्। ऊर्जी। ऊर्जि। नरजानां संयोगः॥ तत्। ते। तानि। यत्। ये। यानि। एतत्। एते। एतानि। गवाक्। गोची।
गवाञ्चि। पुनस्तद्वत्। गोचा। गवाग्भ्यां॥ गवाक्शब्दस्य रूपाणि क्लीबे चगतिभेदतः॥ असंध्यवङ्पूर्व
रूपैर्नवाधिकशतं मतं॥ स्वम्सुप्सु नव षड्भादौ षट्के स्युस्त्रीणि जस्शसोः॥ चत्वारि शेषे दश के रू
पाणीति विभावय॥ २॥ शकृत्। शकृती। शकृद्भ्यां। ददत्। ददती। वा नपुंसकस्य। अभ्यस्तात्परो
यः शतुरवयवस्तदंतस्य क्लीबस्य नुम्वा सर्वनामस्थाने॥ ददंति। ददति। ददत्। तुदत्। आच्छीन
द्योर्नुम्। अवर्णांतात्परो यः शतुरवयवस्तदंतस्य नुम्वा शीनद्योः। तुदंती। तुदती। भात्। भांती
भाती। भांती। पचत्। शप्श्यनोर्नित्यं। शप्श्यनोरात्परो यः शतुरवयवस्तदंतस्य नित्यं नुम् शी
नद्योः॥ पचंती। दीव्यत्। दीव्यंती। धनुः। धनुषी। सांतेति दीर्घः। नुम्विसर्जनीयेति षः॥ धनूंषि
धनुषा। धनुर्भ्यां। एवं चक्षुर्हविरादयः॥ पयः। पयसी। पयांसि। पयसा। पयोभ्यां। सुपुम्। सुपुंसी

सुपुमांसि॥ अहः। विभक्तिकार्यं॥ उत्वमुत्वे॥ अमू। अमूनि। शेषं पुंवत्॥ ॥इति हलंताः
नपुंसकलिंगाः॥ स्वरादिनिपातमव्ययं [illegible]॥ स्वर्। अंतर्। प्रातर्। पुनर्। सनुतर्।
उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्॥
दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्। जोषं। तूष्णीं। बहिस्। अवस्। समया। निकषा।
स्वयं। वृथा। नक्तं। नञ्। हेतौ। इद्धा। अद्धा। सामिवत्। ब्राह्मणवत्। क्षत्रियवत्। सना।
उपधा। सनत्। सनात्। तिरस्। अंतरा। अंतरेण। ज्योक्। कम्। शम्। सहसा। विना।
नाना। स्वस्ति। स्वधा। अलं। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु॥
क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहु
स्। प्रबाहुकं। प्रवाहिका। आर्यहलं। अभीक्ष्णं। साकं। सार्द्धं। नमस्। हिरुक्। धिक्।
अथ। अम्। आम्। प्रताम्। प्रशान्। मा। माङ्॥ आकृतिगणोऽयं। च। वा। ह। अह।

३५ एव।एवं।नूनं।शश्वत।युगपत।भूयस्।कूपत्।सूपत्।नित्।चेत्।चण।यत्र।कच्चित्।नह।
हंत।मा।कि॑।नकि।आकिं।माङ्।नञ्।यावत।तावत।त्वै।द्वै।रै।श्रौषट्।वौषट्।स्वा
हा।स्वधा।वषट्।तुम्।तथाहि।खलु।किल।अथ।सुष्ठु।स्म।आदह।उपसर्गवि
भक्तिस्वरप्रतिरूपकाश्च।अव दत्तं।अहंयुः।अस्ति क्षीरा।अ।आ।इ।ई।उ।ऊ।
ए।ऐ।ओ।औ।पशु।शुकं।यथा।कथा च।पाट्।प्याट्।अंग।है।हे।भोः।अये।द्य।
विषु।एकपदे।युत्।आतः।चादिरप्याकृतिगणः॥ तद्धितश्चासर्वविभक्तिः॥ यस्मात्स
र्वविभक्तयो नोत्पद्यंते स तद्धितांतोप्यव्ययसंज्ञः स्यात्।परिगणनं कर्तव्यं।तसिलादयः
॥प्राक्पाशपः।शसप्रभृतयः प्राक्समासांतेभ्यः।अम्।आम्।कृत्वोर्थाः।तसिवती॥
नानाञौ।एतदंतमप्यव्ययं।अतइत्यादि।कृन्मेजंतः।कृद्यो मांत एजंतश्च अव्य
यं स्यात्।स्मारं।स्मारं।जीवसे।पिबध्यै।क्त्वातोसुन्कसुनः।एतदंतमप्यव्ययं।कृत्वा।

सोषिवत। असीषहत। स्वापेश्चाङि। एपं तस्य स्वापेश्च ङि संप्रसारणं। असूषुपत। हन्तो
र्चिणलोः। चिणल्वर्जे ञिति णिति हनस्तः। घातयति। अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातांपुक्
णौ। स्थापयति। तिष्ठतेरित्। उपधाया इङ् परे णौ। अतिष्ठिपत्। घ्रापयति। जिघ्रते
र्वा। उपधाया ह्रस्वं वा चङ् परे णौ। अजिघ्रिपत्। अजिघ्रपत्। शाच्छासाह्वाव्यावेपां युक्
णौ। शापयति। अशीशपत्। ह्वाययति। ह्वः संप्रसारणं। सन्परे चङ् परे च णौ। ह्वायादी
नां च। चङ् परे णौ उपधाया ह्रस्वो वा। एपं ताः। कनरणभणश्रणलुपहेठः षट् भाषो। ह्व
यिवा णिलोटि लोपयस्य स्वारो धिश्राभ्यासे। वा णिलोटि अपच्च। इत्वं काण्यादयो द्वाद
श। अजूहवत्। अजुहावत्। पाययति। लोपः पिबतेरीच्चाभ्यासस्य। पिबतेरुपधा
यालोपः स्यादभ्यासस्य ईदंतादेशश्च ङ् परे णौ। अपीप्यत्। पातेर्णौ लुक् वक्तव्यः
पुगोपवादः। पालयति। वो विधूनने। जुक् णौ। वाजयति। विधूनने किं। केशान्वापयति।

74
75

रुदिरगतौत॥णौ॥शातयति॥गतौतुगाःशादयति।गोविंदः।गमयतीत्यर्थः॥रुहपोन्यतरस्यां।रोपयति।
रोहयति।गुहसंवरणे।ऊदुपधायागोहः॥गूहयति।अजूगुहत्।दोषोणौ।दुष्यतेरुपधाया
ऊतस्याणौ॥वाचित्तविरागे।विरागअप्रीतता।चित्तंदूषयति।दोषयतिवाकामः।उभौसाभ्यास
स्य।साभ्यासस्यानितेःउभौनकारौणत्वंप्राप्नुतोनिमित्तेसति।प्राणिणत्।णौगमिरबोधने॥इणः
गमयति।वोधनेतुप्रत्यायपयति।घटचेष्टायां।घटादयोमितः॥जनीजृष्क्नसुरंजोमंताश्च।मितः॥ज्वल
ह्वलह्मलनमोउपसर्गाद्वा॥ग्लास्नावनुवमांच।अनुपसर्गादेषांमित्त्वंवा॥नकम्यमिच
मां।अमंतत्वात्शमंमित्त्वंन॥यमोपरिवेषणे॥मित्वंन।स्खदिरवपरिभ्यांच।मित्त्व॥मितांह्रस्वः॥
घटादीनांज्ञपादीनांचणौउपधायाह्रस्वः।घटयति।ज्ञपज्ञाने।ज्ञापनेच।ज्ञपयति।अजीघटत्
अजिज्ञपत्।रभेरशमिटोः॥नुमचि।लभेश्च।अररंभत्।अललंभत्।ईर्ष्यति।ईर्ष्यतेस्तृती
यस्येतिवक्तव्यं।तृतीयव्यंजनस्यतृतीयेणाचइतिवार्थः।आद्येषस्यद्वित्वंवारयितुमिदं।द्वितीये

तु अजादेर्द्वितीयस्येत्यस्यापवादतया सनंते प्रवर्त्तते॥ ऐर्ष्यियिषत। ऐर्षिष्यत। द्वितीयव्याख्या
यां णिजंताच्चङि चङ्परनाभ्यासेऽर्प्यायेत॥ हलादिः शेषात्॥ द्विवंतु द्वितीयस्यैव॥ तृतीया
भावेन प्रकृतिवार्त्तिका प्रवृत्तेः॥ ॥इति णिजंताः॥ धातोः कर्मणः समानकर्तृकादिच्छायांवा।
इषिकर्मणो धातोरिषिणैककर्तृकात् सन् वेच्छायां। पटुव्यक्तायांवाचि। इट्। सन्यङोः॥ स
नंतस्य यङंतस्य च प्रथमस्यैकाचो द्वेस्तोजादेस्तु द्वितीयस्य॥ सन्यतः॥ अभ्यासस्यातइ
त्स्यात्॥ इत्सनि। पठितुमिच्छति पिपठिषति। कर्मणः किं। गमनेच्छति। समानकर्तृका
त् किं॥ शिष्याः पठन्त्वितीच्छति गुरुः। वाग्रहणाद्वाक्यमपि॥ शेषिकान्मतुवर्थीया
च्छेषिको मतुवर्थिकः॥ स्वरूपप्रत्ययो नेष्टः सनंतान्न सनिष्यते॥१॥ तेन पि
पठिषितुमिच्छतीति वाक्यमेव। लुङ्सनोर्घस्लृ॥ सस्यार्द्धधातुके॥ सस्यतः स्या
त्सादावार्धधातुके। जघत्सुमिच्छति जिघत्सति। एकाच इति नेट्॥ अज्झनगमां
सनि॥ अजंतानां हंतेरजादेशगमेश्च दीर्घो झलादौ सनि॥ इको झल्॥ इगंतात् झला

दिः सन्नकित्॥ कर्तुमिच्छति चिकीर्षति। जिघांसति। सनि च। इङो गमिर्न त्वबोधने। जिगमिषति। बोधने तु प्र
तीषिषति। इङश्च। गमिः सनि। अधिजिगांसते। रुद विद मुष ग्रहि स्वपि प्रच्छः संश्च। एभ्यः संश्च क्त्वा च
कितौ स्तः। रुरुदिषति। विविदिषति। मुमुषिषति। सनि ग्रहगुहोश्च। ग्रहेर्गुहेरुगन्ताच्च सन इण्न। जि
घृक्षति॥ हलन्ताच्च। इक्समीपाद्धलः परो झलादिः सन् कित् स्यात्। गुहू संवरणे। जुघुक्षति। सुबु
क्षति। किरश्च पंचभ्यः॥ कृगॄ दृङ् धृङ् प्रछिभ्यः सन इट् स्यात्। पिपृच्छिषति। चिकरिषति। अ
त्रेटो दीर्घो नेष्टः। पूर्ववत्सनः। सनः पूर्वो यो धातुस्तेन तुल्यं सनन्तादप्यात्मनेपदं स्यात्। दिद
रिषते। दिधरिषते। बुभूषति। सनीवन्तर्धभ्रस्जदंभुश्रिस्वृयूर्णुभरज्ञपिसनां। इवन्तेभ्यः ऋ
दादिभ्यश्च सन इड् वा। छ्वोः शूडनुनासिके च। सतुक्स्य छस्य वस्य च क्रमात् श ऊठ् एतावादेशौ
स्तोऽनुनासिके क्वौ झलादौ क्ङिति च यथा र। दिवं। दुद्यूषति। दिदेविषति। स्तौतिण्योरेव षण्यभ्या
सात्। अभ्यासेणः परस्य स्तौतिण्योरेव षः तयोरेव सस्य षः षण्भूते सनि नान्यस्य। तुष्टूषति। सि
षाधयिषति। स्तौतिण्योः किं। सुस्यूषति। सिषेविषति। आप्ज्ञप्यृधामीत्॥ एषामच ईत् स्या

सादेसनि। अत्र लोपोभ्यासस्य। सनिमीमेत्यारभ्य यङ्कंत त्राभ्यासलोपः। आमुमिचति ईप्स
ति। अर्दिधुमिघ्यतिईर्त्सति। अदिधिषति। बिभ्रजिषति। बिभर्जिषति। बिभ्रक्षति। बिभर्क्षति
दंभइच्च। दंभेरच इत्स्यादीच सादेसनि। हलंतादित्येत्र हलंग्रहणं जातिपरं। तेन सनः कित्वा
लोपं। धिप्सति। धीप्सति। दिदंभिषति।। श्रिश्रीषति। शिश्रयिषति। युयूषति।। सिस्व
रिषति। युयूषति। यियविषति। ऊर्णुनूषति। ऊर्णुनुविषति। ऊर्णुनविषति। बुभूर्ष
ति। बिभरिषति। झीप्सति। जिज्ञपयिषति। जनसनेत्यात्वं। सिषासति। सिसनिष
ति। आशंकायां सन्वक्तव्यः। श्वामुमूर्षति। तनिपरिद्रातिभ्यः सनो वेड्वाच्यः।
तनोतेर्विभाषा। उपधाया दीर्घो वा। झलादेसनि। तितांसति। तितंसति। तितनि
षति। कूलं पिपतिषति। सनिमीमाघुरभलभशकपतपदामच इस्। सादेसनि।।
अभ्यासलोपः। सलोपः। पित्सति। दिदरिद्रिषति। दिदरिद्रासति। मुचोकर्मकस्य

७१ गुणोवासादेसनि॥ अभ्यासलोपः॥ मोक्षते। मुमुक्षतेवावत्सः। स्वयमेव। अकर्मकस्यकिं॥
मुमुक्षतिवत्सं कृष्णः॥ इट् सनिवा। इङ् ऋभ्यामृदंताच्च सनइड्वा॥ विवरिषते। विवरीषते
वुवूर्षते। विवरिषति। विवरीषति। वुवूर्षति। तितरिषति। तितरीषति। तितीर्षति। स्मि
पूङ् रंज्वशासनि। स्मिपूङ् ऋ अंजू अशएभ्यः सनइट्॥ सिस्मयिषते। पिपविषते।
अरिरिषति। अंजिजिषति। अशिशिषते। गुपगोपने। तिजनिशाने। कितनिवा
सेरोगापनयनेच॥ मानपूजायां। वधबंधने। दानखंडने। शानतेजने। गुपति
जकिद्भ्यः सन्। मानवधदानशान्भ्योदीर्घश्चाभ्यासस्य॥ स्तन्द्वयोक्ते
भ्यः सन्मानादीनामभ्यासस्यदीर्घश्च। गुपेर्निंदायां। तिजेःक्षमायां। किते
र्व्याधिप्रतीकारेनिग्रहेअपनयने। नाशनेसंशयेच। मानेर्जिज्ञासायां॥ वंधेश्चि
त्तविकारे। दानेरार्जवे। शानेर्निशाने। गुपप्रभृतयः कित भिन्नानिंदार्थकाः सर्वे

नुदात्तेतो ह्लनशानोच स्वरितेतौ। एतौ नित्यसनंताः। अर्थांतरे त्वननुबंधकाश्च सुरादयः॥ अ
नुबंधस्य केवले चरितार्थत्वात्॥ सनंतात् पदव्यवस्था। धातोरित्यविहितत्वात् सनोऽनार्धधातुक
त्वं। तेनेड् लोपेन। जुगुप्सते। तितिक्षते। जिज्ञित्सते। मीमांसते। बीभत्सते। दीदांसति। दीदांसते। शीशां
सते। गुपिच्चितु गोपयति। गोपयते। इत्यादि॥ इति सनंताः॥ धातोरेकाचो हलादेः क्रियासमभिहारे य
ङ्॥ पौनःपुन्ये भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ्। गुणो यङ्लुकोः। अभ्यासस्य। ङिदंत
त्वादात्मनेपदं। पुनःपुनरतिशयेन वा भवति बोभूयते। बोभूयांचक्रे। अबोभूयिष्ट। धातोः किं। आ
र्धधातुकत्वं यथा स्यात्। तेन वुभूवोवचिरित्या। एकाचः किं। पुनःपुनः जागर्ति। हलादेः किं। भृशमीक्ष
ते। नित्यं कौटिल्ये गतौ। गत्यर्थात् कौटिल्य एव यङ् न तु क्रियासमभिहारे। दीर्घोऽकितः। अकि
तो ~~यस्यलोप आर्धधातुके~~। ऽभ्यासस्य दीर्घो यङ्लुकोः॥ कुटिलं व्रजति वाव्रज्यते। यस्य हलः॥ हलः
परस्य यस्य लोप आर्धधातुके। आदेपरस्य। अतोलोपः। वाव्रजांचक्रे। वाव्रजिता। रीङ् ऋतः॥
अकृद्यकारेऽसार्वधातुकयकारे च्वौ च ऋदंतांगस्याऽऽदेशः॥ चेक्रीयते। रीगृदुपधस्य च। धातोर

भ्यासस्य रीगागमो यङ्लुकोः॥ वरीवृत्यते। वरीवृतांचक्रे॥ वरीवृतिता। ऋभ्यादिलुच। एवं न। नरीनृत्यते
जरीगृह्यते। रीगृत्वत इति वाच्यं॥ वरीवृश्च्यते। लुपसदचरजपजभदशदहगृभ्यो भावगर्हायां॥
एभ्यो धात्वर्थगर्हायामेव यङ् न तु क्रियासमभिहारे॥ गर्हितं लुंपति लोलुप्यते। सासद्यते॥ च
रफलोश्च॥ अनयोरभ्यासस्योतोनुक् यङ्लुकोः॥ नुगित्यनेनानुस्वार उपलक्ष्यते। सच पदांत
वद्वाच्यः॥ वा पदांतस्येति यथा स्यात्। उत्परस्यातः॥ चरफलोरभ्यासात्परस्यात उत्स्यात्
यङ्लुकोः॥ हलि चेति दीर्घः। चञ्चूर्यते। चंचूर्यते। पम्फुल्यते। पंफुल्यते। जपजभदहदश
भंजपशां च॥ एषामभ्यासस्य नुक् यङ्लुकोः॥ गर्हितं जपति जंजप्यते इत्यादि। ग्रो यङि॥ गिरते
रेफस्य लत्वं यङि॥ गर्हितं गिलति जेगिल्यते॥ सूचि सूत्रि मूत्रि अट्यर्त्यशूर्णोति यङ् वाच्यः
सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते। अटाट्यते। यङि च। अर्त्तेः संयोगादेश्च ऋतो गुणो य
ङि॥ यकारपरस्य रेफस्य न द्वित्वनिषेधः॥ अरार्यते। अरारिता। अशाश्यते। ऊर्णोनूय
ते। सिचो यङि॥ सस्य षो न। निसेसिच्यते। न कवतेर्यङि॥ अभ्यासस्य चुत्वं। चोकूयते॥

कौतिकुवत्यौ स्तुचोकूयते। हंतेर्हिंसायांघ्नीभावो वक्तव्यः। हिंसायांकिं। जुगतोजुना स्तिकां

तस्या॥ जंघं॥ अदंताभ्यासस्यनुक्यङ्लुकोः॥ जंघन्यते॥ अयङ्यिक्ङिति॥ शीङः॥ शा

शय्यते॥ स्वपिस्यमिव्येयांयङि॥ संप्रसारणं॥ सोषुप्यते। सेसिम्यते। स्यमुराद्दे। वेवीयते।

न वशः॥ संप्रसारणं॥ वावश्यते। चायः की॥ चेकीयते। ई घ्राध्मोः॥ जेघ्रीयते। देध्मीयते॥

नीग्वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कंदां॥ एषामभ्यासस्यनीग्युङ्लुकोः॥ अकितइत्युक्तेन दीर्घः

वनीवच्यते। सनीस्रस्यते। दनीध्वस्यते। बनीभ्रश्यते। चनीकस्यते। पनीपत्यते। पनीपद्यते॥

चनीस्कद्यते॥ ४॥ इतियङंताः॥ यङोचिच॥ यङोचिप्रत्ययेलुक्स्यात्। चकारात्तंविना पिक्वचि

त्॥ अनैमित्तिकोयक्यंतरंगत्वादादौभवति। ततप्रत्ययलक्षणेन यङंतत्वाद्वित्वं॥ अभ्यासका

र्यं॥ धातुत्वाल्लडादयः॥ शेषात्कर्तरिपरस्मैपदं। चर्करीतंचेत्यदादौपाठाच्छपोलुक्। यङोवा।

यङंतात्परस्यहलादेःपितःसार्वधातुकस्यईड्वास्यात्। भुसुवोरितिनिषेधोयङ्लुकीभाषायांन।

बोभूतुतेतिउक्तेइतिछंदसिनिपातनात्। बोभवीति। बोभोति। बोभूतः। बोभुवेति। बोभवीषि॥

बोभोति। बोभूयः। बोभूय। बोभवीमि। बोभोमि। बोभूवः। बोभूमः। बोभवांचकार। बोभवांब
भूव। बोभवामास। बोभविता। बोभविष्यति। बोभवीतु बोभोतु। बोभूतात्। बोभूतां। बोभवतु। बोभू
हि। बोभवानि। अबोभवीत्। अबोभोत्। अबोभूतां। अबोभुवुः। बोभूयात्। बोभूयातां। बोभू
युः॥ बोभूयात्। बोभूयास्तां। बोभूयासुः॥ गातिस्थेति सिचो लुक्। यङो वेति द्विपक्षेगु
णं वाधित्वा नित्यत्वाद्वुक्। अबोभूवीत्। अबोभोत्। अबोभूतां। अबोभुवुः। अबो
भविष्यत्। जंगमीति। जंगंति। अनुदात्तेत्वनुनासिकलोपः। जंगतः। जंगमति। जं
गमीषि। जंगंसि। जंगमीमि। जंगन्मि। जंगन्वः। जंगन्मः॥ तिपाशपानुबंधेन नि
र्दिष्टं यद्गणेन च॥ यत्रैकाज्ग्रहणं चैव पंचैतानि न यङ्लुकि॥१॥ इति वचनान्न
द्विर्निशे(?)षेधः॥ जंगमिता। अनुनासिकस्याभीयत्वेनासिद्धत्वान्नहेर्लुक्। जंगहि
अजंगमीत्। अजंगमिष्टां॥ रुधिकौ चङ्लुकि। नदुपधस्य धातोरभ्यासस्य नुक्
उ

रिकुरीकुस्युर्यङ्लुकि। अतश्च। अदंताद्धातोरपि तथा। वर्वर्तीति। वरिवृतीति। वरीवृतीति। वर्व
र्ति। वरिवर्ति। वरीवर्ति। वर्वृतः। ३। वर्वृतति। ३। वर्वर्तांचकार। ३। वर्वर्तांबभूव। ३। वर्वर्ता
मास। वरिवर्तामास। वरीवर्तामास। वर्वर्तिता। ३। गणनिर्देशत्वान्नवृद्भ्य इति
नेर्निषेधः। वर्वर्तिष्यति। ३। वर्वर्तीतु। ३। वर्वर्तु ३। वर्वृतात्। अवर्वर्तीत्। ३।
अवर्वर्त्। ३। सिपि दश्चेति विकल्पपक्षे अवर्वः। ३। गणनिर्देशत्वादङ्नाभ्य
वर्वर्तीत्। चर्करीति। चरिकरीति। चरीकरीति। चर्कर्ति। चरिकर्ति। चरीकर्ति। चर्कृतः।
चरिकृतः। चरीकृतः। चर्कर्ति। चर्कृतति। ३। चर्करांचकार। ३। चर्करिता। ३। अचर्क
रीत्। ३। अचर्कः। ३। चर्कृयात्। ३। आशिषि लिङ्। चर्क्रीयात्। ३। अचर्करीत्। ३
अतश्चेति तपरत्वान्नेह। कॄ विक्षेपे। चाकर्ति। चाकरीति। चाकीर्त्तः। चाकिरति। चाकिर्हि।

चाकर्त्ती। अचाकरीत्। अचाकः। अचाकीर्त्तां। अचाकुः। अचाकारीत्। अचाकारिष्टां। ता
तर्त्ति। तातरीति इत्यादि॥ इति णिच् सन् यङ् यङ्लुगंताः॥ सुप आत्मनः क्यच्॥ इषिकर्मणः ए
षितुरात्मसंबंधिनः सुबंतादिच्छायामर्थे क्यच् वा। सुपो धातुप्रातिपदिकयोः॥ एतयोरवयवस्य
सुपो लुक्॥ क्यचि च। अवर्णस्य ईत् स्यात्। आत्मनः पुत्रमिच्छति पुत्रीयति। मांतप्रकृतिकसुबं
तादव्ययाच्च न क्यच्। किमिच्छति। इदमिच्छति। स्वरिच्छति। अशनायोदन्यधनाया बुभुक्षापि
पासागर्धेषु॥ एते क्यजंता निपात्यंते। अशनायति। उदन्यति। धनायति। बुभुक्षादौ किं। अशनी
यति। धनीयति। अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि॥ एषां क्यचि लालसायां सुक्
स्यात्॥ अश्ववृषयोर्मैथुनेच्छायां॥ अश्वस्यति। वडवा। वृषस्यति। गोः॥ क्षीरलवणयोर्लाल
सायां॥ क्षीरस्यति बालः॥ लवणस्यति उष्ट्रः॥ सर्वप्रातिपदिकानां क्यचि लालसायां सुगसु
कौ॥ दधिस्यति। दध्यस्यति। नः क्ये॥ क्यचि क्यङि नांतमेव पदं नान्यत्॥ नलोपः॥ राजीयति। नांत
मेवेति किं॥ वाच्यति। हलि च। गीर्यति। पूर्यति। धातोरित्येव। नेह॥ दिवमिच्छति दिव्यति॥ क्यस्य वि

भाषा॥ हलः परयोः क्यच्क्यङोर्वा लोपो वार्धधातुके॥ आदेः परस्य॥ अतो लोपे॥ तस्य स्थानिवत्वाल्ल
घूपधगुणो न॥ समिधिता॥ समिध्यिता॥ काम्यच्च। उक्त विषये काम्यच्च॥ आत्मनः पुत्रमिच्छ
ति पुत्रकाम्यति॥ पुत्रकाम्यिता। उपमानादाचारे। उपमानात्कर्मणः सुबंतादाचारेर्थे क्यच्वा।
पुत्रमिवाचरति पुत्रीयति छात्रं॥ विष्णूयति द्विजं॥ सर्वप्रातिपदिकेभ्यः क्विप्वा वक्तव्यः
अतो गुणे॥ कृष्ण इवाचरति कृष्णति॥ स्व इवाचरति स्वति। सस्वौ। अनुनासिकस्य क्वि
झलोः क्ङिति॥ अनुनासिकांतस्योपधाया दीर्घः क्वौ झलादौ क्ङिति च॥ इदमिवाचरति
इदामति। राजेवाचरति राजानति॥ इन्हन्निति नियमान्नेहोपधादीर्घः॥ पंथा इ
वाचरति पथीनति। कर्त्तुः क्यङ् सलोपश्च॥ उपमानात्कर्त्तुः सुबंतादाचारेर्थे क्यङ् वा सांत
स्य कर्तृवाचकस्य सलोपो वा क्यङ्चेद्युक्तेः पचो वाक्यं। सन्नियोगशिष्टानां सहैव प्रवृत्ति
सहैव निवृत्तिरिति क्यङ्सलोपयोः सहैव प्रवृत्तिः सहैव निवृत्तिः लोपश्च व्यवस्थितः॥ ओ

जसोप्सरसोनित्यमितरेषांविभाषया।।कृष्णइवाचरतिकृष्णायते।ओजायते।अप्सरायते।।य
शायते।यशस्यते।विद्वायते।विद्वस्यते।आचारेऽवगल्भक्लीबहोडेभ्यःक्विब्वावक्तव्यः।।वाग्र
हणाद्वाक्यमपि।अवगल्भादयःपचाद्यजंताःक्विप्सन्नियोगेनानुदात्तत्वमनुनासिकत्वं
चाऽस्यस्यप्रतिज्ञायते।तेनतङ्।अवगल्भते।क्लीबते।होडते।होडांचक्रे।उपसर्गस
मानाकारंपूर्वपदंधातुसंज्ञाप्रयोजकेप्रत्ययेचिकीर्षितेपृथक्क्रियतेतेनगल्भशब्दा
त्प्रागट्।अवागल्भत।अवागल्भिष्ट।लोहितादिडाज्भ्यःक्यष्।।वाक्यषः।।क्यषंतात्प
रस्मैपदंवा।।अलोहितःलोहितोभवतिलोहितायति।लोहितायति।लोहितायते।ननु
उच्चारणसामर्थ्यादकाम्यचइवक्यषोपिककारः।अतोनश्रूयते।सत्यंतस्यभाष्येप्रत्या
ख्यानात्।।पटपटायते।कष्टायक्रमणे।चतुर्थ्यंतात्कष्टशब्दादुत्साहेर्थेक्यङ्।कष्टा
यक्रमते।कष्टायते।पापंकर्तुमुत्सहतइत्यर्थः।सत्रकक्षकष्टकृच्छ्रगहनेभ्यःकण्वचिकीर्षा

यां क्यङ्॥ क एवं पापं चिकीर्षति सत्रायते। कष्टायते। कर्मणो रोमंथतयोवर्त्तिचरोः॥ रोमंथतपोभ्यां
कर्मभ्यां क्रमेण वर्त्तमानायां चरणे चार्थे क्यङ् स्यात्॥ रोमंथं वर्त्तयति रोमंथायते। हनु
चलन इति वक्तव्यं॥ चर्वितस्याकृष्य पुनश्चर्वण इत्यर्थः॥ तेन कीटो रोमंथं वर्त्तयति॥
तपसः परस्मैपदं च॥ तपश्चरति। तपस्यति। बाष्पोष्मभ्यामुद्वमने। बाष्पमुद्वमति बाष्पायते
उष्मायते॥ फेनाच्चेति वक्तव्यं॥ फेनायते॥ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे॥ ए
भ्यः कर्मभ्यः करोत्यर्थे क्यङ्॥ शब्दं करोति शब्दायते॥ सुदिनदुर्दिननीहारेभ्यश्च॥
सुदिनं करोति सुदिनायते इत्यादि॥ प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च॥ प्राति
पदिकाद्धात्वर्थे णिच् स्यादिष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुप्
लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञाः कार्याः णावपि स्युः॥ पटुमाचष्टे पटयति
परत्वाद्वृद्धौ सत्यां टिलोपः॥ अपीपटत्। णौ चङीयेन्नाप्राप्ते तस्य देर्लोपो बलीया

निति स्थितं॥ अपपटतः। पुच्छभांडचीवरालिङ्॥ पुच्छादुदसने व्यसने पर्यसने च॥ वि
विधं विरुद्धं चोत्क्षेपणं व्यसनं। उत्पुच्छयते। विपुच्छयते। परिपुच्छयते॥ भांडात्समाच
यने॥ संभांडयते॥ समभांडत॥ चीवरादर्जने परिधाने च॥ संचीवरयते भिक्षुः॥ मुंडमिश्र
श्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्॥ एभ्यः कर्मभ्यः करोत्यर्थे णिच्॥ मुं
डं करोति मुंडयति॥ व्रताद्भोजनतन्निवृत्त्योः॥ पयः शूद्रान्नं वा व्रतयति॥ वस्त्रात्समाच्छा
दने॥ संवस्त्रयति॥ हस्ताद्दिष्टोपोषहण्ठो। हलिकल्योरदंतत्वं निपात्यते॥ हलिं कलिं गृह्णा
ति हलयति कलयति। महद्धलं हलिः। कृतं गृह्णाति कृतयति। तूस्तानि विनिहंति वि
तूस्तयति। तूस्तं केशाः इत्येके॥ जटीभूताः केशा इत्यन्ये॥ सत्यापर्यवेदानामापुक्वक्तव्यः॥ सत्या
पयति॥ अर्थापयति। वेदापयति। पाशं विमुंचति विपाशयति। रूपं पश्यति रूपयति। वीणा
या गायति उपवीणयति। तूलेनानुकुष्णाति अनुतूलयति। त्वचं गृह्णाति त्वचयति। उपश्लोकेन स्तौति उपश्लो

कयति। सेनया अभियाति अभिषेणयति। लोमान्यनुमार्ष्टि अनुलोमयति। त्वच संव
रणे उपचाधच। त्वचं गृह्णाति त्वचयति। वर्मणा संनह्यति संवर्मयति। वर्णं गृह्णाति वर्णय
ति। चूर्णैरवध्वंसयते अवचूर्णयति॥ ॥इति नामधातुप्रक्रिया॥ कंड्वादिभ्यो य
क्॥ स्वार्थे। कंडूञ् गात्रविघर्षणे। कंडूयति। कंडूयते इत्यादि। कंड्वादयः॥ कर्त्तरि
कर्मव्यतिहारे॥ क्रियाविनिमये द्योत्ये कर्त्तर्यात्मनेपदं स्यात्॥ व्यतिलुनीते॥ अन्यस्य योग्यं
ती८ लवनं करोतीत्यर्थः॥ नगतिहिंसार्थेभ्यः॥ व्यतिगच्छंति॥ व्यतिघ्नंति॥ प्रतिषेधे हसादीनामुपसंख्या
नं॥ हसादयो हसप्रकाराः शब्दक्रियाः॥ व्यतिहसंति। व्यतिजल्पंति। हरतेरप्रतिषेधः॥ संप्रहरंते
राजानः॥ इतरेतरान्योन्योपपदाच्च॥ परस्परोपपदाच्चेति वक्तव्यं॥ इतरेतरस्यान्योन्यस्य पर
स्परस्य वा व्यतिलुनंति॥ नेर्विशः॥ निविशते। परिव्यवेभ्यः क्रियः॥ परिक्रीणीते। विक्रीणीते
अवक्रीणीते॥ विपराभ्यां जेः॥ विजयते॥ पराजयते॥ क्रीडोनुसंपरिभ्यश्च॥ चादाङः॥ अनुक्रीडते॥

संक्रीडते। परिक्रीडते। आक्रीडते॥ समो कूजने॥ संक्रीडते॥ कूजने तु संक्रीडति रथचक्रं॥ आ
गमेः क्षमायां॥ एयं तस्येदं ग्रहणं॥ आगमयस्व तावत्॥ मात्वरिष्ठा इत्यर्थः॥ शिक्षतेर्जिज्ञासायां
धनुषि शिक्षते॥ धनुर्विषयज्ञाने शक्तो भवितुमिच्छतीत्यर्थः॥ वृत्तिसर्गतायनेषु क्रमः॥ वृत्तिरप्र
तिबंधः॥ अचिक्रमते बुद्धिः॥ सर्ग उत्साहः॥ अध्ययनाय क्रमते॥ क्रमंते स्मिन् शास्त्राणि॥ स्फी
तानि भवंतीत्यर्थः॥ आङ उद्गमने॥ आक्रमते सूर्यः॥ ज्योतिरुद्गमन इति वाच्यं॥ नेह॥ आक्रा
मति धूमो हर्म्यतलात्॥ वेः पादविहरणे॥ साधु विक्रमते॥ वाजी॥ प्रोपाभ्यां समर्थाभ्यां॥ आरंभे अ
नयोस्तुल्यार्थता॥ प्रक्रमते॥ उपक्रमते॥ समर्थाभ्यां किं॥ प्रक्रामति॥ गच्छतीत्यर्थः॥ उपाक्रामति॥
आगच्छतीत्यर्थः॥ समर्थाभ्यां किं॥ प्रक्रामति॥ गच्छ
तीत्यर्थः॥ उपाक्रामति॥ आगच्छतीत्यर्थः॥ अनु
पसर्गाद्वा॥ क्रामति॥ क्रमते॥ अपह्नवे ज्ञः॥ शतम
पजानीते॥ अपलपतीत्यर्थः॥ अकर्मकाच्च॥

न

गं जानीते ॥ अनुपसर्गात्किं ॥ स्वर्लोकं प्रतिजानासि ॥ अकर्मकाच्च ॥ सर्पिषो जानीते ॥ सर्पिषो पायेन प्रवर्त्तत इत्यर्थः ॥ समवप्रविभ्यस्थः ॥ संतिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते । आङ्प्रतिज्ञायां ॥ शब्दं नित्यमातिष्ठते ॥ प्रकाशस्थेयाख्ययोश्च ॥ गोपीकृष्णायतिष्ठते ॥ स्वाशयं प्रकाशयतीत्यर्थः ॥ संशय्य कर्णादिषु तिष्ठते यः ॥ कर्णादिन्निर्णेतृत्वेनाश्रयतीत्यर्थः ॥ उदोनूर्ध्वकर्मणि ॥ मुक्तौ उत्तिष्ठते ॥ अनूर्ध्वेति किं ॥ पीठादुत्तिष्ठति ॥ उपान्मंत्रकरणे ॥ आग्नेय्याग्नीध्रमुपतिष्ठते ॥ मंत्रकरणे किं ॥ भर्त्तारमुपतिष्ठति यौवनेन ॥ उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यं ॥ आदित्यमुपतिष्ठते । गंगायमुनुपतिष्ठते । रथिकानुपतिष्ठते ॥ मित्रीकरोतीत्यर्थः । पंथाः स्रुघ्नमुपतिष्ठते ॥ प्राप्नोतीत्यर्थः ॥ वालिप्सायां ॥ भिक्षुकः प्रभुमुपतिष्ठति वा ॥ उद्विभ्यां तपः ॥ अकर्मकादित्येव ॥ उत्तपते । वितपते । दीप्यते इत्यर्थः । स्वांगकर्मकादिति वक्तव्यं उत्तपते । वितपते पाणिं ॥ नेह ॥ उत्तपति सुवर्णं स्वर्णकारः ॥ आङो यमहनः ॥ आयच्छते । आहते ॥ अकर्मकात्स्वांगकर्मकादित्येव ॥ नेह ॥ परस्य शिर आहंति । आत्मनेपदेष्वन्यतरस्यां ॥ हनो वधादेशो वा लुङि ॥ आवधिष्ट ॥ आवधिषातां ॥ आवधिषत ॥ हनः सिच् कित् ॥ अनुनासिकलोपः ॥

आहत। आहसातां॥ आहसत। समो गंधने। सिच् कित्। गंधनं हिंसा सूचनं परदोषाविष्करणं॥
उदायत। गंधने किं॥ उदायंस्त पादः। आकृष्टवानित्यर्थः॥ समो गम्यृच्छिभ्यां॥ अक
र्मकाभ्यामित्येव। संगच्छते। वा गमः॥ गमः परौ झलादी लिङ्सिचौ कितौ स्तः। संगसी
ष्ट। संगंसीष्ट। समगत। समगंस्त। समृच्छते। अकर्मकाभ्यां किं। ग्रामं संगच्छति
विदिप्रच्छिस्वरतीनामुपसंख्यानं। वेत्तेरेव ग्रहणं। संवित्ते। संविदाते। वेत्तेर्विभाषा॥
वेत्तेः परस्य झ आदेशस्यातो रुडागमः॥ संविद्रते। संविदते। संपृच्छते। संस्वरते। अ
थास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतेति चेत्। शृणु। धातोरर्थान्तरेवृ
त्तेर्धात्वर्थेनोपसंग्रहात्॥ प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥१॥ वहति भारं नदी
वहति। स्यंदते। इत्यर्थः॥ जीवति। नृत्यति। प्रसिद्धेर्यथा। मेघो वर्षति। कर्मणोऽविवक्षातो
यथा हितान्नयः संशृणुते स किंप्रभुः। संमाननोत्संजनाचार्यकरणज्ञानभृतिविगण

नव्ययेषु नियः॥ शास्त्रं विनयते। दंडमुन्नयते। माणवकमुपनयते। तत्त्वं नयते। कर्मकरा
नुपनयते। करं विनयते। शते देयं भागं। परिशोधयतीत्यर्थः॥ शातं विनयते॥ धर्मा
र्थं विनियुंक्त इत्यर्थः। उपसर्गादस्यत्यूह्योर्वेतिवाच्यं। बंधं निरस्यति। निरस्यते। स
मूहति। समूहते। उपसर्गाद् ह स्वः उहते। यादौ क्ङिति। ब्रह्मसमुद्यात्। अग्निं समुदस्यं
नि समुपविभ्यो ह्वः॥ निह्वयते। स्पर्धायामाङः॥ कृष्णश्चाणूरमाह्वयते॥ स्पर्धायां किं। पु
त्रमाह्वयति। उदश्चरः सकर्मकात्। धर्ममुच्चरते। उल्लंघ्य गच्छतीत्यर्थः॥ समस्तृतीयायुक्ता
त्। रथेन संचरते। दाणश्च सा चेच्चतुर्थ्यर्थे॥ समो दाणस्तृतीयांतेन युक्तात्स्यात्तृतीया
चेच्चतुर्थ्यर्थे॥ दास्या संयच्छते कामी॥ उपाद्यमः स्वकरणे। स्वकरणं स्वीकारः। भार्यामुपयच्छ
ते॥ विभाषोपयमने॥ यमः सिज्वा किद्वा विवाहे॥ रामः सीतामुपायत। उपायंस्त। उदवोढेत्य
र्थः। ज्ञाश्रुस्मृदृशां सनः। सनंतानामेषां प्राग्वत्। धर्मं जिज्ञासते। शुश्रूषते। सुस्मूर्षते। दि

ह्नुते। नानोर्ज्ञः। पुत्रमनु जिज्ञासति। प्रोपाभ्यां युजेरयज्ञपात्रेषु। प्रयुंक्ते। उपयुंक्ते। स्वरा
द्यंतोपसर्गादिति वाच्यं। उद्युंक्ते। अयज्ञपात्रेषु किं। द्वंद्वंन्यंचि पात्राणि प्रयुनक्ति। समः क्ष्णु
वः। संक्ष्णुते शस्त्रं। गंधनावक्षेपनसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः॥
गंधनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैव। अव
क्षेपनं भर्त्सनं। श्येनो वर्त्तिकामुदाकुरुते। भर्त्सयतीत्यर्थः। हरिमुपकुरुते। सेवत इत्यर्थः॥
परदारान्प्रकुरुते तेषु सहसा प्रवर्त्तत इत्यर्थः॥ एधोदकस्योपस्कुरुते॥ गुणमाधत्त इ
त्यर्थः॥ कथाः प्रकुरुते॥ प्रकथयतीत्यर्थः॥ शतं प्रकुरुते॥ धर्मार्थं विनियुंक्ते इत्यर्थः॥
एषु किं। कटं करोति॥ इत्यात्मनेपदप्रक्रिया॥ शेषात्कर्त्तरि परस्मैपदं॥ टुओश्वि गति
वृद्ध्योः॥ श्वयति॥ विभाषा श्वेः॥ संप्रसारणं लिट्यङि। शुशाव। शुशुवतुः। शुशुवुः॥
श्वयतेर्लिट्यभ्यासलत्वणप्रतिषेधः॥ शिश्वाय। शिश्वियतुः। श्वयात्। अश्वत्। अशिश्वियत्। श्व

यतेरः। अङि। अश्वत्। अश्वः। विभाषेति चङ्। अशिश्वियत्। अश्वयीत्। अनुपरा
भ्यां कृञः। कर्तृगे च फले गंधनादौ च परस्मैपदं स्यात्। अनुकरोति। पराकरोति। अभि
प्रत्यतिभ्यः क्षिपः॥ क्षिप प्रेरणे। स्वरितेत्। अभिक्षिपति। प्राद्वहः। प्रवहति। परेर्मृषः॥
परिमृष्यति। व्याङ्परिभ्यो रमः। विरमति। उपाच्च। यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः।
अंतर्भावितण्यर्थोयं। विभाषाकर्मकात्। उपाद्रमतेः परस्मैपदं वा। उपरमति। उप
रमते। निवर्तत इत्यर्थः। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ एभ्यो ण्यंतेभ्यः पर
स्मैपदं स्यात्। णिचश्चेत्यस्यापवादः। बोधयति पद्मं इत्यादि। क्रीङ्जीनां णौ। आ
त्वं स्यात्। अध्यापयति। णौ च संश्चङोः। सन्परे चङ्परे च णौ इङो गाङ् वा स्या
त्। अध्यजीगपत्। अध्यापिपत्। क्रापयति। जापयति॥ निगरणचलनार्थेभ्यश्च
॥ निगारयति। अदेः प्रतिषेधः। आदयते देवदत्तेन। अणावकर्मकाच्चित्तवत्कर्तृकात्

ना

॥एवं तात्पर स्मैपदं॥ शेते हृष्ट मस्तां गोपीशाययति॥ नपादम्याङ्यमांङ्यसपरिमुहरुचिन्टचिन्टति
वदवसः॥ एभ्यो ण्यंतेभ्यः परस्मैपदं न॥ पाययते। दमयते। आयासयते। परिमोहयते। रोचयते।
नर्त्तयते। वादयते। वासयते। धेट उपसंख्यानं। धापयते। अणावकर्मकाच्चित्तवत्कर्तृकात्। शेषादिति प
रस्मैपदं स्यादेव। वत्सान्पाययति पयः॥ ॥इति पदव्यवस्था॥ भावकर्मणोः। लस्यतङानौ
॥सार्वधातुके यक्। धातोर्भावकर्मवाचिनि। भावः क्रिया। सा च भावार्थकलकारेण। न धयते
। युष्मदस्मद्भ्यां समानाधिकरण्याभावात् प्रथमपुरुषः। तिङ् वाच्यक्रियाया अद्रव्यत्वप्रत्य
नद्वित्वाद्यप्रतीतेर्न द्विवचनादि किंत्वेकवचनमेवोत्सर्गतः। त्वया मया अन्यैश्च भूयते। बभूवे
स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च॥ उपदेशे योऽच्
तदंतानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु भावकर्मणोर्गम्यमानयोः सीनां चिडागम
श्च॥ चिण्वद्भावपक्षेऽयमिट्। चिण्वद्भावाद्वृद्धिः। भाविता। भविता। भविष्यते। भाविष्यते

भूयतां। अभूयत। भूयेत। भाविषीष्ट। भविषीष्ट। चिएत्भावकर्मणोः ३ चेस्त्रिएत्भावकर्मवा चिनिते
परे। अभावि। अभाविष्यत। अभविष्यत। अकर्मकोप्युपसर्गवशात्सकर्मकः। अनुभूयते आनंद
श्चैत्रेण त्वयामयाच। अनुभूयेते। अनुभूयंते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि।
अन्वभाविषातां। अन्वभविषातां णिलोपः। भाव्यते। भावयांचक्रे। भावयांबभूवे। भावयामासे
चिणवदिट्। आभीयत्वेनासिद्धत्वात् णिलोपः। भाविता। भावयिता। भाविष्यते। भावयिष्यते।
भाविषीष्ट। भावयिषीष्ट। अभावि। अभाविषातां। अभाव
भाव्यतां। अभाव्यत। भाव्येत। भाविषीष्ट। भावयिषीष्ट। अभावि। अभाविषातां। अभाव
यिषातां। बुभूष्यते। बुभूषांचक्रे। बुभूषिता। बुभूषिष्यते। बोभूयते। यङ्लुङंतात्तु बोभू
यते। बोभवांचक्रे। बोभाविता। बोभविता। अकृत्सार्वधातुकयोर्दीर्घः। स्तूयते विष्णुः।
स्ताविता। स्तोता। स्ताविष्यते। स्तोष्यते। अस्तावि। अस्ताविषातां। अस्तोषातां। गुणोतीति
गुणः। अर्यते। स्मर्यते। सन्यतां। तामिति गुणः। आरे। सस्मरे। उपदेशग्रहणाच्चिण्वदिट्।

आरिता। अर्त्ता। स्मारिता। स्मर्त्ता। लोपः। स्रस्यते। इदितस्तु नंद्यते। ईड्यते। अयङ् यि
क्ङिति। शीङः। शय्यते। तनोतेर्यकि। आदंतादेशो वा। तायते। तन्यते। तपोऽनुतापे च। त
पश्च्लेश्चिण्न कर्मकर्त्तर्यनुतापे च। अन्वतप्त पापेन। घुमास्थेतीत्वं। दीयते। धीयते। द
दे। आतो युक् चिण्कृतोः। आदंतानां युगागमः स्याच्चिणि ञ्णिति कृति च। दा
यिता। दाता। दायिषीष्ट। दासीष्ट। अदायि। अदायिषातां। शम्यते मोहो मुकुंदेन। चिण्णमु
लोर्दीर्घोऽन्यतरस्यां। चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा। शामिता। शमिता।
शमयिता। शामिष्यते। शमिष्यते। शमयिष्यते। एवं तु भावे शम्यते मुनिना। नोदात्तोपदे
शस्य मांतस्यानाचमेः। उपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च। अशमि। अदमि।
उदात्तोपदेशस्येति किं। अगामि। मांतस्येति किं। अवादि। अनाचमेः किं। आचामि। अ
अनाचमिकमिवमीनामिति वक्तव्यं। अकामि। अवामि। भज्यते। भंजेश्च चिणि। लोपो वा

अभाजि। अभंजि। लभ्यते। विभाषा चिण्णमुलोः। लभेर्नुम्। अलंभि। अलाभि। यदा क
र्मैव कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात्कर्त्तरि भावे च लः॥ कर्मव
त्कर्मणा तुल्यक्रियः॥ कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवत्स्यात्। कार्यातिदे
शोयं। तेन यगात्मनेपद चिण् चिण्वदिटः स्युः। पच्यते फलं। भिद्यते काष्ठं। अपाचि
चिलेर्लुक्। चिणः परस्य लुक् स्यात्। अभेदि। भावे भिद्यते काष्ठेन। [illegible]बा
धिनां श्रिशादीनां सनंतानां च यक् चिणौ चिण्वदिट् च नेति वाच्यं। अलंकुरुते क
न्या। अलमकृत। अवकिरते हस्ती। अवाकीर्ष्ट। गिरते। अवागीर्ष्ट। आद्रिय
ते। आदृत। श्रिसादि सुदाद्यं तगणः। चिकीर्षते कटः। अचिकीर्षिष्ट। तपस्तपः
कर्मकस्यैव॥ कर्त्ता कर्मवत्स्यात्। तप्यते तपस्तापसः। अर्जयतीत्यर्थः। अन
स। तपःकर्मकस्यैवेति किं। उत्तपति सुवर्णं सुवर्णकारः। सकर्मकाणां प्रतिषेधो व
क्तव्यः।

अजां ग्रामं नयति। दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यं। न दुहस्नुनमां यक्चिणौ। एषां
कर्मकर्त्तरि यक्चिणौ न। शपो लुक्। गोः पयो दुग्धे। अचः कर्मकर्त्तरि। अजंतात्कर्मकर्त्तरि
एवा कर्मकर्त्तरि तेपरे। अकारि। अकृत। दुहश्च। तथा। अदोहि। पच्चेक्ष्म। लुङ्वेतिपचे
लुङ्। अदुग्ध। अधुक्षत। उदुंबरः फलं पच्यते। कुषिरजोः प्राचां श्यन् परस्मैपदं
च। अनयोः कर्मकर्त्तरि न यक्। किंतु श्यन् परस्मैपदं वात्मनेपदापवादः। कुष्यति
कुष्यते वा पादः। रज्यति रज्यते वा वस्त्रं। यग्विषये तु नास्य प्रवृत्तिः। कोषिषीष्ट।
रंक्षीष्ट। इति भावकर्मप्रक्रिया। अभिज्ञावचने लृट्। स्मृतिबोधिन्युपपदे भूतानद्य
तने धातोर्लृट्। लङोपवादः। वस निवासे। स्मरसि कृष्ण गोकुले वत्स्यामः। एवं बु
ध्यसे बुध्यसे चेतसे इत्यादि। प्रयोगेपि। न यदि। यद्योगे उक्तं न। अभिजानासि
यत्कृष्णे अभुंज्महि। विभाषा साकांक्षे। उक्तविषये लृड्वा। लक्ष्यलक्षणभावेन साकांक्ष

श्चेवात्यर्थः। स्मरसि कृष्ण वने वत्स्यामस्तत्र गाश्चारयिष्यामः। वासो लक्षणं चारणं लक्ष्यं। पद्दे लङ्
परोक्षे लिट्। चकार। उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं। सुप्तोऽहं किल विललाप॥ अत्यंताप
ह्नवे लिड्वक्तव्यः। कालिंगेष्ववात्सीः। नाहं कलिंगान्जगाम। प्रश्ने चासन्नकाले। आसन्नकाले पृच्छ्य
मानेऽर्थे लिट् विकल्पे लङ् लिटौ स्तः। अगच्छत् किं। जगाम किं। लट् स्मे। लिटोऽपवादः। यजति स्म
युधिष्ठिरः। अपरोक्षे च। भूतानद्यतने लट् स्यात् स्मयोगे। एवं स्म पिता ब्रवीति। ननौ पृष्ट
प्रतिवचने॥ भूते लट्। अकार्षीः किं॥ ननु करोमि भोः॥ नन्वोर्विभाषा॥ अकार्षीः किं। न करो
ति॥ नाकार्षं॥ अहं नु करोमि॥ अकार्षं वा॥ पुरि लुङ् चास्मे। पुरायोगे भूतानद्यतने वा लुङ् चा
ल ल्लृङ् न तु स्मयोगे॥ पक्षे यथाप्राप्तं। वसन्तीह पुरा छात्राः। अवात्सुः। अवसन्। ऊषुर्वा। अस्मे
ति किं। यजति स्म पुरा। भविष्यतीत्येतु वर्तमाने॥ यावत्पुरानिपातयोर्लट्। यावद्भुङ्क्ते। पुरा भुङ्क्ते
निपातयोः किं॥ यावद्दास्यते तावद्भोक्ष्यते। करण [illegible] पुरायास्यति॥ विभाषा कदा कर्ह्योः। लट्
स्यात्। कदा कर्हि वा भुङ्क्ते। भोक्ष्यते भोक्ता वा। वर्तमानसामीप्ये वर्तमानवद्वा॥ वर्तमाने ये प्रत्ये

याउत्तास्तेवर्त्तमानसमीपेभूतेभविष्यतिचवास्युः। कदाभ्यागतोसि। अयमागच्छामि। आगमं
वा। कदागमिष्यसि। एषगच्छामि। एषगमिष्यामिवा। आशंसायांभूतवच्च। भविष्यत्कालेभू
तवद्वर्त्तमानवच्च प्रत्ययावास्युराशंसायां। देवश्चेद्वर्षीद्वर्षतिवर्षिष्यतिवाधान्यमवाप्स्या
मवपामःवप्स्यामोवा॥ आशंसावचनेलिङ्। आशंसावाचिन्युपपदेभविष्यतिलिङ्स्या
न्नभूतवत्। गुरुश्चेदुपेयादाशंसे अधीयीय। आशंसेक्षिप्रमधीयीय। हेतुहेतुमतो
लिङ्॥ वास्यात्। कृष्णंनमेच्चेत्सुखंयायात्। कृष्णंनंस्यति। चेत्सुखंयास्यति। भविष्यत्ये
वेष्यते। नेह। हन्तीतिपलायते॥ इच्छार्थेषुलिङ्लोटौ॥ इच्छामिभुंजीतभुंक्तांवाभवान्
एवंकामयेप्रार्थये। कामप्रवेदनइतिवक्तव्यं। नेह। इच्छन्करोति। लिङ्॥ समानकर्तृ
केषुइच्छार्थेषु। भुंजीयेतीच्छति। विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषुलि
ङ्॥ विधिःप्रेरणं। भृत्यादेर्निकृष्टस्यप्रवर्त्तनं। इहभुंजीत। आमंत्रणंकामचारानुज्ञा॥

दूहासीत। अधीष्ट। सत्कारपूर्वको व्यापारः। पुत्रमध्यापयेत्। संप्रश्नः संप्रधारणं। किंभो वेदमधीयीय। उततर्कं। प्रार्थनं याञ्चा। भो भोजनं लभेय। एवं लोट्। प्रेषातिसर्गप्राप्तका लेषु कृत्याश्च। प्रेषो विधिः। अतिसर्गः कामचारानुज्ञा। चेन्नलोपेन्तु कर्मसंप्राप्तकाल यं। भवान् यजतां। अर्हे कृत्यतृचश्च। चाल्लिङ्। त्वं कन्यां वहेः। शकिलिङ् चा। शक्तो लि ङ्स्याच्चात् कृत्यां त्वं भारं वहेः। धातुसंबंधे प्रत्ययाः। धात्वर्थानां संबंधे यत्रकाले येप्रत्ययाउक्ता स्ततो न्यत्रापि स्युः। तिङन्तवाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणाभूतक्रियावाचिभ्यः प्रत्ययाः। वसन् ददर्श। भूतेलट्। अतीतवासकर्तृकं द र्शनमित्यर्थः। सोमयाज्यस्य पुत्रो भविता। सोमेन यष्ट्यमाणेयः पुत्रस्तत्कर्तृक भवनमित्यर्थः। क्रियासमभिहारे लोट् लोटोहिस्वौ वाचतध्वमोः। पौनःपुन्यंभृ शार्थंच द्योत्ये धातोर्लोट् स्यात्तस्यच हिस्वौ स्तस्तिङोपवादातौ च हिस्वौ त

मेरा परस्मैपदात्मनेपदसंज्ञौस्तस्तिङ्संज्ञौ च तद्धर्मो विषये तु हि स्वौ वा
स्तः। पुरुषैकवचने संज्ञेतु नानयोरिति दृश्यते। हिस्व विधानसामर्थ्यात्
तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हि कर्त्तरि। आत्मनेपदिभ्यः
स्वो भावकर्मकर्तृषु। समुच्चयेऽन्यतरस्यां। अनेकक्रियासमुच्चये द्योत्ये
धातुमात्राद्वा स्यात्। यथाविध्यनुप्रयोगः पूर्वस्मिन्॥ आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुर
नुप्रयोज्यः॥ समुच्चये सामान्यवचनस्य समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः स्या
त्। अनुप्रयोगाद्यथायथा लडादयस्तिबादयश्च ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभि
व्यक्तिः॥ क्रियासमभिहारे द्वे वाच्ये। याहि याहीति याति। पुनः पुनरतिशयेन वा यानं यातं स्याद्॥
एवमर्थकं वर्त्तमानं यानं यातीत्यस्य। इति शब्दस्य चाभेदान्वयतात्पर्यं ग्राहयति। एवं यातः।
यांति। यासि। याथः। याथ। यात याते ति यूयं याथ। याहि याहीति यासीत्। यास्यति। आधी

ष्वाधीष्वेत्यधीते। ध्वंविषयेपक्षे अधीध्वमितियूयमधीध्व। समुच्चयेसक्तून्पिबधानाःखा
देत्यभ्यवहरति॥ अन्नंभुंक्ष्वदाधिकमास्वादस्वेत्यभ्यवहरते। तध्वमोस्तुपिबतखादतेत्य
भ्यवहरथेत्यादि॥ भुंग्ध्वं। आस्वादयध्वमित्यभ्यवहरध्वेपक्षेहिस्वो। अत्रसमुच्चीयमाननविशेष
णमनुप्रयोगार्थेनसामान्येनाभेदान्वयः॥ पक्षेसक्तून्पिबतिधानाःखादति॥ अन्नंभुंक्तेद
धिकमास्वादते॥ एतेन। पुरीमवस्कंदलुनीहिनंदनंमुषाणरत्नानिहरामराङ्गनाः॥ विग्र
ह्यचक्रेनमुचिद्विषावलीयइत्थमस्वास्थ्यमहर्निशंदिवः॥१॥ इतिव्याख्यातं॥ अवस्कं
दनलवनादिरूपाभूतानद्यतनपरोक्षाएककर्तृकाः अस्वास्थ्यक्रियेत्यर्थात्तइहपुनःपुन
रवस्कंदेत्यादिरर्थः॥१॥ इतिव्याख्यानंभ्रममूलमेव॥ द्वितीयस्तत्रक्रियासमभिहारेदृष्ट
स्यानुवृत्तेः। लोडंतस्यद्वित्वापत्तेश्च॥ पुरीमवस्कंदेत्यादिमध्यमपुरुषैकवचनमि
त्यपिकेषांचिद्भ्रमएव॥ पुरुषवचनसंज्ञेदृहनेस्तुतात्वात्॥ ॥ इतिलकारार्थप्र
क्रिया॥१॥ इतितिङंतंसमाप्तं॥ शुभमस्तु॥ कल्याणमस्तु॥ श्रीछिन्नमस्तायनमः॥ श्रीराम

९१ श्रीगणेशायनमः ॥ श्रीसरस्वत्यै नमः ॥ धातोः ॥ आतृतीयाध्यायांतं ये प्रत्यया
उक्तास्ते धातोः स्युः ॥ कृदतिङ् । तिङ्भिन्नः कृत्संज्ञः । वासरूपोऽस्त्रियां । अस्मिन् धात्व
धिकारे असरूपोऽपवादप्रत्यय उत्सर्गस्य वा बाधकः स्यात् स्त्र्यधिकारोक्तं विना ॥ कृ
त्याः ॥ ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः ॥ कर्त्तरि कृत् । इति प्राप्ते । तयोरे
व कृत्यक्तखलर्थाः ॥ एते भावकर्मणोरेव स्युः ॥ तव्यत्तव्यानीयरः ॥ धातोरेते स्युः ॥
एधितव्यं । एधनीयं त्वया । भावे औत्सर्गिकमेकवचनं क्लीवत्वं च । चेतव्यश्चय
नीयो वा धर्मस्त्वया ॥ केलिमर उपसंख्यानं । पचेलिमा माषाः । पक्तव्या इत्यर्थः
भिदेलिमाः । कर्मणि प्रत्ययः । वसेस्तव्यत् कर्त्तरि णिच्च । वासतिवास्तव्यः । कृत्य
चः । उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णः स्या
त् । प्रयाणीयं । अचः किं । प्रमग्नः । निर्विण्णस्योपसंख्यानं । णेर्विभाषा । प्रापण

ग

प्रयापणीयं। प्रयापनीयं। हलश्चेजुपधात्। हलादेरिजुपधादच्छसस्मादचः परस्य णो
वा। प्रकोपणीयं। प्रकोपनीयं। हलः किं। प्रोहणीयं। इजुपधात् किं। प्रवपणीयं। इजादेः सनु-
मः। सनुमश्चेद्भवति इजादेर्हलंताद्विहितो यः कृत्तत्स्थस्यैव।। प्रेंखणीयं। इजादेः किं।।
मगि सर्पणे। प्रमंगनीयं। वा निंस निक्ष निंदां।। एषां नस्य णो वा स्यादिति। प्रणिंसितव्यं। प्रनिंसितव्यं।
नभाभूपूकमिगमिप्यायीवेपां।। एभ्यः कृत्स्थस्य णो न।। प्रभानीयं। प्रभवनीयं। ण्यंतभादी-
नामुपसंख्यानं।। प्रभापनीयं। कृत्यल्युटो बहुलं। क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव।। विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं
वदंति।। स्नात्यनेन स्नानीयं चूर्णं। दीयतेस्मै दानीयो विप्रः।। ऋदुपधाच्चाक्लृपि-
चृतेः। क्यप्स्यात्। वृधु। वृध्यं। क्लृपिचृत्योस्तु कल्प्यः। कं। अचो यत्। चेयं। जेयं।
ईयति। आतः। गुणः। देयं। ग्लेयं। पोरदुपधात्। पवर्गांताददुपधाद्यत्स्यात् ण्यतोऽप-
वादः। शप्यं। लभ्यं। आङो यि। आङः परस्य लभेर्नुम् स्याद्यादौ प्रत्यये। आलंभ्या गौः
।।

उपात्प्रशंसायां॥ उपलंभ्यः साधुः। स्तुतौ किं। उपलब्धुं शक्यः उपलभ्यः। शकि सहोश्च॥ शक्यं। सह्यं। गदमदचरयमश्चानुपसर्गे॥ गद्यं। मद्यं। चर्यं। चरेराङि चागुरौ। आचर्यो देशः। अगुरौ किं। आचार्यो गुरुः। यम्यं। अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु॥ अवद्यं पापं। पण्यं विक्रेयं। शतेन वर्या कन्या। वह्यं करणं। वहंत्यनेनेति वह्यं शकटं। वाह्यमन्यत्। अर्यः स्वामिवैश्ययोः॥ अनयोः किं। आर्यो ब्राह्मणः। उपसर्या काल्या प्रजने॥ गर्भग्रहणे प्राप्तकाला चेदित्यर्थः। उपसर्या गौः। गर्भधानार्थं वृषभेनोपगंतुं योग्येत्यर्थः। प्रजने काल्येति किं। उपसार्या शरदि मथुरा त्वयेत्यर्थः। अजर्यं संगतं। विशेष्यं चेत्। न जीर्यति। त्यजर्यं। वदः सुपि क्यप्च। चा घ्यत्। ब्रह्मोद्यं ब्रह्मवद्यं। भुवो भावे॥ क्यप्। ब्रह्मणो भावो ब्रह्मभूयं। हनस्त च। चात् क्यप्। ब्रह्मणो हननं ब्रह्महत्या। एतिस्तुशास्वृदृजुषः क्यप्। शास्त्र

स्यपि तिष्ठति तिष्ठत्या। इत्यः। स्तुत्यः। शिष्यः। वृङिति ङकारोग्रहणं। न वृञः। वार्यः।। वृङः स्तुवायी अजिजः। आदृत्यः। जुष्यः। क्यप्चुकि परस्मात् पूर्व्यतो बोधनाय [illegible]: अवश्यस्तुत्यः। मृजेर्विभाषा। वप्‍वास्यात्। मृज्यः। ऋहलोर्ण्यत्। कार्यं ताल्पलं ताल्पं ण्यत्। यतोपवादः। चजोः कु घिण्ण्यतोः। चजोः कुत्वं स्यात् घिति ण्यति च। मार्ग्यः। निष्ठायामनिट इति वक्तव्यं। तेनेह न। गर्ज्यं। ओरावश्यके। ण्यत्।। लुंपेदवश्यमः कृत्ये तुं काममनसोरपि।। समो वा हितततयोर्मांसस्य पचि युड्घञोः।। १।। अवश्यलाव्यं। भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा। एते कर्त्तरि वा निपात्यंते। भवतीति भव्यः। भव्यमनेन वा। भोज्यं भक्ष्ये। भोग्यमन्यत्।। राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः।। एते क्यपि निपात्यंते। भिद्योद्ध्यौ नदे। भिद्यः। उद्ध्यः। पुष्यसिद्ध्यौ नक्षत्रे।। विपूयविनीयजित्या मुंजकल्कहलिषु।।

४३

विष्टरयोर्मुंजः। विनीयः कल्कः। जिस्यो हलिः। प्रत्ययपिभ्यां ग्रहेः॥ ग्रहं संगीतिवक्तव्यं। प्रतिग्रहं प्रतिगृह्यं। अपिग्रह्यं। लोकेतु प्रतीग्राह्यं। अपिग्राह्यं। पदास्वैरिबाह्यापक्ष्येषु च॥ अवगृह्यं॥ प्रगृह्यं पदं। अस्वैरी परतंत्रः। गृह्यकाः शुकाः। ग्राममगृह्या सेनाः। आर्यैर्गृह्यते॥ आर्यगृह्यः। तत्पक्षाश्रित इत्यर्थः॥ विभाषा कृवृषोः। क्यप् वा स्यात्। कृत्यं

चं५ वृष्यं। पक्षे ण्यत्। कार्यं वर्ष्यं। युग्यं च पत्रे। पत्रं वाहनं। योग्यमन्यत्। अमावस्यदन्यतरस्यां। अमासह वस्या चंद्रार्कावित्यमावस्या॥ अमावास्या वा। छंदसि। अमावास्यादिषु चार्यो। पत्रापाय्य समूह्याः। अमावेते साधवः। इतीकुंडपाय्य संचाय्यौ। चित्याग्निचित्ये च॥ ८५

चित्योऽग्निः। अग्नेश्चयनमग्निचित्या॥ इति कृत्यप्रक्रिया॥ १॥ ण्वुल्तृचौ। धातोरेतौ स्तः॥ कर्तरि कृदितिकर्तर्यर्थे। युवोरनाकौ॥ युवु एतयोरनुनासिकयोरेतौ स्तः। कारकः कर्ता॥ नंदिग्रहिपचादिभ्यो ल्युणिन्यचः। नंद्यादेर्ल्युः ग्रहादेर्णिनिः पचादेरच् स्यात्।

नंदयतीति नंदनः। जनार्दनः। लवणः। गणो निपातनाल्लत्वं। ग्राही। स्थायी। मंत्री। पचः। आ
ह्वातिगणेश्च। इगुपधज्ञाप्रीकिरः कः। विक्षिपः। बुधः। कृशः। ज्ञः। प्रियः। किरः। आतश्चोपस
र्गे।। प्रज्ञः। सुग्लः। पाघ्राध्माधेट्दृशः शः। पिबः।। जिघ्रः। धमः। धयः। पश्यः। अनुपस
र्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। लिंपः। विंदः। धारयः। पारयः। वेद
यः। उदेजयः। चेतयः। सातयः। साहयः। अनुपसर्गात्किं। प्रलिपः। गवादिषु विंदेः संज्ञा
यां। गोविंदः। अरविंदः। ददातिदधात्योर्विभाषा। ददः। दधः। पक्षे वक्ष्यमाणो णः।।
ज्वलितिकसंतेभ्यो णः।। वा स्यात्। ज्वालः। ज्वलः। चालः। चलः। श्याद्व्यधास्रुसंस्रु
तीणवसावहृलिहश्लिषश्वसश्च।। एभ्यो णः।। अवश्यायः। आतश्यायः। व्याधः। आ
स्रावः। संस्रावः। अत्यायः। अवसायः। अवहारः। लेहः। श्लेषः। श्वासः। विभाषाग्र
हणः। व्यवस्थितविभाषेयं। तेन जलचरे ग्राहः। ज्योतिषि ग्रहः।। गेहे कः। गृहा

तिधान्यादिकमिति गृहं ॥ शिल्पिनि ष्वुन् । क्रियाया कौशलं शिल्पं । ष्वः प्रत्ययः स्या
आदिरित् । नृतिखनिरंजिभ्य एव । नर्तकः । अके अनेच रंजेर्नलोपो वाच्यः । रजकः ।
गस्थकन् । गायकः । ण्युट् च । गायनः । प्रुसृल्वः समभिहारे वुन् । समभिहारग्रहणे
न साधुकारित्वं लक्ष्यते । प्रवकः । सरकः । लवकः । आशिषि च । वुन् स्यात् । जीवता
जीवकः । तत्रोपपदं सप्तमीस्थं । सप्तम्यंते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत्
कुंभादि तद्वाचकं पदमुपपदसंज्ञं स्यात् । कर्मण्यण् । कर्मण्युपपदे धातोरण् स्यात् । कुं
भं करोतीति कुंभकारः । आतोनुपसर्गे कः । सुप्युपपदे । अणोपवादः । गोदः । कंब
लदः । अनुपसर्गे किं । गोसंदायः । मूलविभुजादिभ्यः कः । मूलानि विभुजति मूल
विभुजो रथः । आकृतिगणोयं । महीध्रः । कुध्रः । सुपि स्थः । समस्थः । विषमस्थः ॥
सुपीति योगविभागादन्यस्मादपि । द्वाभ्यां पिबतीति द्विपः । अंबाअंबगोभूमिस

व्यापद्वित्रिकुशेकुशंकुशंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यः स्थः॥ एभ्यः स्थः सस्य षः स्या
त्॥ द्विष्ठः। त्रिष्ठः। तुंदशोकयोः परिमृजापनुदोः॥ तुंदशोकयोः कर्मण्युपपदयो
रनयोः कः स्यात्॥ आलस्यसुखाहरणयोरिति वक्तव्यं॥ तुंदपरिमृजो लसः॥
शोकापनुदः। सुखस्याहर्त्ता॥ प्रे दाज्ञः। कः स्यात्। सर्वप्रदः। पथिप्रज्ञः। समि ख्यः। गो
संख्यः। गापोष्टक्। कर्मण्युपपदे। सामगः। पिबतेः सुराशीध्वोरिति वाच्यं। सुरापी। शी
धुपी। हरतेरनुद्यमनेऽच्। अंशहरः। अनुद्यमने किं। भारहारः। शक्तिलांगलांकुश

ग

यष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्यानं॥ शक्तिग्रहः॥ इत्यादि। वयसि च। हर
तेरच्॥ उद्यमनार्थं सूत्रं। कवचहरः कुमारः। आङि ताच्छील्ये॥ पुष्पाण्याहरति तच्छीलः
पुष्पाहरः। अर्हः। अच् स्यात् कर्मण्युपपदे। पूजार्हा ब्राह्मणी। स्तंबकर्णयो रमिज
पोः॥ अच्। हस्तिसूचकयोरिति वक्तव्यं॥ स्तंबेरमो हस्ती। कर्णेजपः सूचकः। शमि धा

खशेते। अच्। खेशेते खशयः। पार्श्वादिषूपसंख्यानं। पार्श्वाभ्यां शेते पार्श्वशयः
पृष्ठशयः। चरेष्टः। अधिकरणे उपपदे। कुरुचरः। भिक्षासेनादायेषु च। भिक्षा
चरः। सेनाचरः। आदायेति ल्यबंतं। आदायचरः। आदायचरः। कृञो हेतु
ताच्छील्यानुलोम्येषु॥ एषु द्योत्येषु कृञष्टः॥ अतः कृकमिकंसकुंभपात्रकु
शाकर्णीष्वनव्ययस्य॥ अतः उत्तरस्यानव्ययविसर्गस्य समासे नित्यं सादेशः स्को
साद्विषु परेषु॥ यशस्करी विद्या। श्राद्धकरः। वचनकरः॥ दिवाविभानिशाप्रभाभा
स्करांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाहु
हर्यत्तद्धनुररुष्षु॥ एषु कृञष्टो हेत्वादावपि। दिवाकरः॥ निशाकरः। विभाकरः। प्र
स्कादित्वात्सः। भास्करः। बहुकरः। किंकरः। अहस्करः। धनुष्करः। अरुष्करः। इत्यादि।
न शब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु॥ एषु कृञष्टो न॥ शब्दकारः॥ स्तं

।स्तंबशकृतोरिन्।व्रीहिवत्सयोरिति।वाच्यं।स्तंबकरिर्व्रीहिः।शकृत्करिर्वत्सः।हरतेर्दृतिना
थयोः पशौ॥ दृतिहरिः। नाथं नासारज्जुं हरतीति नाथहरिः पशुः। फलेग्रहिरात्मंभरिश्च। एते
निपात्येते। चात्कुक्षिंभरिः। चाद्वात्स्नात्मोदरकुक्षिर्वीति पेठुः। [illegible]
शोराहृतिमुरादेः। एजेः खश्। ण्यंतादेजेः खश् स्यात्। अरुर्द्विषदजंतस्य मुम्। अरुषो द्वि
षतोऽजंतस्य च मुमागमः स्यात् खिदंते परे न त्वव्ययस्य। शित्वाच्छबादिः। जनमेजय
तीति जनमेजयः॥ वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यः खश्॥ वातमजा मृगाः॥
खित्यनव्ययस्य। ह्रस्वः॥ शुनिंधयः। तिलंतुदः। शर्धंजहा माषाः। नासिकास्तनयोर्ध्माधे
टोः। स्तने धेटः। नासिकायां ध्मश्चेति वक्तव्यं। स्तनंधयः। नासिकंधमः। टित्वात्स्तनंधयी
नाडीमुष्ट्योश्च॥ ध्माधेटोः खश्। यथासंख्यं नेष्यते। नाडिंधमः। नाडिंधयः। मुष्टिं
धमः। मुष्टिंधयः। उदि कूले रुजिवहोः। खश्। कूलमुद्रुजः। कूलमुद्वहः। वहाभ्रे लिहः॥

वहस्तंभस्तंलेढीतिवहंलिहोगौः ॥ अभ्रंलिहोवायुः ॥ परिमाणेपचः ॥ खश्च ॥ प्रस्थंपचा स्थाली ॥ खारिंपचः ॥ कटाहः ॥ मितनखेच ॥ मितंपचाब्राह्मणी ॥ नखंपचायवागूः ॥ विधु रुषोस्तुदः ॥ विधुंतुदः ॥ अरुंतुदः ॥ असूर्यललाटयोर्दृशितपोः ॥ असूर्यमितिअस मर्थसमासः ॥ दृशिनानञः संबंधात् । असूर्यंपश्यापाराजदाराः ॥ ललाटंतपः सूर्यः । उग्रंपश्ये रंमदपाणिंधमाश्च । एतेनिपात्यंते ॥ प्रियवशेवदःखच् । प्रियंवदः । वशंवदः । गमेःसु पिवाच्यः । मितंगमोहस्ती । विहायसोविहच ॥ गमेःखच् ॥ खच्चडिद्वावाच्यः । विहंगमः । वि हंगः । भुजंगमः । भुजंगः । द्विषत्परयोस्तापे । खच् । खचिह्रस्वः । खचिपरेणोपधाया ह्रस्वः । द्विषंतपः वा तापयति द्विषंतपः । परंतपः । वाचियमोव्रते । खच् । वाचंयमः पुरंद रेच । वाक्शब्दस्यअमंतत्वं निपात्यते । वाचंयमोमौनव्रती । व्रतेकिं । अमात्यादिनावाचंयच्छतीति

वाग्यामः। पूःसर्वयोर्दारिसहोः। खच्। पुरंदारयतीति पुरंदरः। सर्वंसहः। भगंदारयतीति भगं
दरः इति कथं। बाहुलकात्। सर्वकूलाभ्रकरीषेषुकषः। खच्। सर्वंकषः खलः।
कूलंकषा नदी। अभ्रंकषो वायुः। करीषंकषा वात्या। मेघर्त्तिभयेषु कृञः।
खच्। मेघंकरः। ऋतिंकरः। भयंकरः। भयशब्देन तदंतविधिः। अभयंकरः
क्षेमप्रियमद्रे ऽण् च। इक्‌ऽग्रो ऽस्मात् खच्। क्षेमंकरः। क्षेमकारः। प्रियंकरः।
प्रियंकारः। मद्रंकरः। मद्रकारः। कथं तर्हि अल्पारंभात् क्षेमकारा इति। कर्मण्यण् शेष
त्वविवक्षायां पचाद्यच्। एवं गंगाधरभूधरादयः। आशिते भुवः करणभावयोः
। खच्। आशितो भवत्यनेन आशितंभवः। ओदनः। आशितस्य भवनं आशितंभ
वः। संज्ञायां भृतॄवृजिधारिसहितपिदमः। खच्। विश्वं बिभर्तीति विश्वंभरः। रथंतरं

सामापतिंवराजन्या।शत्रुंजयोहस्ती।युगंधरःपर्वतः।शत्रुंसहः।शत्रुंतपः अरिंदमः।
गमश्च।सुतंगमः। अंतात्यंताध्वदूरपारसर्वानंतेषुडः।गमेः। अंतगः।सर्वत्रपन्नयोर्वा
च्यं।सर्वत्रगः।पन्नंपतितंगच्छतीतिपन्नगः।उरसोलोपश्च।उरसागच्छतीतिउर
गः।सुदुरोरधिकरणे।सुखेनगच्छंत्यत्रसुगः।दुर्गः। अन्यत्रापिदृश्यतिवाच्यं।ग्राम
गः।गडिच्चविहायसोविहादेशोवाच्यः।।विहायसागच्छतिविहगः।। आशिषिहनः
शत्रुंवध्यात्शत्रुहः।। आशिषिकिं।शत्रुघातः।।दारावाहणोणंतस्यचटः
संज्ञायां।।दारुशब्देउपपदे आङ्पूर्वाद्धंतेरण्यंतस्य।।दार्वाघाटः।।चारौवा।। चार्वा
घातः। अपेक्लेशतमसोः।। अपपूर्वाद्धंतेर्डः।। अनाशीरर्थमिदं।। क्लेशापहः।पुत्रः
तमोपहः सूर्यः।।कुमारशीर्षयोर्णिनिः।।कुमारघाती।।शीरसःशीर्षभावोनिपात्यते।

शीर्षघाती॥ लक्षणे जायापत्योष्टक्॥ हतेष्टक् लक्षणवाति कर्त्तरि॥ जायाघ्नो ना॥ पति घ्नी पाणिरेखा॥ पित्तघ्नं घृतं॥ वातघ्नं तैलं॥ अमनुष्ये कर्तृके इति किं॥ आखुघातः शू द्रः॥ अघकथं॥ बलभद्रः प्रलंबघ्नः शत्रुघ्नः कृतघ्न इत्यादि॥ मूलविभुजादित्वात् सिद्धं॥ हतेष्टक्॥ मनुष्यक र्तृके नरघाती नरघातो हस्तीति वा हुलकादक्॥ शक्तौ हस्तिकपाटयोः॥ हतेष्टक्॥ मनुष्यक र्तृकार्थमिदं॥ हस्तिघ्नो ना॥ कपाटघ्नश्चोरः॥ कवाडेति पाठांतरं॥ पाणिघताडघौ शिल्पि नि॥ शिल्पिनि किं॥ पाणिघातः॥ ताडघातः॥ राजघ उपसंख्यानं॥ राजानं हंति रा जघः॥ आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ॥ कृत्रः करणे ख्युन्॥ एषु च्व्यर्थेषु च्व्यंतेषु कृत्रः ख्युन्॥ अनाढ्यमाढ्यं कुर्वत्यनेन यान् आ ढ्यंकरणी॥ अच्वौ किं॥ आढ्यीकुर्वत्यनेन॥ कर्त्तरि भुवः खिष्णुच् खुकञौ॥ आढ्यादिषु च्व्यर्थेषु च्व्यंतेषु भवतेरेतौ स्तः॥ अनाढ्य आढ्यो भवति आढ्यं भविष्णुः॥

आद्यंभाकुकः॥सतसू द्विषद्रुहदुहयुज विदभिदछिदजिनीराजानुपसर्गेपि
क्विप्॥रुभ्यः क्विबुपसर्गेसत्यसतिच सुप्युपपदे॥द्युसत्‌। सदिरप्रतेरिति षः
उपानिषत्‌॥ अंडस्तु। प्रसूः मित्रद्विट्‌। प्रद्विट्‌। मित्रध्रुक्‌। प्रध्रुक्‌। गोधुक्‌।
प्रधुक्‌। अश्वयुक्‌। प्रयुक्‌। वेदवित्‌। निवित्‌। अग्रग्रामाभ्यां नियते
र्णोवाच्यः। अग्रणीः। ग्रामणीः। भजो ण्विः। अंशभाक्‌। अदोनन्ने। वि
ड्स्यात्‌। आममत्तीत्यामात्‌। सस्यात्‌। अतन्नेकिं। अन्नादः। क्रव्येच॥
अदेर्विट्‌। पूर्वेण सिद्धे वचनं वासरूपेति प्राप्ताऽण् बाधनार्थं। क्रव्यात्‌
आममांसभक्षकः। दुहः कप्‌ घश्च। कामदुघा। अन्येभ्योपि दृश्यंते॥मनि
न्क्वनिप्‌वनिप्‌विच्‌ एते प्रत्ययाः धातोः स्युः॥ तेजइरिङ्गति॥ वसादेः ड
तद्वृण्न्॥

सुशर्मा। प्रातरित्वा। विड्वनोरनुना सिकस्यात्। विजायतेइति विजावा। ओणृ अपनयने। अवा
वा। रोट्। रेट्। सुगण्। क्विप् च। अयमपि दृश्यते। सत्सूद्विषेतिस्यैव प्रपंचः। उखास्र
त्। पर्णध्वत्। वाहभ्रट्। अंतः। पदांतस्यानितेर्नस्यणः स्वंस्यादुपसर्गस्याणि
नितात्परस्यैव। हेमाप। शासः क्कौ उपधायाइत्वंवाच्यं। आशीः। इत्वोत्वे।
गीः। पूः। मोनोधातोः। प्रतान्। प्रशान्। गमः क्वौ। अनुनासिकलोपः। अंगगत्
गमादीनामितिवक्तव्यं। परितत्। संयत्। ऊङ्च। गमादीनामितिवक्तव्यं। लो
पश्च। गूः। भ्रूः। स्यः छ्वः। चात्क्विप्। संस्योः। संस्याः। सुप्यजातौ णिनिस्ता
छील्ये। अजात्यर्थेसुपिधातोर्णिनिस्ताछील्येद्योत्ये। उष्णभोजी। शीतभोजी।
मनः। सुपिमन्यते र्णिनिः। दर्शनीयमानी। आत्ममानेखश्च। स्वकर्मकेमनने
वर्तमानान्मन्यतेः सुपिखश्च वा णिनिः। पंडितंमात्मानंमन्यते पंडितमन्यः॥

पंडितमानी। इच्चरकाचोम्प्रत्ययवच्च। इजंतादेकाचोम्स्यात् सच स्वाद्यमवत् ॥ विदंतेप
रे। ओतोम्शसोः। गांमन्यः। वाम्शसोः। स्त्रियंमन्यः स्त्रीमन्यः। नृ नरंमन्यः। भुवंमन्यः॥
श्रीयमात्मानंमन्यते श्रिंम। न्यंकुलं। भाष्यकार प्रयोगा ह्रीशब्दस्य ह्रस्वः। मुममोरभावश्च। भ्नते।
अधिकारोयंवर्त्तमाने लडितियावत्। करणेयजः। करणे उपपदे भूतार्था धजे णिनिः। कर्त्त
रि। सोमेनेष्टवान् सोमयाजी। कर्मणि हनः। पितृव्यघाती। ब्रह्मभ्रूणवृत्रेषु क्विप्। ब्रह्महा।
भ्रूणहा। वृत्रहा। क्विप् चेत्येव सिद्धे ब्रह्मादिषु क्विवेव हंतेरेवेति त्रिविधनियमार्थमिदं सू
त्रं। एवमग्रेपि। सुकर्मपापमंत्रपुण्येषु कृञः। सुकृत्। कर्मकृत्। पापकृत्। मंत्रकृत्। पु
ण्यकृत्। सोमे सुञः। सोमसुत्। अग्नौ चेः॥ अग्निचित्। कर्मण्यग्न्याख्यायां॥ कर्मण्युपप
दे कर्मण्येव चकारके चिनोतेः क्विप् अग्न्याधारस्थलविशेषस्याख्यायां॥ श्येनइव
चितः श्येनचित्॥ कर्मणीनिविक्रियः। कर्मण्युपपदे विपूर्वात् क्रीणातेरिनिः। कुत्सितग्र
हणं कर्त्तव्यं। सोमविक्रयी। घृतविक्रयी। दृशेः क्वनिप्। कर्मणि भूते। पारं दृष्टवान् पारदृश्वा॥ ९९

राजन्नियुध्विद्भुनः। क्तनिष्ठा युधिरं तमा विततएवर्थो। राजानं योधितवान् राजयुध्वा। राज
कुत्वा॥ सहे च। सहयुध्वा। सहकृत्वा। सप्तम्यां जनेर्डः॥ तत्पुरुषे कृतिवहुलं डेः रलुक्। स
रसिजं। सरोजं। उपसर्गे च संज्ञायां। जनेर्डः। प्रजा। अनौ कर्मणि। अनुपूर्वाञ्जनेः क
र्मण्युपपदे डः। पुमांसमनुरुध्य जाता पुमनुजा। अन्येष्वपि दृश्यते। अजः। द्विजः। ब्राह्म
णजः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वंतरादपि क्वचित्परि
खाता परिखा। पंचम्यामजातौ। जातिशब्दवर्जिते पंचम्यंते जनेर्डः। संस्कारजः। अद
ष्टजः। क्तक्तवतू निष्ठा। एतौ निष्ठासंज्ञौ स्तः। निष्ठाभूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र तयोरेवे
ति भावकर्मणोः क्तः। कर्तरि क्तवदिति क्तवतुः। स्नातं मया। स्तुतस्त्वया विष्णुः॥ विश्वं
कृतवान्॥ निष्ठायामण्यदर्थे। ण्यदर्थो भावकर्मणी ततोऽन्यत्र निष्ठायां क्षियो दी
र्घः स्यात्॥ क्षियो दीर्घात् निष्ठातस्य नः॥ क्षीणवान्। भावकर्मणोस्तु क्षितः॥ कामोम
या। उर्णोनुवत्भावो वाच्यः। तेन एकाच्त्वान्नेट्। उर्णुतः। रदाभ्यां निष्ठातो नः पूर्वस्य
च दः॥

रदाभ्यांपरस्य निष्ठातस्य नो निष्ठापेक्षया पूर्वस्य धातोर्दस्य च। स्तृ। शीर्णः। छिन्नः भिन्नः। संयोगादेरातो धातोर्यण्वतः॥ यण्वत्संयोगादेरादंता न्निष्ठातस्य नः। द्राणः। ग्लानः। ल्वादिभ्यः। एकविंशतेर्लूञादिभ्यः प्राग्वत्। लूनः। ज्या। ग्रहि ज्या। हलः। अंगावयवाद्धलः परं यत्संप्रसारणं तदंतस्यांगस्य दीर्घः। जीनः॥ दुग्वो दीर्घश्च। दुगतौ। दूनः। गूनः। पूञो विनाशे। निष्ठातस्य नः॥ पूना यवा विनष्टा इत्यर्थः। पूतमन्यत्॥ सिनोतेर्ग्रासकर्मकर्तृकस्य॥ निष्ठातस्य नः सिनो ग्रासः। ग्रासेति किं। सितापाशेन सूकरी। कर्मकर्तृकस्येति किं॥ सितो ग्रासो देवदत्तेन। ओदितश्च प्राग्वत्। भुजो। भुग्नः। टुओश्वि। शूनः। द्रवमूर्तिस्पर्शयोः श्यः। द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे ङः। संप्रसारणं स्या न्निष्ठायां। श्योऽ

स्पर्शे।। श्यैङो निष्ठातस्य नोऽस्पर्शेऽर्थे। शीनं घृतं। अस्पर्शे किं। शीतं जलं। द्रवमूर्त्तिस्पर्शयो
रिति किं। संश्यानो वृश्चिकः। शीतात्संकुचित इत्यर्थः। प्रतेश्च। संप्रसारणं निष्ठायां। प्रतिशीनः।। वि
भाषाभ्यवपूर्वस्य।। श्यैङः संप्रसारणं वा निष्ठायां। अभिश्यानं। अभिशीनं वा घृतं। अवश्या
नो अवशीनो वृश्चिकः। व्यवस्थितविभाषेयं। तेनेह न। समवश्यानः। अंचोनपादाने। निष्ठा
तस्य नः। यस्य विभाषा। यस्य क्वचिद्वेड्विहितस्ततो निष्ठाया इण्न। उदितो वेति क्त्वायां वे
ट्त्वादिह नेट्। समक्नः। अनपादाने किं। उदक्तमुदकं कूपात्। दिवो विजिगीषायां। नि
ष्ठातस्य नः। द्यूनः। विजिगीषायां तु द्यूतं।। निर्वाणोऽवाते। अवात इति पदच्छेदः।। निर्वा
णाते निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्त्ता न। निर्वाणो मुनिर्दीपो वा।। वाते तु निर्वातो वातः। शु
षः कः।। निष्ठातस्य। शुष्कः। पचो वः। पक्वः। क्षायो मः। क्षामः। स्त्यः प्रपूर्वस्य।। प्रात्स्त्यः सं
प्रसारणं निष्ठायां। प्रस्त्योऽन्यतरस्यां। निष्ठातस्य मो वा।। प्रस्तीमः। प्रस्तीतः। प्रात्किं।।
स्त्यानः। अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः। एते निपात्यन्ते।। फुल्लवेकादेशाः

१०१ षीदं निपातनमिष्यते। फुल्लः। फुल्लवान्। अनुपसर्गात्किं। आदितश्च। आफारेतोति
षायादृएनस्याद्। तिचू। चरफलोरत उत्स्यात्तादोकिति। प्रफुल्लः। प्रक्षीवितः। प्रक्षिशितः
प्रोक्षाघितः। कथंतर्हि लोधद्रुमंसानुमतः प्रफुल्लमिति। फुल्लविकसने। पचाद्यच्। तत्र
उत्फुल्लोदि निहत्यर्थे। उत्फुल्लसंफुल्लयोरुपसंख्यानं। नुदविदोंदत्राघ्राह्रीभ्योन्य
तरस्यां॥ निष्ठातस्यनोवा॥ नुन्नः॥ नुत्तः। विन्नः। वित्तः। उंदी। भ्रीदितोनिष्ठायां॥
श्वयतेरीदितश्च निष्ठायादृएनः। उन्नः। उत्तः। इत्यादि। नध्याख्यापृमूर्छिमदां॥
एभ्यो निष्ठातस्यनोन। ध्यातः। ख्यातः। पूर्त्तः। राल्लोपः। छ्वोःशूडनुनासिके
दोच प्रत्यये। मूर्त्तः। मत्तः। वित्तो भोगप्रत्यययोः॥ विंदतेर्निष्ठांतस्य निपातोयं। भोग्ये
प्रतीते चार्थे। वित्तं धनं। वित्तः पुरुषः। अनयोः किं। विन्नः। वित्तः। भित्तं शकलं
भिन्नमन्यत्। ऋणमाधमर्ण्ये। ऋतमन्यत्। स्फायः स्फी निष्ठायां। स्फीतः। इएने

ष्ठायां ॥ निरः कुषो निष्ठायां मिट् ॥ यस्य विभाषेति निषेधे प्राप्ते पुनर्विधिः ॥ निरुषितः व
सति क्षुधौ रिट् ॥ आभ्यां क्त्वा निष्ठयोरिट् नित्यं ॥ उषितः । क्षुधितः । अंचेः पूजायां ॥
पूजार्थादंचतेः क्त्वा निष्ठयोरिट् ॥ अंचितः । गतौ तु अक्तः । लुभो विमोहने ॥ क्त्वा निष्ठ
योरिट् न तु गार्ध्ये ॥ लुभितः । गार्ध्ये तु लुब्धः ॥ क्लिशः क्त्वा निष्ठयोः ॥ इड्वा ॥ क्लिशितः
क्लिष्टः । पूङः श्च ॥ क्त्वा निष्ठयोरिड्वा ॥ पूङः क्त्वा च ॥ निष्ठा सेट् ॥ क्लिन्नः स्यात् ॥ पवितः । पूतः ॥ क्त्वा ग्रहण
मुत्तरार्थं ॥ नोपधा दित्यत्र हि क्त्वैव संबध्यते ॥ निष्ठा शीङ् स्विदि मिदि क्ष्विदि धृषः ॥ सेट् निष्ठा
क्लिन्नः । शयितः । आदिकर्मणि निष्ठा वक्तव्या ॥ आदिकर्मणि क्तः कर्त्तरि च ॥ वाज्ञावकर्मणोः ॥ वि
भाषा भावादिकर्मणोः ॥ आदितो निष्ठायामिड्वा ॥ प्रस्वेदितश्चैत्रः ॥ प्रस्वेदितं तेन ॥ ञिष्विदा इति भ्वा
दिरत्र गृह्यते ॥ ञिद्भिः साहचर्यात् ॥ स्विद्यतेस्तु स्विदित इत्येव ॥ ञिमिदा ञिक्ष्विदा दिवादि भ्वा
दी च ॥ प्रमेदितः । प्रक्ष्वेदितः । प्रधर्षितः । धर्षितं तेन । सेट् किं । प्रस्विन्नः । स्विन्नं तेनेत्यादि । मृष

स्तितिष्ठायां।सेट्‌निष्ठाक्रिन्न।मर्षितः।क्षमायांकिं।अपमृषितंवाक्यं।अविस्पष्टमित्यर्थः॥उ
दुपधाद्भावादिकर्मणोरन्यतरस्यां।उदुपधात्पराभावादिकर्मणोःसेट्‌निष्ठावाकित्स्यात्‌।
द्युतितं।द्योतितं।मुदितं।मोदितंसाधुना।प्रद्युतितः।प्रद्योतितः।प्रमुदितः।प्रमोदितःसाधुः।उदु
पधात्किं।विदितं।भावेत्यादिकिं।रुचितं।कार्षापणं।सेट्‌किं।क्रुष्टं।शब्विकरणेभ्यएवेष्यते।नेह
गुधपरिवेष्टने।गुध्यतेर्गुधितंनिष्ठायांसेटि।णेर्निष्ठः।भावितः।भावितवान्‌।दृढःस्थूलबल
योः॥स्थूलेबलवतिचदृढइतिनिपात्यते।दधातेर्हिः।तादौकिति।विहितं।दोदद्घोः॥घुसंज्ञस्य
दाइत्यस्यदथ्‌तादौकिति।चर्त्वं।दत्तः।गत्यर्थाकर्मकश्लिषशीङ्‌स्थासवसजनरुहजीर्यतिभ्य
श्च॥एभ्यःकर्तरिक्तःस्याद्भावकर्मणोश्च।गंगांगतः।गंगांप्राप्तः॥ग्लानःसः।लक्ष्मीमाश्लिष्टो
हरिः।शेषमधिशयितः॥घ्यतिस्यतिमास्थामितिकिति।एषामिकारोन्तादेशस्तादौकिति॥वै
कुंठमधिष्ठितः॥शिवमुपासितः।हरिदिनमुपोषितः।राममनुजातः।गरुडमारूढः।विश्वम
नुजीर्णः॥

पक्षे प्राप्ता गंगा तेनेत्यादि॥ क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः॥ एभ्योधिकरणे क्तः
स्याच्चाद्यथा प्राप्तं॥ मुकुंदस्यासितमिदमिदं शयितं रमापतेः। भुक्तमेतदनंतस्येत्यूचुर्गोप्यो दि
दृक्षवः॥१॥ पक्षे आसेरकर्मकत्वात्कर्त्तरि भावे च। आसितो मुकुंदः। आसितं तेन
गत्यर्थेभ्यः कर्त्तरि कर्मणि च॥ रमापतिरिदं यातः॥ तेनेदं यातं॥ भुजेः कर्मणि। भु
क्तं तेनेदं भुक्तं। वर्त्तमाने इत्यधिकारस्य। ञीतः क्तः। ञिधृषः। मतिबुद्धिपूजार्थेभ्यश्च
राज्ञां मतः। इष्टः। बुद्धः। विजितः। पूजितः। अर्चितः। चकारोक्तसमुच्चया
र्थः। शीलितो रक्षितः। क्षांतः। आक्रुष्टो जुष्टः। इत्यादि। नपुंसके भावे क्तः। क्लीबत्वविशि
ष्टे भावे कालसामान्ये क्तः। जल्पितं। हसितं। सुयजोर्ङ्वनिप् भूते। सुत्वा। यज्वा। जीर्य
तेरतृन्। भूत इत्येव। जरन्। जरंतौ। वासरूपेण न्यायेन निष्ठापि। जीर्णो जीर्णवान्। छंद
सि लिट्। लिटः कानज्वा। क्वसुश्च। भूतसामान्ये छंदसि लिट् तस्य कानच् क्वसुर्वा स्तः॥

१०३

तङ्गनावाल्मीकिपदं ॥ चक्राण ॥ म्नोश्च । जगन्वान् । अवयस्तु वाकुलत्वात् लोके पि
प्रयुंज्यते । तं तस्थिवांसं नगरोपकंठे श्रेयांसि सर्वाण्यधिजग्मुषस्ते इत्या
दि । वस्वेकाजाद्घसां । कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिड्
नान्येषां ॥ आदिवान् । आतिवान् । ददिवान् । जक्षिवान् । एषां किं । वभूवा
न् । भाषायां सदवसश्रुवः ॥ सदादिभ्यो भूतसामान्ये भाषायां लिट् वा तस्य च क्वसुः नित्यं
निषेदुषीमासनबंधधीरः । अध्यूषुषस्तामभवज्जनस्य । सश्रुश्रुन्मा
तरि भार्गवेन । उपेयिवाननाश्वाननूचानश्च ॥ एते निपात्यंते । उपादिणो
लिट् तस्य च नित्यं क्वसुः ॥ द्वद् । उपेयिवान् । नात्रोपसर्गस्तंत्र । ईयिवान्
समीयिवान् । नञ्ञ् । पूर्वादश्नातेः क्वसुरिडभावश्च । अनाश्वान् । अनो
र्वचेः ॥ कर्तरि क्तानच् । वेदस्यानुवचनं कृतवान् । अनूचानः । लटः शतृ

शानचावप्रथमासमानाधिकरणे। अप्रथमांतेन समानाधिकरणे लृटः एतौ वा स्तः। पचं
तं चैत्रं पश्य। आने मुक्। अंगस्यातः। पचमानं चैत्रं पश्य। लडित्यनुवर्त्तमाने पुनर्लड्ग्रहणा
त् प्रथमासमानाधिकरणेपि क्वचित्। सन् द्विजः। ईदासः। आनस्य। आदेः परस्य। आ
सीनः। विदेः शतुर्वसुः। वेत्तेः परस्य शतुर्वसुरादेशो वा। विदन्। विद्वान्। तौ सत्। तौ सत्
शानचौ सत्संज्ञौ स्तः। लृटः सद्वा। करिष्यंतं करिष्यमाणं पश्य। आक्वेस्तच्छीलतद्धर्मतत्
साधुकारिषु। क्विपमभिव्याप्य वक्ष्यमाणास्तच्छीलादिषु कर्तृषु बोध्याः। तृन्। कर्त्ता। कथ
न्। स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्य आलुच्। आद्यास्त्रयश्चुरादावदंताः। स्पृहया
लुः। शीङो वाच्यः। शयालुः। कृपालुः। स्पृधिलुरिति कथं। कृपां लातीति विग्रहे कुप्रत्यया
तः। अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्॥
अलंकरिष्णुः। भुवश्च। छंदसि। भविष्णुः। माघे कथं तर्हि जगत्प्रभोरप्रभविष्णु वैष्णव
मिति। निरंकुशाः कवयः। ग्लाजिस्थश्च ग्स्नुः। गिदयं न तु कित्। तेन स्थ ईत्वं न। ग्लास्नुः। गि

त्वान्न गुणः। जिघृक्षुः। स्पर्धिस्नुः। चाक्रुवः। च्युकः। क्ङितीत्यत्र गकारप्रश्लेषात् नेट्। भ्रूक्षुः। ग्लसिग्रधि
धृषिक्षिपेः क्नुः। त्रस्नुः। गृध्नुः। धृष्णुः। क्षिप्नुः। शमित्यष्टाभ्यो घिनुण्। उकार उच्चारणार्थ इति का
शिका। अनुबंध इति भाष्यं। तेन शमिनितरा शमिनीतरे त्यत्र उगितश्चेति ह्रस्वविकल्पः। न चैवं श
मीशमिना मित्यादौ नुम्प्रसंगः। झल्ग्रहणमाद्यव्यञ्जनान्तानामेव तद्विधानात्। नोदात्तोपदे
शस्येति वृद्धिनिषेधः। शमी तमीत्यादि। संपृचानुरुधाङ्माङ्यसपरिसृसंसृजपरिदेविसं
ज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्य
जरजभजातिचरापचरामुषाभ्याहनश्च॥ एभ्यो घिनुण् स्यात्। संपर्कीत्यादि। को
कषलसकत्थस्रंभः घिनुण्। विकाषी। अपेचलषः। घिनुण्। चाषी। अपला
षी। विलीषी। चलनशब्दार्थादकर्मकाद्युच्। चलनार्थेभ्यः शब्दार्थेभ्यश्च युच् स्यात्॥
चलनः। चोपनः। कंपनः। शब्दनः। रवणः। अकर्मकात् किं। पठिता विद्या॥ अनुदात्ते
तश्च हलादेः। अकर्मकाद्युच्। वर्त्तनः। अनुदात्तेतः किं। भविता। हलादेः किं। एधिता॥

अकर्मकात् किं। वसिता वस्त्रं। निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवा
दिव्याभाषासूयो वुञ्॥ एभ्यो वुञ्। निंदकः। हिंसकः। देविकुशोश्चोपसर्गे॥
वुञ्। आदेवकः। आक्रोशकः। उपसर्गे किं। देविता। क्रोष्टा। लषपतपदस्था
भूवृषहनकमिगमिशॄभ्य उकञ्। लाषुकः। पातुकः। जल्पभिक्षकुट्टलुंटवृ
ङः षाकन्। जल्पाकः। सनाशंसभिक्ष उः। चिकीर्षुः। आशंसुः। भिक्षुः॥ यश्च
यङः। यातेर्यङंताद्वरच्। अतो लोपः। तस्य च परस्मिन्निति स्थानिवद्भावे प्रा
प्ते। न पदांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥ प
दस्य चरमावयवे द्विर्वचनादौ च परनिमित्तोजादेशो न स्थानिवदद
तियलोपं प्रति स्थानिवद्भावनिषेधाल्लोपो व्योर्वलीति यलोपः। अचोप
स्य स्थानिवत्वमाश्रित्यालोपे प्राप्ते वरे लुप्तं न स्थानिवत्। यायावरः। ताच्छी

१०५

लवयोरवचन शक्तिपुष्वानश्र। अग्नौ सुत्ता नः। कवनं विभानः। शत्रु निघ्नानः। भ्राज
भासधुर्विद्युतोर्जि पृजुग्रावस्तुवः क्विप्। विभ्राट्। भाः। धूः। विद्युत्। ऊर्क्। पूः। इति
ग्रहणस्यापकर्षणाज्जवतेदीर्घः। जूः। ग्रावस्तुत्॥ क्विब्वचिप्रच्छायतस्तुकटप्रुजुश्री
णां दीर्घो संप्रसारणं च। वक्तीति वाक्। प्रच्छतीति प्राट्। आयतं स्तौति आयतस्तूः। कटंप्रु
वते कटप्रूः। जूरुक्तः। श्रयति हरिं श्रीः। ध्यायतेः संप्रसारणं च। ध्यायतीति धीः। दाम्नी
शसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। दाबादेः ष्ट्रन् करणेर्थे। दात्यनेनदा
त्रं। नेत्रं। तितुत्रतथसिसुसरकसेषु च। एषां दशानामिण्न। शस्त्रं। योत्रं। योक्त्रं। स्तोत्रं।
तोत्त्रं। सेत्रं। सेक्त्रं। मेढ्रं। पत्त्रं। दंष्ट्रा। नद्ध्री। हलसूकरयोः पुवः। पूङ् पूञोः करणे ष्ट्रन्स्यात
त्तेच्चकरणं हलसूकरयोरवयवः। हलस्य सूकरस्य वा पोत्रं। मुखमित्यर्थः। अर्तिलूधू
सूखनसहचरइत्रः। अरित्रं। लवित्रं। धवित्रं। सवित्रं। खनित्रं। सहित्रं। चरित्रं। पुवः सं
ज्ञायां। पवित्रं। अथोणादयः। कृवापाजिमिस्वदिसाध्यशूभ्य उण्। करोतीति कारुः। आ

तायुः ॥ वायुः । पायुः । गुदं । जायुरौषधं । मायुः पित्तं । स्वादुः । साध्नोति परकार्यमिति साधुः । आशुः । शीघ्रमित्यादि ॥ हरिमितयोर्द्रुवः । द्रु गतौ । हरिमितयोरुपपदयोः कुः सच कित् । हरिभिर्द्रूयते हरिद्रुः । मितं द्रवति मितद्रुः समुद्रः । शतेच । शतं धा द्रवति शतद्रुर्नदीभेदः । अंडूः कूः जंबूः कफेल्कर्कंधूः दिधिषूः । एते ऊप्रत्ययांता निपात्यंते ॥ शमेर्ढः । बाहुलकादित्संज्ञाभावः स्वरयादेशश्च न भवति । शंढः स्यात्पुंसि गोपतौ । कमेरठः । कमठः कच्छपे पुंसि भांडभेदे नपुंसकमिति मेदिनी । रमेर्वृद्धिश्च । रामठं हिंगुः । शमेः खः । शंखः । कणोष्ठः । कणठः । अमंताड्डः । अमिति प्रत्याहारः । दंडो स्त्रीलिंगुडे पिस्यादित्यमरः । रंडा प्रषककपर्युंचविधवायाश्चयोषितीदृ तिमेदिनी ॥ खंडोस्त्री शकलेनेक्षु विकारमणिभेदयोरिति मेदिनी । मन ज्ञाने । मंडः पंचांगुले शाकभेदे क्लीवं तु मस्तुनि दृतिमेदिनी । पति चंडाभ्यां मालत्र । पातालं नागलोके स्याद्विवरे वडवानलेदृति मेदिनी । चंडालो मातंगः । प्रज्ञादित्वाद्दणि चांडालोपी त्युज्ज्वलदत्तः । तत्र । कुलालवरुडकर्मारनिषादचंडाल

लभित्वाभिर्वोध्य छंदसीति चंडालशब्दात् स्वार्थे अणं विदधता वार्त्तिककृतैतत् भाष्येन च स
हविरोधात्॥ गन् गम्यद्योः॥ गंगा। अद्भुः पुरोऽग्रशः। भृञः कित् नुट् च॥ भृञो गन् कित्
स्यात् सनुट् च। भृंगाः पिङ्गालि धूम्याटाः॥ भृश्यते ईस्वच्छ॥ भृंगं। अर्तिस्तुसुहुसृधृ
क्षिक्षुभायावापदियक्षिनीभ्यो मन्। एभ्यो ऽवतुर्दशाभ्यो मन्॥ अर्मश्चद्रूरोगः॥
स्तोमः। सोमः। होमः। सर्मो गमनं। धर्मः। क्षेमं कुशलं। क्षोम। भामः। आदित्यः। यामः। वामः॥ रो
मन्द्रुहयोः। पद्मं। यक्ष्मो रोगराजः। नेमः। अवतेः टिलोपश्च॥ मन्प्रत्ययस्यायं टिलो
पो न तु प्रकृतेः। अन्यथा डिदित्येव ब्रूयात्। ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च॥ एषा
[illegible] मुपधावकारयोरूठ् कौ झलादावनुनासिके च प्रत्यये अत्र क्विप् इति नानुव
र्त्तते॥ अवतेस्तु निहते ओनुरिति दर्शनात्। स्वरादिपाठादव्ययत्वं। अवती
त्विलिं॥ ग्रसेरा च॥ ग्रामः॥ अविसिविसिषुषिभ्यः कित्॥ ऊमं नगरं। स्यूमो रश्मिः। सिमः सर्वः

श्रुश्रमग्निसमीपयोः। घर्मः। घृधातोर्निपातोयं। ग्रीष्मः। ग्रसतेर्निपातोयं। अश्मपुबि
लटिकरिणिखदिविशिभ्यः कन्॥ अश्वः। पुं घः स्याद्धनुसूर्ययोः॥ लद्वापत्तिभेदः फ
लंच। कएवंपापं। खद्वा। विश्वं। कनिनुवृबितद्विराजिजन्विदुप्रतिदिवः। यो
तीतियुवा। वृषा इंद्रः। तक्षा। राजा। धन्वा। मरुः। मरुर्धन्वशरासनं। द्युवास्व
र्गः। प्रतिदीव्यंत्यस्मिन्प्रतिदिवा दिवसः। उक्षिकुषिगार्तिभ्यस्थन्। कोष्ठः।
कोष्ठं। गाथा। अर्थः। पातृतुदिवचिरिचिसिचिभ्यस्थक्। पीथोरविः घृतंपीथं
तीर्थंशास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु॥ अवतारर्षिजुष्टांभस्त्री रजः
सुवविश्रुतइतिविश्वः। तुत्थो ग्निः। उक्थंसामभेदः। रिक्थं। बाहुलकाद्दचोर
पि। अप्नवस्थमह्व्यां धनं वसु। सिक्थं। प्राग्वदिभ्यांडो। गोः। नौः। चिरव्ययं। डो

२०७

रित्येव। मैत्रे करोति॥ छन्ते जांतइति सिद्धे नियमार्थमिदं। उणादिप्रत्ययांत

श्चांत एवेति। गमेडों। गौर्नादित्ये पत्नीवर्दे निरणाकतुभेदयोः॥ स्त्री तु स्यादिशि भारत्यां भू

मौ च सुरभावपि॥ नृ स्त्रियोः स्वर्गवज्रांबुरश्मिदृग्बाणलोमसु॥ वाजुलना छुतेरपि

डो॥ द्यौः स्त्री स्वर्गांतरिक्षयोः॥ रातेडैः॥ राः॥ भ्रमेश्चडूः॥ भ्रूः॥ उंदेर्नलोपश्च॥

चाद्युच्॥ ओदनः॥ गमेर्गश्च॥ चाद्युच्। गगनं॥ टुवृधूजि मंदि निधाञः

क्युः॥ किरणः। पुरणः। समुद्रः। इजनमंतरिक्षं। मंदनं स्तोत्रं। निधनं कुल

नाशयोः। धृष्वेर्धिषच संज्ञायां॥ धिषणो गुरुः॥ धिषणा धीः। नप्तनेष्टृ

त्वष्टृ होतृ पोतृ भ्रातृ जामातृ पितृ दुहितृ॥ एते तृन् तृजंता निपात्यंते॥ न

प्ताइत्यादि। सावसेर्ऋन्। स्वसा। यतेर्वृद्धिश्च॥ भार्यास्तु भ्रातृवर्गस्य या

तरः स्युः परस्परं॥

नामि च नंदे ॥ नञ् पूर्वान्नंदेर्ण्वुच् स्त्रियां ॥ ननंदा तिनन्दांदा इह वृद्धिर्नातु वर्त्तते इत्येके ॥ ननांदा तु स्वसा पत्युर्ननंदा नंदिनी च सेति शब्दार्णवः ॥ न घते र्ड्डिच्च ना नरो ॥ अर्चि शुचि हु सृपि छादि छर्दिभ्य इस्सिः ॥ अर्चिः शोचिः । दीप्तिः । हविः । सर्पिः । इस्मन्त्रन्क्विषु च ॥ छादेर्ह्रस्वः स्यात् । छदिः पटलं । छर्दिः वंहेर्नलोपश्च । वर्हिर्नाम कुशः स्रुप्रगोः । द्युतेरिसिन्नादेश्च जः । ज्योतिः । जनेरुसिः । जनुर्जननं । अर्ति पॄ वपि यजि तनि धनि तपिभ्यो नित् । अरुः । परुः । वपुः । यजुः । तनुः । धनुः । धनुषी । धनुरस्त्रियां तपुः । सूर्योऽग्निः शत्रुश्च । एते सिध्द्वा । आयुः । आयुषी । चक्षेः शिच्च चक्षुः मुहेः किच्च मुहुरव्ययं । पानीविषिभ्यः पः । रस्वा स्मादासान मितिपापं ।

तद्योगात्पापः। नेप्तः। पुरोहितः। वेप्यः। पानीयं॥ स्तुवोर्दीर्घश्च। स्तूपः। समुच्छ्रा
यः। शुसृभ्यां निच्च। चादग्नित। सूपः। बाहुलकादुत्वं। शूर्पः। कुयुभ्यां च। कुव
ति मंडूका अस्मिन्निति कूपः। युवंति बध्नंति पशुमस्मिन्निति यूपः। खष्प
शिल्पशष्पबाष्परूपपर्पतल्पाः। सप्तैते पप्रत्ययांता निपात्यंते। स्तनिहृषि
पुषिगदिमदिभ्यो णेरित्नुच्॥ अयामितेति णेरयः स्तनयित्नुः हर्षयित्नुः। पोषयित्नुः॥
गदयित्नुः। मदयित्नुः मदिरा अशेः सरः अक्षरं वसेश्च वत्सरः। संपूर्वाच्चित्। सं
वत्सरः। कृशृशलिकलिगर्दिभ्योऽभच्। करभः। शरभः। शलभः। कलभः। गर्दभः। ऋ
षिवृषिभ्यां कित्। ऋषभः। वृषभः। रासिवल्लिभ्यां च। रासभः। वल्लभः। नियो मिः। ने
मिः। अर्तेरूच्च। ऊर्मिः। भुवः कित्। भूमिः। अंगेर्नलोपश्च। अग्निः। वहिश्रिश्रुयुद्रुग्ला

हात्वरिभ्योणित् । वह्निः । श्रेणिः । श्रोणिः । योनिः । द्रोणिः । ग्लानिः । हानिः । तूर्णिः । पातेर्डतिः ।
पतिः । सृङः क्रिः । सृरिः । अदिशदिभूशुभिभ्यः क्रिन् । अद्रिः । शद्रिः । शर्करा । भूरिः । प्रचुरं ।
शुभ्रिर्ब्रह्मा । वलिमलितनिभ्यः कयन् । वलयं । मलयः । तनयः । माछाससिभ्यो यः । माया
छाया । सस्यं । बाहुलकात्सुनोतेः । सव्यं दक्षिणवामयोः । जनेर्यक् । येविभाषा । जन्यं । मुद्धं । स
र्वधातुभ्य इन् । पचिः । रंगिः । तुडिः । तुंडिः । वलिः । वटिः । यजिः । काशात इति काशिः । पातिः । म
लिः । केलिः । मसीपरिणामे । मसिः । नंदिः । कनिः । हरिर्विष्णावहाविंद्रभेके सिंहे हये रवौ । चंद्रे
कीलेश्चवंगे च यमे वाते च शीर्तितः । इगुपधात्कित् । कृषिः । ऋषिः । शुचिः । मनेरुच्च ॥
अतः मुनिः । जनिघसिभ्यामिण् । जनिर्जननं । घासिर्भक्ष्यमग्निश्च । अच इः । रविः । तरिः
पविः । कविः । अरिः । कुडिकम्प्योर्नलोपश्च । कुडिः । कपिः । इषेः क्सुः । इक्षुः । छषेर्वत्से

१०४ नकस्यात । ह्रस्वः वर्णः । दाभाभ्यां नुः । दानुः । दाता । भानुः । विषेः किञ्च । विष्वं वेवेष्टि व्याप्नोति विष्णुः । सितनि गमिमसि जनि सच्यवि धान्क्रुशिभ्यस्तुन् । सेतुः । तंतुः । जंतुः । गंतुः । मस्तु दधिमंडं । सक्तुः । ओतुः । धातुः । क्रोष्टा । अवितृस्तृतंत्रिभ्य ईः । अवीर्नारी रजस्वला । तरीः । स्तरीः । तंत्री । यापोः किद्द्वे च । पपीः । पपीस्यात्सोमसूर्ययोः ॥ वातप्रमीनिपातोयं । लक्षेर्दर्शनांकनयोः । लक्षेर्मुट् च । लक्ष्मीः । सर्वधातुभ्यो मनिन् कर्म । चर्म । भस्म । जन्म । शर्म । स्थाम । बृंहेर्नोच्च । नः । नकारस्य अकारः । ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः । नामन् सीमन् व्योमन् रोमन् लोमन् पाप्मन् ध्यामन् ॥ समेते निपात्यंते । सातिभ्यां मनिन्मनिणौ । साम । आत्मा । हनिमशिभ्यां सिकन् । हंसिका हंसयोषिति । मक्षिका । गिरउड्च । गरुडः । म्हे हृम्भसोऽद्धिः । शरत् । दरत् हृदयकूलयोः । भसत् जघनं । त्यजतनियजिभ्यो डित् । त्यद्

तद् । यद् । एतेस्तुट् च । एतद् । युष्यसिभ्यां मदिक् । त्वं । अहं । इदेः कमिन्नलोपश्च ॥
। इदम् । कायतेर्डिमिः । किम् । सर्वधातुभ्यष्ट्रन् । वस्त्रं । अस्त्रं । अमिचिमिदिशसि
भ्यः क्त्रः । अन्त्रं । चित्रं । शित्रं । शास्त्रं । पुवो ह्रस्वश्च । पुत्रः । स्त्यायतेर्ड्रट् । स्त्री । स्तृचेः
स्मन् । तल्म । पातेर्डुमसुन् । पुमान् । वसेस्तिः । वस्तिर्नभेरधो द्वयोः । सावसेः स्व
स्तिः । वौ तसेः । वितस्तिः । सर्वधातुभ्योऽसुन् । चेतः । सरः । पयः । अशेः देवने
युट् च । देवनेस्तु तौ । यशः । उब्जेर्बलोपश्च । ओजः । अयतेः स्वांगे शि
रसिश्च । अयतेः शिर आदेशोऽसुन् सिश्च । शिरः । अर्त्तेरुच्च । उरः । भूरंजिभ्यां कित् । भुवः
रजः । वसेर्णित् । वासो वस्त्रं । चंदेरादेश्च छः । छंदः । पचिवचिभ्यां सुट् चापत्तसीतुस्त्व
तोपत्तौ । वक्षः । नञि हन एह च । अनेहा ॥ ४ ॥ विधाञो वेध च । वेधाः । चंद्रे मो डिच्च । चं
द्रोपपदान्माङोऽसिः स च डित् । चंद्रमाः । उषः कित् । उषः । सर्त्तेरपूर्वादसिः । आये

११०

ग्रायंभूस्मि। अप्सरसः। वशेःकनसि। उशना। अदिभुवोडुतच्। अद्भुतं। गुधेर्ऊमः। गोधूमः
तहेःक्नो हलोपश्च। तृणं। उदिचेडैसिः। उच्चैः। नौदीर्घश्च। नीचैः। पृओयसुगंधश्च स्वश्चायत्
प्रत्ययो गुगागमश्च। पुण्यं। उदि दृणातेरजलौ पूर्वपदांत्यलोपश्च। उदरं। डित्खुनेमु
ट्चोदात्तः। अच्च्अलचडित्धातोर्मुद्। मुखं। अमेःसन्। अंसः। मुहेःखोमूर्च। मूर्खः। नहे
र्हलोपश्च। नखः। शीङोह्रस्वश्च। शिखा। माङ्ऊखोमयच। मयूखः। जनेष्टन्नलोप
श्च। जटा। क्लिशेरन्‌ललोपश्च। केशः। फलेरितजादेश्च पः। पलितं। कृञादिभ्यः संज्ञा
यांवुन्। करकः। कटकः। नरकोनारकेपि चेति द्विरूपकोशः। चीकयतेराद्यंत विप
र्ययश्च। कीचकः। जनेररष्ठच। जठरं। हर्यतेर्कन्यन्। हिरण्यं। कृञःपासः। क
र्पासः। बिल्वादित्वात् कार्पासं॥ उर्णोतेर्डः। ऊर्णा। दधातेर्यत्नुट्‌च। धान्यं। चते
रुरन्। चत्वारः। प्रातेरन्। प्रातः। अमेस्तुट्। अंतः। दहेर्गोलोपोदश्च नः। गम्लु
योधातोरंत्यस्यलोपोदश्च नः। नगः। हंतेरच्घुरच। घोरं। तरतेड्रिः। त्रयः। ग्रहेरनिः॥

ग्रहणिः। प्रथेरमच्। प्रथमः। चरेश्च। चरमः। मंगेरलच्। मंगलं। उणादयो बहुलं। एते व
र्त्तमाने संज्ञायां बहुलं स्युः। केचिदविहिता अप्यूह्याः॥ संज्ञासु धातुरूपाणि प्रत्यया
श्च ततः परे॥ कार्याद्विद्यादनूबंधमेतच्छास्त्रमुणादिषु॥ इत्युणादयः॥ तुमन्ण्वुलौ
क्रियायां क्रियार्थायां॥ क्रियार्थायां क्रियायामुपपदे धातोरेतौ स्तः। मांतत्वादव्ययत्वं
कृष्णं द्रष्टुं याति। कृष्णं दर्शको याति। कालसमयवेलासु तुमन्। कालः समयो वेला वा
भोक्तुं। भावे सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्॥ पाकः। अकर्त्तरि च कारके सं
ज्ञायां। कर्तृभिन्ने कारके घञ्॥ घञि च भावकरणयोः॥ रंजेर्नलोपः॥ रागः॥ अनयोः
किं। रज्यत्यस्मिन्निति रंगः॥ निवासचितिशरीरोपसमाधानेष्वादेश्च कः॥ एष्वर्थे
षु चिनोतेर्घञ् आदेश्च कः॥ उपसमाधानं राशीकरणं॥ निकायः॥ आकायः। कायः॥
गोमयनिकायः॥ एरच्॥ इवर्णांतादच्॥ चयः॥ ऋदोरप्॥ ऋवर्णांतादुवर्णांतादप्

करः। गरः। शरः। यवः। लवः। स्तवः। पवः। घञर्थे कविधानं। प्रस्थः। विघ्नः। ड्वितः क्त्रिः
भावे प्रभावात्। क्त्रेर्मम् नित्यं।। क्त्रिप्रत्ययांतान्मप् निर्वृत्तेर्थे। पाकेन निर्वृत्तं पक्त्रि
मं। डुवप्। उप्त्रिमं। ट्वितोऽथुच्। अयमपि भावे। टुवेपृ। वेपथुः। यजयाचयत
विच्छप्रच्छरक्षो नङ्। यज्ञः। याच्ञा। यत्नः। विच्छि तिशः। विश्नः। प्रश्नः। रक्ष्णः। स्वपो न
न्।। स्वप्नः। उपसर्गे घोः किः। प्रधिः। उपाधिः। कर्मण्यधिकरणे च।। किः। जलानि धीयं
तेऽस्मिन् जलधिः। स्त्रियां क्तिन्। स्त्रीलिंगे भावादौ क्तिन्।। घञोऽपवादः।। कृतिः। स्तुतिः।
ऋल्वादिभ्यः क्तिन्निष्ठावद्वक्तव्यः। तेन नत्वं। कीर्णिः। गीर्णिः। लूनिः। धूनिः। पूनिः। संप
दादिभ्यः क्विप्। संपत्। विपत्। आपत्। क्तिन्नपीष्यते। संपत्तिः। विपत्तिः। आपत्तिः।।
ऊतियूतिजूतिसातिहेतिकीर्तयश्च।। एते निपात्याः।। इच्छ। यप्। इच्छा। शच। इच्छतेः
शः स्यात् चात् क्तिन्। प्रकरणं प्रक्रिया। इष्टिः। इच्छा। इषेर्निपातोऽयं। अः प्रत्ययात्।।
प्रत्ययांतेभ्यः स्त्रियामकारप्रत्ययः। चिकीर्षा। पुत्रकाम्या। गुरोश्च हलः।। गुरुमतो हलंता

तस्त्रियामप्रत्ययः। ईहा। ऊहा। षिद्भिदादिभ्योऽङ्। जृष्। ऋदृशोऽङि गुणः। जरा। त्रपूष्। त्रपा। भिदा। विदारणस्वायां। भित्तिरन्या। छिदा। मृजा। कृपेः संप्रसारणं च। कृपा। आतश्चोपसर्गे। अङ्। उपदा। ण्यासश्रन्थो युच्। अस्यापवादः। धारणा। आसना। श्रंथना॥ रोगाख्यायां ण्वुल् बहुलं। प्रच्छर्दिका। प्रवाहिका। विचर्चिका। क्वचिन्न। शिरोर्त्तिः। धात्वर्थनिर्देशे ण्वुल् वक्तव्यः। आसिका। इक्श्तिपौ धातुनिर्देशे। पचिः। पचतिः। वर्णात्कारः। अकारः। ककारः। रादिफः। रेफः। नपुंसके भावे क्तः। ल्युट् च। हसितं। हसनं करणाधिकरणयोश्च। ल्युट्। अनुमानः। अनुमानी। पुंसि संज्ञायां घः प्रायेण। छादेर्घेऽद्व्युपसर्गस्य। द्विप्रभृत्युपसर्गहीनस्य ह्रस्वो वि। दंतच्छदः। आकुर्वत्यस्मिन्निति आकरः। अवे तृस्त्रोर्घञ्। अवतारः। अवस्तारो जवनिका। हलश्च। हलंतात् घञ्। घापवादः। रमंते योगिनो अस्मिन्निति रामः। अपमृज्यतेऽनेन व्याध्यादिकमपामार्गः। ईषद्दुःसुषु कृच्छ्राऽकृच्छ्रार्थेषु खल्। एषु दुःख सुखार्थेषूपप

देषुखलु। तयोरेवेतिभावकर्मणोश्च॥ ईषद्दुःकरः कटो भवता। ईषत्करः सुकरः। आतोयुच्॥ खलोपवादः॥ ईषत्पानः सोमो भवता॥ दुष्पानः सुपानः। आवश्यकाधमर्ण्ययोर्णिनिः॥ अवश्यंकारी। शतंदायी॥ कृत्याश्च। तथा। अवश्यंसेव्यो हरिः॥ शतंदेयं॥ क्तिच्क्तौ च संज्ञायां॥ आशिषि॥ वातिर्वायुः। शिवो देयादेनं शिवदत्तः अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा॥ प्राचामिति पूजार्थं॥ प्रतिषेधयोरलंखल्वोरुपपदयोः क्त्वा। दोदद्घोः॥ घुसंज्ञस्य दा इत्यस्य दथ् तादौ किति। अलंदत्वा। घुमास्थेतीत्वं॥ पीत्वा खलु। अलंखल्वोः किं। मा कार्षीः प्रतिषेधयोः किं। अलंकारः। समानकर्तृकयोः पूर्वकाले॥ समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा॥ अव्ययकृतो भावे॥ भुक्त्वा व्रजति॥ द्वित्वमतंत्रं॥ स्नात्वा भुक्त्वा पीत्वा सुखं व्रजति। न क्त्वा सेट्। सेट् क्त्वा किन्न॥ शयित्वा। सेट् किं। कृत्वा। रलो व्युपधाद्धलादेः संश्च॥ इवर्णोवर्णोपधाद्धलादेर

त्वंतासंरोत्कासनौसेरौवाक्तितौस्तः धुनित्वा द्योतित्वा लिखित्वा लेखित्वा सुपधा
ह्लिं वर्तित्वा रलः किं सेवित्वा हलादिः किं एषित्वा सेट्किं गुत्का उदितोवा उदितः
परस्यक्त्वाइट्‌स्या शमित्वा शान्त्वा देवित्वा धूत्वा दधातेर्हिः हित्वा जहातेश्चक्ति
हित्वा हाङःस्थ हात्वा समासेऽनञ्पूर्वेक्त्वोल्यप् अव्ययपूर्वे पदेऽनञ्समासे
क्त्वोल्यबादेशः नृकृ प्रकृत्य अदाजग्धिर्ल्यप्तिकिति प्रजग्ध्वा वदितिपर्थः या
वज्जीवमधीते निमूलसमूलयोः कषः कर्मण्युपपदे कषादिषु यथाविध्यनु
प्रयोगः यस्मात्सगुलुक्तःसरवानुप्रयोक्तव्यः निमूलकाषंकषति समू
लकाषंकषति निमूलंसमूलंकषतीत्यर्थः शुष्कचूर्णरूक्षेषुपिषः एषुक
र्मसुपिषेर्णमुल् शुष्कपेषंपिनष्टि शुष्कंपिनष्टीत्यर्थः चूर्णपेषं रूक्षपे
षं समूलाकृतजीवेषुहनकृञ्ग्रहः कर्मणीत्येव समूलघातंहन्ति अकृतका
रंकरोति जीवग्राहंगृह्णाति जीवंतंगृह्णातीत्यर्थः करणेहनः पादघातंहन्ति
पादेनहन्तीत्यर्थः स्नेहनेपिषः स्निह्यतेयेनतस्मिन्करणेपिषेर्णमुल् उदपे

मं०कौ०
११३
113

यंपिनष्टि उदकेनपिनष्टीत्यर्थः हस्तेवर्त्तिग्रहोः हस्तार्थेकरणे हस्तवर्त्तंवर्त्तय
ति करवर्त्तं हस्तेनगुलिकांकरोतीत्यर्थः हस्तग्राहंगृह्णाति करग्राहं पाणि
ग्राहं स्वेपुषः करणइत्येव स्वइत्यर्थग्रहणं तेनस्वरूपेपर्यायविशेषेषुचणमु
ल् स्वपोषंपुष्णाति धनपोषं गोपोषं समासत्तौ तृतीयासप्तम्योर्णमुल्
सन्निकर्षे केशग्राहंयुध्यंते हस्तग्रहंयुध्यंते स्वांगेतस्प्रत्ययेकृभ्वोः क्त्वा
णमुलौ मुखतः कृत्य मुखतः कृत्वा मुखतःकारं मुखतोभूय मुखतो
भूत्वा मुखतोभावम् इतिकृत्प्रक्रिया प्रातिपदिकार्थलिंगपरिमाण
वचनमात्रेप्रथमा नियतोपस्थितिकः प्रातिपदिकार्थः मात्रशब्दस्यप्रत्येकंयो
गः प्रातिपदिकार्थमात्रेलिंगमात्राद्याधिक्येसंख्यामात्रेचप्रथमास्यात् प्राति
पदिकार्थमात्रे उच्चैः नीचैः कृष्णः श्री ज्ञानं लिंगमात्रे तटः तटी तटं परि
माणमात्रे द्रोणोव्रीहिः वचनंसंख्याएकः द्वौ बहवः संबोधनेच प्रथमा हेरा
म कर्तुरीप्सिततमंकर्म कर्तुःक्रियपाप्तुमिष्टतमंकारकंकर्मसंज्ञंस्यात् के

राम
११३

लंतात्संयोगात्कासनौसमेदीवाकितोस्तः द्युतित्वा द्योतित्वा लिखित्वा लेखित्वा व्युपधा
त्किं वर्तित्वा रलः किं सेवित्वा हलादेः किं एषित्वा सेट् किं भुक्त्वा उदितोवा उदितः
परस्य क्त्वा इड्वा शमित्वा शांत्वा देवित्वा द्यूत्वा दधातेर्हिः हित्वा जहातेश्च क्त्वि
हित्वा हाङ् स्तु हात्वा समासेऽनञ्पूर्वे क्त्वो ल्यप् अव्ययपूर्वे पदेऽनञ्समासे
क्त्वो ल्यबादेशः तुक् प्रकृत्य अदोजग्धिर्ल्यप्तिकिति प्रजग्धादित्यर्थः या
वज्जीवमधीते निमूलसमूलयोः कषः कर्मण्युपपदे कषादिषु यथाविध्यनु
प्रयोगः यस्मात्स णमुल् तेनैवानुप्रयोक्तव्यः निमूलकाषं कषति समू
लकाषं कषति निमूलसमूलं कषतीत्यर्थः शुष्कचूर्णरूक्षेषु पिषः एषु क
र्मसु पिषेर्णमुल् शुष्कपेषं पिनष्टि शुष्कं पिनष्टीत्यर्थः चूर्णपेषं रूक्षपे
षं समूलाकृतजीवेषु हन्कृञ्ग्रहः कर्मणीत्येव समूलघातं हंति अकृतका
रं करोति जीवग्राहं गृह्णाति जीवंतं गृह्णातीत्यर्थः करणे हनः पादघातं हंति
पादेन हंतीत्यर्थः स्नेहने पिषः स्निह्यते येन तस्मिन्करणे पिषेर्णमुल् उदपे

[illegible] तं देवानेदमध्यापयद्धिविं आसयत्सलिले पृथ्वीयः समेघी हरिरूयति
नोवदेशान्तं नाययति वाहयति वा भारं भृत्येन नियन्तृकर्तृकस्य वहतेर्निषे
धः वाहयति रथं वाहान् सूतः आदिखाद्योर्न आदयति खादयति वान्नं व
टुना भक्षेरहिंसार्थस्य तु न भक्षयत्यन्नं बटुना अहिंसार्थे किं भक्षयति
बलीवर्दान्सस्यं जल्पतिप्रभृतीनामुपसंख्यानं जल्पयति भाषयति पुत्रं देव
दत्तः दृशेश्च दर्शयति हरिं भक्तान् च शब्दायतेर्न शब्दाययति देवदत्तेन हृक्रो
रन्यतरस्यां हृक्रोरणौ कर्ता संज्ञा वा कर्म स्यात् हारयति कारयति भृत्येन भृत्यं
वा कटं अभिवादिदृशोरात्मनेपदे वेति वाच्यं अभिवादयते दर्शयते देवं भक्त
नम् तैर्वा अधिशीङ्स्थासां कर्म अधिपूर्वाणामेषामाधारः कर्म स्यात् अधि
शेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः अभिनिविशश्च अभिनिपूर्व
स्य विशतेराधारः कर्म स्यात् अभिनिविशते सन्मार्गं कश्चित् पाप
भिनिवेशः उपान्वध्याङ्वसः उपादिपूर्वस्य वसतेराधारः कर्म स्यात् उपवस

र्मणि द्वितीया अनुक्ते कर्मणि द्वितीया स्यात् हरिं भजति अभिहिते तु कर्मादौ प्रथमा ह
रिः सेव्यते लक्ष्म्या सेवितः शान्तः प्राप्तानन्दः क्रमादमुं नारद इत्यबोधि सः अकथितं च
अपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्यात् दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशा
सुजिमथ्मुषां कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहां गां दोग्धि पयः बलिं याच
ते वसुधां तण्डुलानोदनं पचति गर्गान् शतं दण्डयति व्रजमवरुणद्धि गां माणवकं प
न्थानं पृच्छति वृक्षमवचिनोति फलानि माणवकं धर्मं ब्रूते शास्ति वा शतं जयति देवद
त्तं सुधां क्षीरनिधिं मथ्नाति देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वह
ति वा अर्थनिबन्धनेयं संज्ञा बलिं भिक्षते वसुधां माणवकं धर्मं भाषते अभिधत्ते
वक्तीत्यादि अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योध्वा च कर्मसंज्ञक इति वा
च्यं कुरून् स्वपिति मासमास्ते गोदोहमास्ते क्रोशमास्ते गतिबुद्धिप्रत्यवसाना
र्थशब्दकर्माकर्मकाणामणिकर्ता स णौ गत्यर्थानां शब्दकर्मकाणामकर्मकाणा
ञ्चाणौ यः कर्ता स णौ कर्म स्यात् शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् आशयच्चाम

मा॰कौ॰
११५
115

उक्तसंज्ञाः सुः लक्षणे वृक्षं प्रति पर्यनु वा विद्योतते विद्युत् इत्थंभूताख्याने भक्तो विष्णुं
प्रति पर्यनु वा भागे लक्ष्मीर्हरिं प्रति पर्यनु वा वीप्सायां वृक्षं वृक्षं प्रति सिंचति ए
सुः किं परिषिंचति अभिरभागे भागवर्जे लक्षणादावभिरुक्तसंज्ञः हरिमभि
वर्तते भक्तो हरिमभि देवं देवमभिसिंचति अभागे किं यदत्र ममाभिष्यात्तद्दी
यतां सुः पूजायां अतिरतिक्रमणे च पूजायामतिरुक्तसंज्ञः सुसिक्तं सु
स्तुतं अतिदेवान्कृष्णः कालाध्वनोरत्यंतसंयोगे द्वितीया मासं कल्याणी
मासमधीते मासं गुडधानाः क्रोशं कुटिला नदी क्रोशमधीते क्रोशं गिरिः
अत्यंतसंयोगे किं मासस्य द्विरधीते क्रोशस्यैकदेशे पर्वतः स्वतंत्रः कर्तेति कर्तृसं
ज्ञा साधकतमं करणं क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् कर्तृकरणयो
स्तृतीया अनभिहिते कर्तरि करणे च तृतीया स्यात् रामेण बाणेन हतो वाली प्र
कृत्यादिभ्य उपसंख्यानं प्रकृत्या चारुः प्रायेण याज्ञिकः गोत्रेण गार्ग्यः समेनैति
विषमेणैति द्विद्रोणेन धान्यं क्रीणाति पंचकेन पशून्गृह्णाति सुखेन दुःखेन

राम
११५

नयातीत्यादि द्विवः कर्मच द्विवः साधकतमंकर्मसंज्ञंस्याज्ञात्करणसंज्ञं अश्वैरश्मान्या
दीव्यति सहयुक्तेऽप्रधाने सहार्थेनयुक्तेऽप्रधानेतृतीया पुत्रेणसहागतःपिता स
वंसार्कंसार्द्धंसमयोगेपि विनापितृतीयागंतृतीया वृद्धोयूनेतिनिर्देशात् येनांग
विकारः येनांगेनविकृतेनांगिनोविकारोलक्ष्यतेततस्तृतीया अक्ष्णाकाणः
अक्षिसंबंधिकाणत्वविशिष्टइत्यर्थः अपवर्गेतृतीया अपवर्गःफलप्राप्तिःतस्मिं
द्योत्यायांकालाध्वनोरत्यंतसंयोगेतृतीयास्यात् अह्नाक्रोशेनवानुवाकोधीतः
हेतौ तृतीया दंडेनघटः इत्थंभूतलक्षणे तृतीया जटाभिस्तापसः जटाज्ञाप्य
तापसत्वविशिष्टइत्यर्थः संज्ञोन्यतरस्यांकर्मणि संपूर्वस्यज्ञानातेःकर्मणितृती
या पित्रापितरंवासंजानीते कर्मणायमभिप्रैतिससंप्रदानं दानस्यकर्मणायम
भिप्रैतिससंप्रदानसंज्ञः चतुर्थीसंप्रदाने विप्रायगांददाति क्रियमायमभिप्रै
तिसोपिसंप्रदानं पत्येशेते परिक्रयणेसंप्रदानमन्यतरस्यां नियतकालंभृत्या

मा॰कौ॰
११६
116

स्वीकरणंपरिक्रयणं तस्मिन्साधकतमंकारकंसंप्रदानंवाशतेनशतायवापरिक्रीतः
तादर्थ्येचतुर्थीवाच्या मुक्तयेहरिंभजति उत्पातेनज्ञापितेच वातायकपिलाविद्यु
त् नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च एभियोगेचतुर्थी हरयेनमः प्रजाभ्यः
स्वस्ति अग्नयेस्वाहा पितृभ्यःस्वधा अलमितिपर्याप्त्यर्थग्रहणं तेनदैत्येभ्योहरि
रलंप्रभुःसमर्थःशक्तइत्यादि ध्रुवमपायेपादानं अपायोविश्लेषस्तस्मिन्साध्ये
वधिभूतमपादानं अपादानेपंचमी ग्रामादायाति धावतोश्वात्पतति इत्यादि
जनिकर्तुःप्रकृतिः जायमानस्यहेतुरपादानंस्यात् ब्रह्मणःप्रजाःप्रजायंते ल्यब्लो
पिकर्मण्यधिकरणेच प्रासादात्प्रेक्षते आसनात्प्रेक्षते प्रासादमारुह्य आसने
उपविश्यप्रेक्षतइत्यर्थः विभाषागुणेस्त्रियां गुणेहेतावस्त्रीलिंगेपंचमीवास्यात्
जाड्याज्जाड्येनवाबद्धः गुणेकिं धनेनकुलं अस्त्रियांकिं बुद्ध्यामुक्तः विभाषेति
योगविभागादगुणेस्त्रियांचक्वचित् धूमादग्निमान् नास्तिघटोऽनुपलब्धेः पष्य

एम
११६

ग्विनानानाभिस्तृतीयान्यतरस्यां एभिर्योगे तृतीया स्यात्पंचमी द्वितीया च पृथग्रामे
ण रामाद्रामं वा एवं विनानाना अन्यारादितरर्ते दिक्शब्दांचूत्तरपदाजाहियुक्ते
पंचमी अन्य इत्यर्थग्रहणं इतरग्रहणं प्रपंचार्थं अन्यो भिन्न इतरो वा कृष्णात् आ
राद्वनात् ऋते कृष्णात् पूर्वो ग्रामात् दिशि दृष्टः शब्दः दिक्शब्दः तेन संप्रति देश
कालवृत्तिना योगेपि भवति चैत्रात्पूर्वः फाल्गुनः प्राक्प्रत्यग्वा ग्रामात् आचू दक्षि
णा ग्रामात् आहि दक्षिणाहि ग्रामात् अपपरी वर्जने कर्मप्रवचनीयौ स्तः आङ्
मर्यादावचने उक्तसंज्ञः वचनग्रहणादभिविधावपि पंचम्यपाङ्परिभिः एतैः क
र्मप्रवचनीयैर्योगे पंचमी अपहरेः संसारः परिहरेर्वर्जने साहचर्यात् लक्षणादे
स्तु हरिं परि आमुक्तेः संसारः आसकलाद्ब्रह्म प्रतिः प्रतिनिधिप्रतिदानयोः कर्म
प्रवचनीयः प्रतिनिधिप्रतिदानेन यस्मात् अत्र कर्मप्रवचनीयैर्योगे पंचमी प्रद्युम्नः
कृष्णात्प्रति तिलेभ्यः प्रतियच्छति माषान् षष्ठी शेषे कारकप्रातिपदिकार्थव्यति
रिक्तः स्वस्वामिभावादिः संबंधः शेषस्तत्र षष्ठी राज्ञः पुरुषः कर्मादीनामपि संबं

षमात्रविवक्षायांषष्ठ्येव सतांगतं सर्पिषोजानीते मातुःस्मरति एधोदकस्योपस्कु
रुते भजेशंभोश्चरणयोः फलानांतृप्तः कर्तृकर्मणोःकृति कृद्योगेकर्त्तरिकर्म
णिचषष्ठी कृष्णस्यकृतिः जगतःकर्त्ताकृष्णः गुणकर्मणिवेष्यते नेताश्वस्यस्रु
घ्नंस्रुघ्नस्यवा कृतिकिं तद्धितेमाभूत् कृतपूर्वीकटं उभयप्राप्तौकर्मणि उभ
योःप्राप्तिर्यस्मिन्कृतितत्रकर्मण्येवषष्ठी आश्चर्यंगवांदोहोऽगोपेन कृत्यानां
कर्त्तरिवा षष्ठी मयाममवासेव्योहरिः क्तस्यचवर्त्तमानेवर्त्तमानार्थक्तस्ययोगे
षष्ठी नलोकेतिवक्ष्यमाणनिषेधस्यापवादः राज्ञांमतःबुद्धःपूजितोवा अधि
करणवाचिनश्च क्तस्ययोगेषष्ठी इदमेषांशायितं नलोकाव्ययनिष्ठाखलर्थ
तृनां एषांप्रयोगेषष्ठीन लादेशाः कुर्वन् कुर्वाणःसृष्टिंहरिः उ हरिंदिदृक्षुः
अलंकरिष्णुर्वा उक दैत्यान्घातुकोहरिः कमेरनिषेधः लक्ष्म्याःकामुकः
अव्यय जगत्सृष्ट्वा निष्ठा दैत्यान्हतवान् विष्णुनाहतादैत्याः खलर्थ ईषत्क
रःप्रपंचोहरिणा तृन्निति प्रत्याहारः शतृशानचौवितिन्नृशब्दादारभ्यतृनोन

कारणत् शानन् सोमंपवमानः चानश् आत्मानंमंडयमानः शतृ वेदमधीयन्
तृन् कर्त्ता लोकान् द्विषः शतुर्वा मुरस्यमुरंवाद्विषन् सर्वोयंकारकषष्ठ्याः प्रतिषे
धः शेषषष्ठीतुस्यादेव ब्राह्मणस्यकुर्वन् नरकस्यजिष्णुः अकेनोर्भविष्यदाधमर्ण्य
योः भविष्यत्यकस्यभविष्यदाधमर्ण्यार्थेनश्चयोगेषष्ठीन् सतःपालकोवतरति
व्रजंगामी शतंदायी निमित्तपर्यायप्रयोगेसर्वासांप्रदर्शनं किंनिमित्तंवसति के
ननिमित्तेन कस्मैनिमित्तायेत्यादि एवंकिंकारणं कोहेतुः किंप्रयोजनमित्यादि
प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीयेनस्तः ज्ञानेन निमित्तेनहरिःसेव्यः ज्ञाना
यनिमित्तायेत्यादि षष्ठ्यतसर्थप्रत्ययेन ग्रामस्यदक्षिणतः पुरःपुरस्तात् उपरिष्टु
परिष्टात् एनपाद्वितीया एनपेतियोगविभागात्षष्ठ्यपि दक्षिणेनग्रामं ग्रामस्य
वा एवमुत्तरेण दूरांतिकार्थैः षष्ठ्यन्यतरस्यां एतैर्योगेषष्ठीपंचमीच दूरंनिकटं
वाग्रामस्यग्रामाद्वा दिवस्तदर्थस्य द्यूतार्थस्यक्रयविक्रयरूपव्यवहारार्थस्यचदि
व कर्मणिषष्ठी शतस्यदीव्यति तदर्थस्यकिं ब्राह्मणंदीव्यति स्तौतीत्यर्थः वि

म०कौ०
११८
118

भाषोपसर्गे शानस्यशालंवाप्रदीव्यति आधारोधिकरणं कर्तृकर्मद्वारा तन्निष्ठक्रि
याया आधारः कारकं अधिकरणं सप्तम्यधिकरणे च चाद्दूरान्तिकार्थेभ्यः
औपश्लेषिको वैषयिको भिव्यापकश्चेत्याधारस्त्रिधा कटे आस्ते स्थाल्यां पच
ति मोक्षेइच्छास्ति सर्वस्मिन्नात्मास्ति: वनस्यदूरे अन्तिके वा क्तस्येन्विषयस्य क
र्मण्युपसंख्यानं अधीती व्याकरणे साध्वसाधुप्रयोगे च साधुः कृष्णो मातरि
असाधुर्मातुले निमित्तात्कर्मयोगे चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुंजरं केशे
षु चमरीं हन्ति सीम्नि पुष्कलको हतः यस्य च भावेन भावलक्षणं यस्य क्रियया
क्रियान्तरं लक्ष्यते ततः सप्तमी गोषु दुह्यमानासु गतः षष्ठी चानादरे अनादरा
धिके भावलक्षणे षष्ठीसप्तम्यौ स्तः रुदति रुदतो वा प्राव्राजीत रुदन्तं पुत्रादिक
मनादृत्य संन्यस्तवानित्यर्थः स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च
षष्ठीसप्तम्यौ स्तः गवां गोषु वा स्वामी आयुक्तकुशलाभ्यां चासेवायां आभ्यां यो
गे षष्ठीसप्तम्यौ स्तः आयुक्तो व्यापारितः आयुक्तः कुशलो वा हरिपूजने हरिपू

राम
११८

जनस्यवा आसेवायांकिं आयुक्तोगौः शकटे ईषद्युक्तइत्यर्थः यतश्चनिर्धारणं जाति
गुणक्रियासंज्ञाभिः समुदायादेकदेशस्यपृथक्करणंयतस्ततः षष्ठीसप्तम्यौस्तः न
णांनृषुवाब्राह्मणःश्रेष्ठः गवांगोषुवाकृष्णागौर्बहुक्षीरा गच्छतांगच्छत्सुवाधावन्
शीघ्रः छात्राणांछात्रेषुवामैत्रःपटुः पंचमीविभक्ते विभागोविभक्तं निर्द्धार्यमा
णस्ययत्रभेदएवतत्रपंचमी माथुराःपाटलिपुत्रेभ्यआढ्यतराः साधुनिपुणाभ्या
मर्चायांसप्तम्यप्रतेः मातरिसाधुर्निपुणोवा अर्चायांकिं निपुणोराज्ञोभृत्यः इह
तत्त्वकथनेतात्पर्यं अप्रत्यादिभिरितिवक्तव्यं साधुर्निपुणोवामातरंप्रतिपर्यनुवा
अधिरीश्वरे स्वस्वामिसंबंधेधिःकर्मप्रवचनीयः यस्मादधिकंयस्यचेश्वरवच
नंतत्रसप्तमी अत्रकर्मप्रवचनीययुक्तेसप्तमी उपपरार्द्धेहरेर्गुणाः परार्द्धा
दधिकाइत्यर्थः ऐश्वर्येतुस्वस्वामिभ्यांपर्यायेणसप्तमी अधिभुविरामः अधि
रामेभूः इतिविभक्त्यर्थाः समासःपंचधा तत्रसमसनंसमासः सचविशेषसं
ज्ञाविनिर्मुक्तःकेवलसमासःप्रथमः प्रायेणपूर्वपदार्थप्रधानोऽव्ययीभावोद्वि

यः प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः तत्पुरुषभेदः कर्मधारयः कर्मधार
यभेदो द्विगुः प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः प्रायेणोभयपदार्थप्रधा
नो द्वन्द्वः पंचमः समर्थः पदविधिः पदसंबंधी यो विधिः स समर्थाश्रितो बोध्यः प्राक्क
डारात्समासः कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते सह सुपा
सुप्सुपा सह वा समस्यते समासत्वात्प्रातिपदिकत्वे सुपो लुक् परार्थाभिधानं वृत्तिः
कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पंच वृत्तयः वृत्त्यर्थावबोधकं वाक्यं वि
ग्रहः स च लौकिकोऽलौकिकश्चेति द्विधा तत्र पूर्वं भूत इति लौकिकः पूर्व अम् भूत सु
इति अलौकिकः भूतपूर्वः भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः इवेन वा समा
सो विभक्त्यलोपश्च वागर्थाविव वागर्थाविव इति केवलसमासः अव्ययीभावः आ
धिकारोयं प्राक्तत्पुरुषात् अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययास
प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु
विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते प्रायेणाविग्रहो नित्यस

मासः प्रायेणास्वपदविग्रहोवा विभक्तौ हरि ङि अधि इति स्थिते प्रथमानिर्दिष्टं स
मासउपसर्जनं समासशास्त्रेप्रथमानिर्दिष्टमुपसर्जनंस्यात् उपसर्जनंपूर्वं समा
सेउपसर्जनंप्राक्प्रयोज्यं इत्यधेःप्राक्प्रयोगः सुपोलुक् एकदेशविकृतस्यान
न्यत्वात्प्रातिपदिकसंज्ञायांस्वाद्युत्पत्तिः अव्ययीभावश्चेत्यव्ययत्वात्सुपोलुक्
अधिहरि अव्ययीभावश्च नपुंसकंस्यात् गाःपातीतिगोपाः तस्मिन्नित्यधिगोपं
नाव्ययीभावादतोम्त्वपंचम्याः अदंतादव्ययीभावात्सुपोनलुक्तस्यपंचमींवि
नाअमादेशः कृष्णस्यसमीपंउपकृष्णं तृतीयासप्तम्योर्बहुलं अदंतादव्ययीभा
वात्तृतीयासप्तम्योर्बहुलमम्भावउपकृष्णेन उपकृष्णे बहुलग्रहणात् समुद्रमु
न्मत्तगंगमित्यादौनित्यमम्भावः मद्राणांसमृद्धिःसुमद्रं यवनानांव्यृद्धिर्दुर्यव
नं मक्षिकाणामभावोनिर्मक्षिकं हिमस्यात्ययोऽतिहिमं निद्रासंप्रतिनयुज्य
तेइतिअतिनिद्रं हरिशब्दस्यप्रकाशःइतिहरि विष्णोःपश्चादनुविष्णु योग्यतावीप्सापदा
र्थानतिवृत्तिसादृश्यानियथार्थाः रूपस्ययोग्यमनुरूपं अर्थमर्थंप्रतिप्रत्यर्थं

म० कौ० टी

१२०

120

शक्तिमनतिक्रम्ययथाशक्ति अव्ययीभावेचाकाले सहस्यसःस्यादव्ययीभावेनतुका
ले हरेःसादृश्यमसहरि कालेतु सहपूर्वाह्णं ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेण
युगपत्सचक्रं सदृशःसख्यासस्वि सत्राणांसंपत्तिःससत्र तृणमप्यपरि
त्यज्यसतृणं अग्निग्रंथपर्यंतमधीतेसाग्नि यथाऽसादृश्ये असादृश्येऽ
व्ययथाशब्दःसमस्यते तेनेहनयथाहरिस्तथाहरः यावदवधारणे यावंतःश्लो
कास्तावंतोच्युतप्रणामाःयावच्छ्लोकं सुप्प्रतिनामात्रार्थे शाकस्यलेशःशाकप्रति
विभाषा अपपरिबहिरंचवःपंचम्या अपविष्णुसंसारः अपविष्णोः परिविष्णोःप्र
विष्णु वहिर्वनं बहिर्वनात् प्राग्वनं प्राग्वनात् तिष्ठद्गुप्रभृतीनिच एतानिनि
पात्यंते तिष्ठद्गुतिगावोयस्मिन्कालेसतिष्ठद्गुदोहनकालः परेमध्येषष्ठ्यावा
पारमध्यशब्दौषष्ठ्यंतेनसहवासमस्येते एदन्तत्वंचानयोर्निपात्यते पारेगंगं गं
गापारं मध्येगंगं गंगामध्यंमहाविभाषानुवर्त्तेवाक्यमपि संख्यावंश्येन
वंशोद्विधा विद्ययाजन्मनाच तत्रभवोवंश्यः तद्वाचिनासहसंख्यासमस्यते

राम

१२०

द्वौमुनीवंश्यौ द्विमुनिव्याकरणस्य त्रिमुनि विद्यात् कृतामन्नेदविवक्षायां त्रिमुनि
व्याकरणं एकविंशतिभारद्वाजं नदीभिश्च नदीभिःसंख्यावासमस्यते समाह
रेचायमिष्यते पंचगंगं द्वियमुनं अदापदार्थेचसंज्ञायां अन्यपदार्थेविद्यमा
नंसुबंतंनदीभिःसहनित्यंस मस्यते विभाषाधिकारेपिवाक्येसंज्ञानवगमादि
हनित्यसमासः उन्मत्तगंगंनामदेशः लोहितगंगं तद्धिताः आपंचमसमाप्ते
रधिकारोयं अव्ययीभावेशरत्प्रभृतिभ्यः शरदादिभ्यष्ठच्स्यात्समासांतोव्ययी
भावे शरदःसमीपंउपशरदं प्रतिविपाशं शरद् विपाश् अनस् मनस् उपान
त् दिव् हिमवत् अनडुह् दिश् विश् चेतस् चतुर् त्यद् तद् कियत् जरायां
जरसच् उपजरसं अनश्च अन्नंतादव्ययीभावाय च्स्यात् नेस्तद्धिते नांत
स्यभस्यटेर्लोपस्तद्धिते उपराजं अध्यात्मं नपुंसकादन्यतरस्यां अन्नंतपद्यंक्लि
वंतदंतादव्ययीभावाद्वा उपचर्मं झय झयंतादव्ययीभावाद्वा उपसमि
उपचर्मं

१ म०कौ०
१२१

(अ

वं उपसमित् नदीपौर्णमास्याग्रहायणीभ्यः वाटचू उपनदं उपनदी त्यादि गिरेश्च
सेनकस्य वाटचू उपगिरं उपगिरि प्रतिपरसमनुभ्योक्ष्णः टचू प्रत्यक्षं क्ष्णः परं
परोक्षं अतएव समासः परोक्षेलिटि निपातनात्परस्योकारः इत्यादि इत्यव्य
यीभावः तत्पुरुषः अधिकारोयंप्राग्बहुव्रीहेः द्विगुश्च तत्पुरुषसंज्ञः द्वितीया
श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयांतंश्रितादिप्रकृतिकैः सुबंतैः सह
वासमस्यते कृष्णंश्रितः कृष्णश्रितः इत्यादि तृतीयातत्कृतार्थेनगुणवचने
न। तृतीयांतं तृतीयांतार्थकृतगुणवचनेनार्थेन चसहप्राग्वत् शंकुलयाखंडः
शंकुलाखंडः धान्येनार्थो धान्यार्थः तत्कृतेतिकिं अक्ष्णाकाणः पूर्वसदृश
समोनार्थकलहनिपुणमिश्रश्लक्ष्णैः तृतीयांतमेतैः प्राग्वत् मासपूर्वः मा
तृसदृशः पितृसमः ऊनार्थे माषोनं कार्षापणं माषविकलं वाक्कलहः आ
चारनिपुणः गुडमिश्र आचारश्लक्ष्णः अवरस्योपसंख्यानं मासावरः अन्ने

राम
१२१

नव्यंजनं संस्कारकद्रव्यवाचकं तृतीयांतमन्नेनसह प्राग्वत् दध्नाउपसिक्तओद
नः दध्योदनः भक्ष्येणमिश्रीकरणं गुडेनमिश्राधानागुडधानाः कर्त्तृकरणे
कृताबहुलं कर्त्तरिकरणेचतृतीयाबहुलंप्राग्वत् हरिचातः नखभिन्नः कृद्ग्र
हणेगतिकारकपूर्वस्यापिग्रहणं नखनिर्भिन्नः चतुर्थीतदर्थार्थबलिहितसुख
रक्षितैः चतुर्थ्यंतार्थाययत्तद्वाचितार्थादिभिश्चचतुर्थ्यंतंप्राग्वत् यूपायदारु
यूपदारु तदर्थेनप्रकृतिविकारभावएवेष्ठः नेनेह न रंधनायस्थाली अश्वघा
सोदयस्तुषष्ठीतत्पुरुषाः अर्थेननित्यसमासोविशेष्यलिंगताचेतिवक्तव्यं द्वि
जायायं द्विजार्थः सूपः द्विजार्थायवागू द्विजार्थंपयः भूतबलिः गोहितं
गोसुखं गोरक्षितं पंचमीभयेन चोराद्भयंचोरभयं स्तोकांतिकदूरार्थकृच्छ्रा
णिक्तेन पंचम्याः स्तोकादिभ्यः अलुगुत्तरपदे स्तोकान्मुक्तः अल्पान्मुक्तः

म०कौ०

१२२

अंतिकादागतः अभ्याशादागतः दूरादागतः कृच्छ्रादागतः षष्ठी सुबंतेनप्राग्व
त् राज्ञः पुरुषः राजपुरुषः याजकादिभिश्च षष्ठ्यंतंसमस्यतेवक्ष्यमाणस्यापवा
दः ब्राह्मणयाजकः देवपूजकः याजकपूजकपरिचारकपरिषेचकस्नातकाध्या
पकोत्सादकोद्वर्तकहोतृपोतृभर्तृरथगणकपत्तिगणकानि गुणात्तरेणतरलो
पश्च तरबंतंयद्गुणवाचितेनसमासः सर्वेषांश्वेततरः सर्वश्वेतः सर्वेषांमहत्त
रः सर्वमहान् ननिर्द्धारणे षष्ठीसमस्यते नृणांद्विजः श्रेष्ठः पूरणगुणसु
हितार्थसदव्ययतव्यसमानाधिकरणेन पूरणाद्यर्थैःसदादिभिश्चषष्ठीन
समस्यते सतांषष्ठः काकस्यकार्ष्ण्यं सुहितार्थास्तृप्त्यर्थाः फलानांसुहितः
सन् द्विजस्यकुर्वन्कुर्वाणोवा ब्राह्मणस्यकृत्वा पूर्वोक्तैःसाहचर्यात्कृदव्य
यमेवगृह्यते तेनन्तदुपरीत्यादिसिद्धं ब्राह्मणस्यकर्तव्यं तसिकस्यसर्पेस्य
क्तेनचपूजायां मतिबुद्धिसूत्रेणविहितोपःक्तः नदंतेनषष्ठीनसमस्यते रा

रामे

१२२

द्वंमेतः बुद्धः पूजितोवा अधिकरणवाचिनाच क्तेनषष्ठीनसमस्यते इदमेषामासि
तंगतंभुक्तंवा कर्मणिच उभयप्राप्तौकर्मणीतियाषष्ठीसानसमस्यते आश्चर्यो
गवांदोहोऽगोपेन तृजकाभ्यांकर्त्तरि कर्त्रर्थेतृजकाभ्यांषष्ठ्यानसमासः वज्रस
भर्त्ता ओदनस्यपाचकः कर्त्तरिच कर्त्तरिषष्ठ्याअकेननसमासः भवतःशायि
का पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे अवयविनासहपूर्वादयःसमस्यं
तेएकत्वसंख्याविशिष्टश्चेदवयवीषष्ठीसमासापवादः पूर्वंकायस्यपूर्वकायः अ
परकायः एकाधिकरणेकिं पूर्वः छात्राणां अर्द्धंनपुंसकं समांशवाच्यर्द्धशब्दो
नित्यंक्लीबेसप्राग्वत् अर्द्धंपिप्पल्या अर्द्धपिप्पली एकविभक्तावषष्ठ्यंतवचनमि
त्युपसर्जनसंज्ञाभावाद्ध्रस्वोन क्लीबेकिं ग्रामार्द्धः द्रव्यैक्यएव अर्द्धंपिप्पलीनां
द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां एतान्येकदेशिनासहप्राग्वद्वा द्वितीयंभि
क्षायाः द्वितीयभिक्षा एकदेशिनाकिं द्वितीयंभिक्षायाभिक्षुकस्य अन्यतरस्यां

म॰ कौ॰
१२३
123

ग्रहणसामर्थ्यात्पूरणगुणेतिनिषेधंबाधित्वापक्षेषष्ठीसमासः मिक्षाद्वितीयं प्राप्ता
पन्नेचद्वितीययापक्षेद्वितीयासमासः प्राप्तोजीवनं॰ प्राप्तजीवनःजीवनप्राप्तः आ
पन्नजीवनः जीवनापन्नः इहसूत्रेद्वितीययाअइतिछित्वाअकारोपिविधीयते
तेनजीविकांप्राप्ताप्राप्ताजीविका आपन्नजीविकाकलाःपरिमाणिना परिच्छे
द्यवाचिनासुबंतेन सहकालाःसमस्यंते मासोजातस्ययस्यमासजातः सप्तमीशौं
डैः सप्तम्यंतंशौंडादिभिःप्राग्वत् अक्षेषुशौंडोऽक्षशौंडः शौंडधूर्तकितवव्याडप्रवीणसं
वीतांतरधीतपटुपंडितकुशलचपलनिपुणानि द्वितीयातृतीयाद्युत्पादियोगविभा
गादन्यत्रापिद्वितीयादीनांप्रयोगवशात्समासोज्ञेयः दिक्संख्येसंज्ञायां विशेषणं
विशेष्येणबहुलमित्येवसिद्धेसंज्ञायामेवेतिनियमार्थंसूत्रं पूर्वेषुकामशमी सप्त
ऋषयः नेह उत्तरावृक्षाः पंचब्राह्मणाः तद्धितार्थोत्तरपदसमाहारेच तद्धितार्थे

एम
१२३

विषयेऽत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत् पूर्वस्यां शालायां भवः पू
र्वाशाला इति समासे जाते सर्वनाम्नो वृत्तिमात्रे पूर्वं पुंवत् दिक्पूर्वपदादसंज्ञायां ञः
अस्माद्भवार्थे ञः स्यादसंज्ञायां तद्धितेष्वचामादेः ञ्णिति णिति च प्रत्यये तद्धिते अचा
मादेरचो वृद्धिः स्यात् यस्येति च यो र्वे शालः पूर्वाशालाप्रियापस्येति त्रिपदे बहुव्रीहौ
कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः तेन शालाशब्दे आकार उदात्तः पूर्वशा
लाप्रियः दिक्षु समाहारो नास्त्यनभिधानात् षण्णां मातॄणामपत्यं षाण्मातुरः मा
तुरुत्संख्यासंभद्रपूर्वायाः इति वक्ष्यमाणोऽण् पंचगावो धनं यस्येति त्रिपदे बहुव्रीहौ
कृते तत्पुरुषयोरुत्तरपदे नित्यसमासवचनं गोरतद्धितलुकि गोन्तात्तत्पुरुषाट्टच्
समासान्तो न तु तद्धितलुकि पंचगवधनः संख्यापूर्वो द्विगुः तद्धितार्थेत्यत्रोक्तः
संख्यापूर्वो द्विगुः स्यात् द्विगुरेकवचनं द्विग्वर्थः समाहार एकवत्स्यात् स नपुंस
कं समाहारे द्विगुर्द्वन्द्वश्च पुंसकं स्यात् पंचानां गवां समाहारः पंचगवं विशेष

णविशेष्यंविशेषणेनबहुलं भेदकभेद्येनसमानाधिकरणेनबहुलंप्राग्वत् नील
मुत्पलंनीलोत्पलं बहुलग्रहणात्क्वचिन्नित्यं कृष्णसर्पः क्वचिन्न नामोजामद
ग्न्यः अपरस्यार्द्धपश्चभावोवक्तव्यः अपरश्चासावर्द्धश्चपश्चार्द्धः सन्महत्परमो
त्तमोत्कृष्टाःपूज्यमानैः सहसमस्यन्ते सद्वैद्यः आन्महतःसमानाधिकरण
जातीययोः महावैयाकरणः तत्पुरुषःसमानाधिकरणःकर्मधारयः पुंव
त्कर्मधारयजातीयदेशीयेषु कर्मधारयेजातीयदेशीययोश्चपरतोभाषित
पुंस्कात्परऊङभावोयस्मिन्तथाभूतंपूर्वंपुंवत् कृष्णाप्रियादिष्वप्राप्तःपुंवद्भा
वोविधीयते महानवमी कृष्णचतुर्दशी महाप्रिया पूज्यमानैःकिं उत्कृष्टोगौः
पंकादुद्धृतइत्यर्थः उपमानानिसामान्यवचनैः घनश्यामः उपमितंव्याघ्रादिभिः
सामान्याप्रयोगे पुरुषोव्याघ्रइवपुरुषव्याघ्रः सामान्याप्रयोगेकिंपुरुषोव्याघ्र
इवशूरः शाकपार्थिवादीनामुत्तरपदलोपश्च शाकप्रियःपार्थिवः शाकपार्थिवः

साक्षात्प्रभृतीनि च कृञि वा गतिसंज्ञानि स्युः च्व्यर्थ इति वक्तव्यं ॥ साक्षात्कृत्य सा-
क्षात्कृत्वा लवणंकृत्य लवणंकृत्वा मांतत्वं निपातनात् अनत्याधान उरसिमन-
सी उरसिकृत्य उरसिकृत्वा अभ्युपगम्येत्यर्थः मनसिकृत्य मनसिकृत्वा निश्चि-
त्येत्यर्थः अत्याधानमुपश्लेषः तत्र न उरसिकृत्वा पाणिं शेते मध्येपदेनिवचने
च एते कृञि गतिसंज्ञा वा स्युरनत्याधाने मध्येकृत्य मध्येकृत्वा इत्यादि वाचं नि-
यम्येत्यर्थः नित्यं हस्ते पाणावुपयमने कृञि उपयमनं विवाहः स्वीकारमात्रमित्य-
न्ये हस्तेकृत्य प्राध्वं बंधने प्राध्वमित्यव्ययं प्राध्वंकृत्य बंधनेनानुकूलं कृत्वेत्यर्थः
प्रार्थनादिना त्वनुकूलकरणे प्राध्वंकृत्वा जीविकोपनिषदावौपम्ये जीविकामि-
व कृत्वा जीविकाकृत्य औपम्ये किं जीविकां कृत्वा प्रादिग्रहणं अगत्यर्थं सुपुरुषः
प्रादयो गताद्यर्थे प्रथमया प्रगत आचार्यः प्राचार्यः अत्यादयः क्रांताद्यर्थे द्विती-
या अतिक्रांतो मालामिति विग्रहे एकविभक्ति चापूर्वनिपाते विग्रहयन्नियत

विभक्तिकं तदुपसर्जनं न तु तस्य पूर्वनिपातः गोस्त्रियोरुपसर्जनस्य उपसर्जनं यो गो
शब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः अतिमालः अवादयः क्रुष्टाद्य
र्थे तृतीयया अवक्रुष्टः कोकिलया अवकोकिलः पर्यादयो ग्लानाद्यर्थे चतुर्थ्या
परिग्लानोऽध्ययनाय पर्यध्ययनः निरादयः क्रान्ताद्यर्थे पंचम्या निः क्रान्तः कौशा
म्ब्या निःकौशाम्बिः तत्रोपपदं सप्तमीस्थं उपपदमतिङ् उपपदं समर्थेन नित्यं समस्य
ते अतिङन्तश्चायं समासः कुंभं करोतीति कुंभकारः अतिङ् किं मा भवान् भूत् माङि
लुङिति सप्तमीनिर्देशान्माङुपपदं गतिकारकोपपदानां कृद्भिः सह समासवचनं
प्राक्सुबुत्पत्तेः व्याघ्री अश्वक्रीती कच्छपीत्यादि अमैवाव्ययेन अमैव तुल्यवि
धानं यदुपपदं तदेवाव्ययेन सह समस्यते स्वादुंकारं स्वादुमि णमुल् नेह का
लसमयवेलासु तुमुन् कालः समयो वेला वा भोक्तुं अमैवेति किं अग्रेभोजं अ
ग्रे भुक्त्वा विभाषाग्रेप्रथमपूर्वेष्वाभीक्ष्ण्ये णमुलो अमा चान्येन च तुल्यविधानमे
तत् तृतीयाप्रभृतीन्यन्यतरस्याम् उपपदं तृतीयाप्रभृतीत्यादीन्युपपदान्यमन्ते

नाध्ययेनसहवासमसयंते मूलकेनोपदंशंभुंक्ते मूलकोपदंशं उपदंशस्तृतीयायामि
तिणमुल् क्वाच तृतीयाप्रभृतीन्युपपदानि क्वातेनसहवासमसंते उच्चैःकृत्वा
अव्ययेयथाभिप्रेताख्यानेक्रमः क्वाणमुलाविति कासामुलोतत्पुरुषस्यांगुलेः सं
ख्याव्ययादेः संख्याव्ययादेरंगुल्यंतस्यतत्पुरुषस्यसमासांताऽच्स्यात् द्वेअंगुलीप्र
माणमस्येतिद्व्यंगुलं निरंगुलं अहःसर्वैकदेशसंख्यातपुण्याच्चरात्रेः एभ्योरात्रेर
च्स्यात्चात्संख्याव्ययादेः अहर्ग्रहणंद्वंद्वार्थं रात्राह्नाहाःपुंसि एतेपुंस्येव अहश्च
रात्रिश्चाहोरात्रः सर्वरात्रः पूर्वरात्रः संख्यातरात्रः पुण्यरात्रः संख्यापूर्वंरात्रं
नाक्लीबं द्विरात्रं अतिरात्रः राजाहःसखिभ्यष्टच् एतदंतः तत्पुरुषाट्टच् परम
राजः कृष्णसखः अह्नष्टखोरेव टिलोपः उत्तमाहः अह्नो ह्न एतेभ्यः सर्वादिभ्यो
ऽह्नन्नादेशः स्यात् देशः समासांतेपरे अह्नोऽदंतात् अदंतपूर्वपदस्थान्निमित्तात
ह्नस्यणः सर्वाह्णः नसंख्यादेःसमाहारे अह्नादेशोन द्व्यहः अहः उत्तमेकाभ्यां

म॰ कौ॰
१२८
127

च अद्यो ...देशेन उत्तमशब्दोऽत्रार्थः पुण्यशब्दमाह पुण्यसुदिनाभ्यामह्नः क्लीबता
स्या पुण्याहं सुदिनाहं एकाहः अग्राख्यायामुरसः एवं अश्वानामुरइवअश्वोर
सि मुख्योश्वइत्यर्थः ग्रामकौटाभ्यांचतक्ष्णः ग्रामतक्षः कौटतक्षः अतेःशुनः अ
तिश्वोवराहः उपमानादप्राणिषु अप्राणिविषयकोपमानवाचिनःशुनष्टच्स्यात्
आकर्षःश्वेव आकर्षश्वः उत्तरमृगपूर्वाच्चसक्थ्नः चादुपमानात् उत्तरसक्थं पू
र्वसक्थं फलकमिवसक्थिफलकसक्थं नावोद्विगोः द्विनावं त्रिनावं अतद्धि
तलुकीत्येव नेह द्विनौः अर्द्धाच्च अर्द्धनावं खार्याःप्राचां द्विगोरर्द्धाच्चखार्याष्टच्
वाद्विखारं द्विखारि अर्द्धखारं अर्द्धखारि द्वित्रिभ्यामञ्जलेः द्व्यंजलं द्व्यंजलि
ब्रह्मणोजानपदाख्यायां ब्रह्मांतात्तत्पुरुषाद्‌टच् सुराष्ट्रेब्रह्मा सुराष्ट्रब्रह्मः कुमह
द्भ्यामन्यतरस्यां कुब्रह्मः कुब्रह्मा महाराजः मकारस्वचनेजातीयप्र महाप्रका
रोमहाजातीयः द्व्यष्टनःसंख्यायामबहुव्रीह्यशीत्योः आत्स्यात् द्वादश अष्टा
दश अबहुव्रीह्यशीत्योः किं द्वित्राः द्व्यशीतिः प्राक्शतादृक्तव्यं नेहद्विशतं

राम
१२८

त्रेस्त्रयः त्रिंशदस्यत्रयस्स्यात्पूर्वविषये त्रयोदश त्रयोविंशतिः विभाषाचत्वा
रिंशत्प्रभृतौ सर्वेषां अष्टनोस्त्रेश्च प्रागुक्तं वा चत्वारिंशदादौ परे द्विचत्वारिंशत् द्वाचत्वा
रिंशत् अष्टाचत्वारिंशत् अष्टचत्वारिंशत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् एवं
पंच शत्षष्टिसप्ततिनवतिषु परवल्लिंगं द्वंद्वतत्पुरुषयोः कुक्कुटमयूर्याविमे म
यूरीकुक्कुटाविमौ अर्द्धपिप्पली द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न पंचक
पालः पुरोडाशः प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलंकुमार्यै
अलंकुमारिः अतएव ज्ञापकात्समासः निःकौशांबिः पूर्ववदश्ववडवौ द्विवमतं
त्रं अश्ववडवौ अश्ववडवान् अपथं नपुंसकं तत्पुरुषइत्येव अन्यत्र तु अपथो
देशः कृतसमासांतग्रहणान्नेह अपंथाः अकारांतोत्तरपदो द्विगुः स्त्रियामिष्टः
पंचपली आबंतो वा पंचखट्वं पंचखट्वी पात्राद्यंतस्य न पंचपात्रं त्रिभुवनं चतुर्यु
गं छायाबाहुल्ये छायांतस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये इक्षूणां छा
या इक्षुच्छायं सभा राजामनुष्यपूर्वा राजपर्यायपूर्वः अमनुष्यपूर्वश्च सभांतस्तत्पु

म० कौ०

१२८ स

१२८

रूषो नपुंसकं स्यात् ईनसभं ईश्वरसभं अमनुष्यशब्दो रूढ्यारक्षः पिशाचादीनाह रक्षः
सभं पिशाचसभं विभाषासेनासुराच्छायाशालानिशानां एतदन्तस्तत्पुरुषः क्लीबेवा
ब्राह्मणसेनं ब्राह्मणसेना इत्यादि अशाला च संघातार्थायासभा तदन्तस्तत्पुरुषः
क्लीबं स्यात् स्त्रीसभं संघातग्रहणं किं धर्मसभा धर्मशालेत्यर्थः अ
र्द्धर्चाः पुंसि च अर्द्धर्चादयः पुंसि क्लीबे च स्युः अर्द्धर्चः अर्द्धर्चं अवंध्वजतीर्थशरीरमंड
पयूषदेहांकुशकलशपात्रसूत्रयान्नादयः सामान्ये नपुंसकं मृदुपचति प्रातः कमनी
यं इति तत्पुरुषः शेषो बहुव्रीहिः अधिकारोयं प्राग्द्वंद्वात् अनेकमन्यपदार्थे
अनेकं प्रथमान्तमन्यपदार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः सप्तमीविशेषणे
बहुव्रीहौ सप्तम्यन्तं विशेषणं च पूर्वं स्यात् हलदन्तात्सप्तम्याः संज्ञायां हलंत
दन्तात्सप्तम्या अलुक् कंठेकालः अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः
प्राप्तमुदकं यं प्राप्तोदको ग्रामः ऊढरथोनड्वान् उपहृतपशूरुद्रः तरु नोदनात्स्थाली
पीतांबरो हरिः वीरपुरुषको ग्रामः प्रादिभ्यो धातुजस्य वा च्यो वा चोत्तरपदलोपः

राम

प्रपतितपर्णः प्रपर्णः नञोस्त्यर्थानांचोत्तरपदलोपः अविद्यमानपुत्रोऽपुत्रः स्त्रियाः
पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरिणी प्रियादिषु उक्तपुंस्कादूङ
भावोयत्रतथाभूतस्यस्त्रीवाचकशब्दस्यपुंवाचकस्येवरूपंस्यात्समानाधिकरणेन
तुपूरिण्यांप्रियादौचपरतः गोस्त्रियोरितिह्रस्वः चित्रगुः रूपवद्भार्यः अनूङःकिं
वामोरुभार्यः पूरिण्यांतु अप्रकुरिणीप्रमाण्योः पूरणार्थप्रत्ययांतंयत्स्त्रीलिंगं
तदंतात्प्रमाण्यंताच्चबहुव्रीहिरप्स्यात् कल्याणीपंचमीयासांरात्रीणांताःकल्याणी
पंचमारात्रयः स्त्रीप्रमाणीयस्यस्त्रीप्रमाणः पुंवद्भावनिषेधोप्पत्ययअप्रधानपू
रिणपमेव रात्रिः पूरिणीवाच्याचेत्प्रुक्तोदाहरणेमुख्या अन्यत्र नघतश्च नद्य
न्तरपदादंतोन्तरपदाच्चबहुव्रीहेःकप् पुंवद्भावः केणः ह्रस्वः इतिप्राप्ते नकपि
ह्रस्वः कल्याणपंचमीकःपक्षः अत्रतिनोहितावयवभेदस्यपक्षस्यान्यपदार्थे
तयारात्रिरप्रधान बहुकर्तृकः अप्रियादिषुःकिं कल्याणीप्रियः प्रियामनो

म०कौ०
१२९
129

ज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सूचिवा स्वका कांता क्षांता समा चपला दुहिता वामा अवला तनया सामान्येन पुंस्कं दृढंभक्तिर्यस्य सदृढभक्तिः स्त्री त्वविवक्षायांतु दृढाभक्तिः चतसौ तरपूतमपौ चरड्जातीयरौ कल्पपूदेशीय नौ रूपप्पाशपौ थाल्तिलथनो एषुपरेषुस्त्रियाः पुंवत् वह्वीषु वहुत्र वहुत इत्यादि त्वतलोर्गुणवचनस्य शुक्लत्वं शुक्लता भस्याढेतद्धिते हास्तिनानां समूहो हास्तिकं अग्नेः रौहिणेयः कल्कुघादीनामंडादिषु कुक्कुटयाड मृगपदं मृगी क्षीरं काकशावः क्यङ्मानिनोश्च पुंवत् एनीवाचरति एतायते श्येनीवाचरति श्ये तायते दर्शनीयांमन्यते दर्शनीयमानिनी नकोपधायाः स्त्रियाः पुंवत् पाचि काभार्यः रसिकाभार्यः मद्रिकायते मद्रिकामानिनी कोपधप्रतिषेधेतद्धि तवुग्ग्रहणं नेह पाकभार्यः संज्ञापूरण्योश्च न पुंवत् दत्ताभर्यः पंचमीभार्यः वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे वृद्धिशब्देन विहितायावृद्धिस्तद्धेतुर्यस्त

राम
१२९

ढितोऽरक्तविकारार्थस्तदंतास्त्रीनपुंवत् सौघ्नीभार्यः रक्तेतुकीषायकंथः विकारेतुहै
मीमुद्रिकायस्यहैममुद्रिकः स्वांगाच्चेतः स्वांगघईकारः तदंतास्त्रीनपुंवत् सुकेशीभार्यः
स्वांगात्किं पटुभार्यः इतः किं अकेशाभार्यः अमानिनीतिवक्तव्यं सुकेशमानिनी जा
तेश्च न शूद्राभार्यः संख्ययाव्ययासंन्नादूनाधिकसंख्याः संख्येये संख्येयार्थया
संख्ययाऽव्ययादयः समस्यंतेसवबहुव्रीहिः बहुव्रीहौसंख्येयेडजबहुगणात् सं
ख्येयेयोबहुव्रीहिस्तस्माडुसमासांतः दशानांसमीपेयेसंतितेउपदशाः अवहुगणा
त्किं उपबहवः उपगणाः तिविंशतेर्डिति विंशतेर्भस्यतेर्लोपोडिति आसन्नविंशाः
अदूरत्रिंशाः अधिकचत्वारिंशाः द्वौत्रयोवाद्वित्राः दिङ्नामान्यंतराले दिङ्नामानां
तरालेवाच्येप्राग्वत् दक्षिणस्याःपूर्वस्याश्चदिशौंतरालंदक्षिणपूर्वा तत्रतेनेदमितिस
रूपे सप्तम्यंतेग्रहणाविषयेसरूपेपदेत्ततीयांतेचप्रहरणविषयेइदंयुद्धंप्रवृत्तं इदं युद्धं इति स
र्वेसमस्यतेकर्मव्यतिहारे अन्येषामपिदृश्यते दीर्घः केशाकेशिमुष्टीमुष्टिदंडादंडि

प्रवृत्तंकेशाकेशि दंडैश्चदंडैश्चप्रहृत्येदंयुद्धंप्रवृत्तंदंडादंडि मुष्टि तेनसहेतितुल्ययोगे
तुल्ययोगेवर्त्तमानंसहेत्येतत्तृतीयांतेनप्राग्वत् वोपसर्जनस्या वहुव्रीहेरवयवस्यस
हस्यसः स्यात् पुत्रेणसहसपुत्रः सहपुत्रोवाऽऽगतः प्रकृत्याशिषि सहशब्दः
स्वस्तिराज्ञेसहपुत्रायसहामात्याय अगोवत्सहलेष्वितिवक्तव्यं सगवे सवत्सा
य सहलाय वहुव्रीहौसक्थ्यक्ष्णोः स्वांगात्षच् स्वांगवाचिसक्थ्यक्ष्यंताद्बहुव्रीहेः
षच् दीर्घसक्थः जलजाक्षी स्वांगात्किं दीर्घसक्थिशकटं स्थूलाक्षावेणुयष्टिः
अक्ष्णोदर्शनादितिवक्ष्यमाणोच् द्वित्रिभ्यांषमूर्ध्नः द्विमूर्धः अंतर्वहिर्भ्यांचलोम्नः
अप्स्यात् अंतर्लोमः वहिर्लोमः पादस्यलोपोऽहस्त्यादिभ्यः हस्त्यादिवर्जितादुपमाना
त्परस्यपादस्यलोपः व्याघ्रस्येवपादावस्यव्याघ्रपात् अहस्त्यादिभ्यः किं हस्तिपादः
कुसूलपादः संख्यासुपूर्वस्य पादस्यलोपः द्विपात् सुपात् उद्विभ्यांकाकुदस्यलोपः
उत्काकुत् पूर्णाद्विभाषा पूर्णकाकुत् पूर्णकाकुदः सुहृद्दुर्हृदौमित्रामित्रयोः सु

हृन्मित्रं दुर्हृदमित्रः नेतुर्नक्षत्रेऽड्वक्तव्यः मृगोनेतायासांरात्रीणांताः मृगनेत्राः
नात्रयः अनासिकायाः संज्ञायांनसंचास्थूलात् नासिकांताद्बहुव्रीहेरच् ना
सिकशब्दश्चनसंप्राप्नोति पूर्वपदात्संज्ञायामगः पूर्वपदस्थान्निमित्तान्नस्यणः
स्यात् द्रुखिनासिकाअस्यद्रुणसः खुरखराभ्यांवानस् खुरणाः खरणाः पक्षे
अजपीष्यतेखुरणसः खरणसः उपसर्गाच्च उन्नसः वेर्ग्रोवक्तव्यः विगताना
सिकास्यविग्रः ख्यश्च विख्यः नञ्दुःसुभ्योहलिसक्थ्योरन्यतरस्यां अच् अहलः
अहलिः असक्थः असक्थिः एवंदुःसुभ्यां शक्त्योरितिपाठांतरं अशक्तः
अशक्तिः नित्यमसिच्प्रजामेधयोः नञ्दुःसुभ्य एव अप्रजाः दुःप्रजाः
सुप्रजाः अमेधाः दुर्मेधाः सुमेधाः धर्मादनिच्केवलात् केवलात्पूर्वपदात्
योधर्मशब्दस्तदंताद्बहुव्रीहेरनिच् कल्याणधर्मा केवलात्किं परमः स्वोधर्मो
यस्येतित्रिपदेबहुव्रीहौमाभूत् इच्कर्मव्यतिहारे केशाकेशि मुसलामुसलि

म०को०

१३१

131

प्रसंभ्यांजनोर्ज्ञुः प्रज्ञुः संज्ञुः ऊर्ध्वाद्विभाषा ऊर्ध्वज्ञुः ऊर्ध्वजानुः धनुषश्च धनुरंता
द्बहुव्रीहेरनङादेशः शार्ङ्गधन्वा वासंज्ञायां शतधन्वा शतधनुः जायायानिङ् जा
यांतस्य बहुव्रीहेर्निङादेशः लोपोव्योर्वलि युवतिर्जायास्य युवजानिः गंधस्येदु
त्पूतिसुसुरभिभ्यः उकारः पूतिगंधिः सुगंधिः सुरभिगंधिः उपमानाच्च पद्मस्ये
वगंधोस्य पद्मगंधिः वयसि दंतस्य दत्‌ संख्यासुपूर्वस्येत्येव द्विदन् चतुर्दन् सुदन्
अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च वा कुड्मलाग्रदंतः कुड्मलाग्रदन्‌ उरः प्रभृति
भ्यः कप् व्यूढोरस्कः प्रियसर्पिष्कः अर्थान्नञः अनर्थकं नञः किं अपार्थकं
अपार्थं इनःस्त्रियां इन्नंताद्बहुव्रीहेः कप् बहुदंडिकानगरी अनिनस्मन्ग्रहणान्य
र्थवताचानर्थकेनचतदंतविधिंप्रयोजयंति बहुवाग्मिका शेषाद्विभाषा अनुक्तस
मासांताद्बहुव्रीहेः कब्वा महायशाः महायशस्कः अनुक्तेत्यादिकिं व्याघ्रपात् आ
पोन्यतरस्यां कपिह्रस्वः बहुमालाकः बहुमालकः नसंज्ञायां शेषादितिप्राप्तःक

एम

१३१

न्न विश्वेदेवा अस्य विश्वदेवः ईयसश्च ईयसंतोत्तरपदान्न कप् बहवः श्रेयांसोस्य बहुश्रे
यान् गोस्त्रियोरिति ह्रस्वे प्राप्ते ईयसो बहुव्रीहेर्न बहुश्रेयसी बहुव्रीहेः किं अतिश्रेय
सिः वंदिते भ्रातुः पूजार्थभ्रात्रंतान्न कप् प्रशस्तो भ्राता यस्य प्रशस्तभ्राता सुभ्राता
वंदिते किं मूर्खभ्रातृकः सर्वनामसंख्ययोर्बहुव्रीहौ पूर्वनिपातः सर्वश्वेतः द्विशुक्लाः
संख्याया अल्पीयस्याः द्वित्राः द्वंद्वे च द्वादश वा प्रियस्य प्रियगुडः गुडप्रियः गड्वादेः परा
सप्तमी गडुकंठः कश्चिन्न बहेगडुः निष्ठा निष्ठांतं बहुव्रीहौ पूर्वं स्यात् कृतकृत्यः
जातिकालसुखादिभ्यः परा निष्ठा वाच्या सारंगजग्धी मासजाता सुखजाता वाहिता
ग्न्यादिषु आहिताग्निः अग्न्याहितः आकृतिगणोयं इति बहुव्रीहिः चार्थे द्वंद्वः
अनेकं सुबंतं चार्थे वर्त्तमानं वा समस्यते स द्वंद्वः समुच्चयान्वाचयेतरेतरयोगसमाहार
श्चार्थाः तत्रेश्वरं गुरुं च भजस्वेति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः
भिक्षामट गां चानयेति अन्यतरस्यानुषंगिकत्वेन्वाचयः अनयोरसामर्थ्यात्समासो न

म॰कौ॰
१३२

धावखदिरौ छिंधीति मिलितानामन्वयःइतरेतरयोगः संज्ञापरिभाषमिति समूहः समाहारः राजदंतादिषुपरं एषुपूर्वप्रयोगार्हंपरं दंतानांराजाराजदंतः धर्मादिष्वनियमः अर्थधर्मौ धर्मार्थौ दंपतीजंपतीजायापती जायायाजंभावोदंभावश्चनिपात्यते आकृतिगणोयं द्वंद्वेघि पूर्वंस्यात् हरिहरौ अजाद्यदंतं ईशकृष्णौ अल्पाचुतरं शिवकेशवौ ऋतुभानांसमाक्षराणामानुपूर्व्येणः हेमंतशिशिरवसंताः कृत्तिकारोहिण्यौ समाक्षराणां किं ग्रीष्मवसंतौ लध्वक्षरंपूर्वं कुशकाशं अभ्यर्हितंच तापसपर्वतौ वर्णानामानुपूर्व्येण ब्राह्मणक्षत्रियविट्शूद्राः भ्रातुर्ज्यायसः युधिष्ठिरार्जुनौ द्वंद्वश्चप्राणितूर्यसेनांगानां एषांद्वंद्वएकवत् पाणियादंमार्दंगिकपाणविकं रथिकाश्वारोहं अध्ययनतोविप्रकृष्टाख्यानां अध्ययनेनप्रत्यासन्नाआख्यायेषांतेषांद्वंद्वएकवत् पदकक्रमकं जातिरप्राणिनांऽप्राणिवर्जजातिवाचिनांद्वंद्वएकवत् धानाशष्कुलि प्राणिनांतुविट्शूद्राः विशिष्टलिंगोनदीदेशो

राम
१३२

ग्रामाः ग्रामवर्जनदीदेशवाचिनां भिन्नलिंगानां द्वंद्व एकवत् उध्यश्चइरावती च उध्येरा
वति गंगाशोणं कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं क्षुद्रजंतवः एषां द्वंद्व एकवत् पू
कालिक्षं आनकुलात्क्षुद्रजंतवः येषां च विरोधः शाश्वतिकः प्राग्वत् अहिनकु
लं गोव्याघ्रं काकोलूकमित्यादौ परत्वाद्विभाषा वृक्षेति प्राप्तं चकारेण बाध्यते
शूद्राणामनिरवसितानां अबहिःकृतानां शूद्राणां द्वंद्वः प्राग्वत् तक्षायस्कारं पा
त्राद्बहिःकृतानां तु चंडालमृतपाः गवाश्वप्रभृतीनि च यथोच्चारितानि साधूनि
दासीदासमित्यादि विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वा
पराधरोत्तराणां वृक्षादीनां सप्तानां द्वंद्वः अश्ववडवेत्यादि द्वंद्वत्रयं च वा प्राग्वत् वृक्षा
दौ तु विशेषाणामेव ग्रहणं प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः रुरुपृषतं रुरुपृषताः
कुशकाशं कुशकाशाः व्रीहियवं व्रीहियवाः दधिघृतं दधिघृते गोमहिषं गोम
हिषाः शुकबकं शुकबकाः अश्ववडवं अश्ववडवौ पूर्वापरं पूर्वापरे पुलसेना

म॰कौ॰
१३३

वनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां बहुप्रकृतिः द्वंद्व एकवदिति वाच्यं बद
राणि च आमलकानि च बदरामलकं नेह बदरामलके रथिकाश्वारोहावित्यादि न
दधिपय आदीनि एकवत्स्युः दधिपयसी इध्माबर्हिषी निपातनाद्दीर्घः ऋक्सामे
वाङ्मनसे आनङ् ऋतो द्वंद्वे विद्यायोनिसंबंधवाचिनाम् द्वंद्वे आनङ् स्या
दुत्तरपदे होतापोतारौ मातापितरौ पुत्रेऽत्यनुवृत्तेः पितापुत्रौ देवताद्वंद्वे च इहोत्तरपदे
परे आनङ् मित्रावरुणौ वाय्वोः प्रयोगे प्रतिषेधः अग्निवायू वाय्वग्नी ईदग्नेः सोमव
रुणयोः देवताद्वंद्व इत्येव अग्नेः स्तुत्स्तोमसोमाः अग्नेः परेषामेषां सस्य षः समासे
अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नीवरुणौ इद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरि
त्स्याद्देवताद्वंद्वे अग्नामरुतौ देवता अस्य आग्निमारुतं कर्म अग्नीवरुणौ देवता अस्य आ
ग्निवारुणं देवताद्वंद्वे चेत्युभयपदवृद्धिः विष्णोन आग्नावैष्णवं दिवो द्यावा देवता
द्वंद्वे उत्तरपदे द्यावाभूमी मातरपितरावुदीचां उदीचां किं मातापितरौ द्वंद्वाच्चुदष

एम
१३३

हांतात्समाहारे चवर्गांताद्दषहांताच्चद्वंद्वात्टच् समाहारे वाक्त्वचं त्वक्स्रजं शमीदृषदं
वाक्त्विषं छत्रोपानहं समाहारे किं प्रावृट्शरदौ इति ॥ अथैकशेषः विरूपाणामपि
समानार्थानां वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ कुटिलदंडौ वृद्धो यूना तल्लक्षणश्चेदेव
विशेषः यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्या
त् गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ वृद्धः किं गर्गगार्ग्यायणौ यूना किं गर्गगार्ग्यौ कृत्स्नं
किं गार्ग्यवात्स्यायनौ स्त्रीपुंवच्च यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् गार्गी च गा
र्ग्यायणौ च गर्गाः पुमान् स्त्रिया सहोक्तौ शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हं
सश्च हंसौ चाल्पपुत्रौ स्वसृदुहितृभ्यां भ्राता च स्वसा च भ्रातरौ पुत्रश्च दुहिता च पुत्रौ
नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा
एकवत्स्यात् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला पटी शुक्लं वस्त्रं तदिदं शु
क्लं तानीमानि शुक्लानि पिता मात्रा मात्रा सहोक्तौ पिता वा शिष्यते माता च पिता च

पितरौ मातापितरौ श्वशुरः श्वश्र्वा सहोक्तौ वा शिष्यते श्वशुरौ श्वश्रुश्वशुरौ त्यदादीनि
सर्वैर्नित्यं सर्वैः सहोक्तौ त्यदादीनि शिष्यंते स च देवदत्तश्च तौ तात्यदादीनां मिथः
सहोक्तौ यत्परं तच्छिष्यते स च यश्च यौ पूर्वशेषोपि दृश्यत इति भाष्यं स च यश्च तौ
त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि सा च देवदत्तश्च तौ तच्च देवदत्ता च य
त्तदत्ता च तानि ग्राम्यपशुसंघेष्वतरुणेषु स्त्री एषु सह विवक्षायां स्त्री शिष्यते गाव
इमाः ग्राम्येति किं रुरव इमे पशुग्रहणं किं ब्राह्मणाः संघेषु किं एतौ गावौ अतरु
णेषु किं वत्सा इमे अनेकशफेष्विति वाच्यं अश्वा इमे इत्येकशेषः ऋक्पूरब्धूः
पथामानक्षे अ गाधंतस्य समासस्य अप्रत्ययो नाव पथो ऽक्षे पा धूस्तदंतस्य न
अर्द्धर्चः अनृच बह्वृचावध्येतर्यैव नेह अनृचं साम बह्वृचं सूक्तं विष्णुपुरं विम
लापसरः ध्यंतरुपसर्गेभ्योऽपईत् द्वीपं अंतरीपं प्रतीपं अवर्णांता द्वापेपं प्रा
पं मदनोर्देशे अनूपोदेशः कश्मोदकपं डुसंख्यापूर्वायायूमेराजिष्यते कश्मश्रुमः

उदग्भूम पांडुभूमः कृष्णभूमः प्रासादः संख्यायानदीगोदावरीभ्यां च पंचनदं
सप्तगोदावरं अजितियोगविभागादन्यत्रापि पद्मनाभः अक्ष्णोऽदर्शनात् अ
चक्षुःपर्यायादक्ष्णोऽचुस्यत् गवामक्षीव गवाक्षः अचतुरविचतुरसुचतुरस्त्री
पुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिं
दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्ष
वृद्धोक्षोपशुनगोष्ठश्वाः अजंताः पंचविंशतिर्निपात्यंते सुप्याभ्यां चतुरोऽजिष्य
ते त्रिचतुराः चतुर्णां समीप उपचतुराः ब्रह्महस्तिभ्यां वर्चसः अच् ब्रह्मवर्च
सं हस्तिवर्चसं पल्यराजभ्यां च पल्यवर्चसं राजवर्चसं अवसमंधेभ्यस्तमसः
अवतमसं संतमसं अंधतमसं अन्ववतप्ताद्रहसः अनुरहसं अवरहसं
तप्तरहसं प्रतेरुरसः सप्तमीस्थात् उरसि प्रत्युरसं अनुगवमायामे एतन्नि
पात्यते दीर्घत्वे अनुगवं यानं यस्य चायामस्तीति समासः उपसर्गादध्वनः प्रगतो

ध्वानंप्राध्वोरथः नपूजनात् पूजनार्थात्परेभ्यः समासांतानस्युः सुराजा अतिरा
जा स्वतिभ्यामेव नेह परमराजः किमः क्षेपे कुत्सितोराजा किंराजा किंसखा
किंगौः नञस्तत्पुरुषात् अराजा तत्पुरुषात्किं अधुरंशकटं पथोविभाषा अ
पथं अपंथाः तत्पुरुषादित्येव अपथोदेशः इतिसमासान्ताः अलुगुत्तरपदे
इत्यधिकृत्य ओजःसहोंभस्तमस्तृतीयायाः ओजसाकृतमित्यादि अंजसउप
संख्यानं अंजसाकृतं आत्मनश्च तृतीयायाअलुक् पूरणइतिवक्तव्यं पूरण
प्रत्ययांतेउत्तरपदेइत्यर्थः आत्मनापंचमः वैयाकरणाख्यायांचतुर्थ्याः आत्म
नइत्येव आत्मनेपदं आत्मनेभाषा परस्यच परस्मैपदं परस्मैभाषा हलदं
तात्सप्तम्याः... तेतिङेरलुक् त्वचिसारः गवियुधिभ्यांस्थिरः सस्यषः गविष्ठिरः युधिष्ठिरः
आरण्येतिलकः संज्ञायामितिसमास हृद्द्युभ्यांच हृदिस्पृक् दिविस्पृक् मध्या
द्गुरौ मध्येगुरुः अंताच्च अंतेगुरुः अमूर्द्धमस्तकात्स्वांगादकामे कंठेकालः उ

रसिलोमा अमूर्द्धमस्तकात्किं मूर्द्धशिखः मस्तकशिखः अकामेर्किं सुखंकामः
तसुरुषेत्क्तिवहुलंसंवेरमः कर्णेजपः शयवासवासिष्वकालात् खेशयः खेशयः
ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी षष्ठ्या आक्रोशे चौरस्याकुलं आ
क्रोशे किं ब्राह्मणकुलं वाग्दिक्पश्यद्भ्योयुक्तिदंडहरेषु वाचोयुक्तिः दिशोदंडः प
श्यतोहरः आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेतिच देवानांप्रियइतिचमूर्खे
अन्यत्रदेवप्रियः शेपपुच्छलांगूलेषुशुनः शुनःशेपः शुनःपुच्छः शुनोलांगूलः
दिवश्चदासे दिवोदासः ऋतोविद्यायोनिसंबंधेभ्यः होतुरंतेवासी पितुरंतेवासी
विभाषास्वसृपत्योः अदंतात्षष्ठ्याः मातुःपितुर्भ्यामन्यतरस्यां आभ्यांस्वसुःस
षोवास्यात्समासे मातुःष्वसा मातुःस्वसा पितुष्वसा पितुःस्वसा लुक्पक्षेतुमा
तृपितृभ्यांस्वसा आभ्यांपरस्यस्वसुःसस्यषःसमासे मातृष्वसा पितृष्वसा अस
मासेतु मातुःस्वसा पितुःस्वसा इत्यलुक्समासः घरूपकल्पचेलड्ब्रुवगोत्रमत

म०कौ०
१३६
136

हन्तेषु अश्वोनेकाचोह्रस्वः भाषितपुंस्काद्घोऽङीतदंतस्यानेकाचो ह्रस्वः घरूपकल्पप्रत्यये
षु घेरेषु चेलड्यादिषु चोत्तरपदेषु ब्राह्मणितरा ब्राह्मणितमा इत्यादि नद्याः शेषस्यान्य
तरस्यां अङंतनद्याः अनेकाचश्च घादिषु ह्रस्वो वा ब्रह्मबंधूतरा ब्रह्मबंधुतरा स्त्रीत
रा स्त्रितरा कृन्नद्यान लक्ष्मीतरा उगितश्च विदुषितरा ह्रस्वाभावपक्षे पुंवत्
विद्वत्तरा पादस्य पदाज्यातिगोपहतेषु पादाभ्यामजतीति पदाजिः पादातिः अजय
तिभ्यां पादे च इति इण प्रत्ययः पदगः पादोपहतः पद्धत्यतदर्थे पादस्य पद् अतदर्थो
यति पादौ विध्यन्ति पद्याः शर्कराः विध्यत्यधनुषेयत् अतदर्थे किं पादार्थमुदकं
पाद्यं पादार्घाभ्यां चेति यत् उदकस्योदः संज्ञायां उदमेघः उत्तरपदस्य चेति वक्त
व्यं क्षीरोदः पेषंवासवाहनधिषु च उदपेषं पिनष्टि उदवासः उदवाहनः उदधि
र्घटः एकहलादौ पूरयितव्येन्यतरस्यां उदकुंभः उदककुंभः एक इति किं उदकस्था
ली पूरयितव्य इति किं उदकपर्वतः मंथौदनसक्तुविंदुवज्रभारहारवीवधगाहेषु च

राम
१३६

उदमंथः उदकमंथः इको ह्रस्वोऽङ्यो गालवस्य इगंतस्याङ्यंतस्य ह्रस्वो वा उत्तरपदे ग्रा
मणीपुत्र॥ ग्रामणिपुत्रः इकः किं रमापति अङ्यः किं गौरीपतिः ष्यङः संप्रसारणं पु
त्रपत्योस्तत्पुरुषे ष्यङंतस्य पूर्वपदस्य संप्रसारणं पुत्रपत्योः परतः संप्रसारणस्य दी
र्घः स्यादुत्तरपदे कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः कौमुदगंधीपतिः इष्टकेषी
कामालानां चिततूलभारिषु इष्टकादीनां तदंतानां च चितादिषु ह्रस्वः स्यात् इष्टक
चितं पक्केष्टकचितं इषीकतूलं मुंजेषीकतूलं मालाभारी उत्पलमालभारी
ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु समानस्य सः
सज्योतिः इत्यादि तीर्थे ये यादौ प्रत्यये विवक्षिते समानस्य सः सतीर्थ्यः एकगुरु
कः समानतीर्थे वासीति यत्प्रत्ययः विभाषोदरे सोदर्यः समानोदर्यः दृग्दृशव
तुषु सदृक् सदृशः दृक्षे च सदृक्षः इदंकिमोरीश्की दृग्दृशवतुषु ईदृक् ईदृशः
कीदृशः दृक्षे च ईदृक्षः अथ षष्ठ्यंततीयास्थस्यान्यस्य दुगाशीराशास्था स्थितोत्सुका

म॰कौ॰
१३६
137

तिकारकराणङ्गेषु अन्यदाशीः अन्यदाशा अन्यदास्था अन्यदास्थितः अन्यदुत्सुकः
अन्यदूतिः अन्यद्रागः असष्ठीत्यादिकिं अन्यस्यान्येनवाशीः अन्याशीः कारकेद्वे
चनार्यनिषेधः अन्यस्यकारकोन्यत्कारकः अन्यस्यायमन्यदीयः अर्थेविभाषा अ
न्यदर्थः अन्यार्थः कोः कत्तत्पुरुषेचि अजादौउत्तरपदे कुत्सितोश्वः कदश्वः कदन्नं
तत्पुरुषेकिं कूष्ट्रोराजा त्रौच कत्रयः रथवदयोश्च कद्रथः कद्वदः तृणेचजातौ कत्तृ
णं कापथ्यक्षयोः कापथं काक्षः ईषदर्थे काजलं विभाषापुरुषे कुपुरुषः कापु
रुषः कवंचोष्णे चात्का कोष्णं कवोष्णं कदुष्णं पृषोदरादीनियथोपदिष्टं पृषदुद
रं पृषोदरं तलोपः वरिवाहकोवलाहकः पूर्वपदस्यवः उत्तरपदादेशश्चलत्वं भवे
द्वर्णागमाद्धंसः सिंहोवर्णविपर्ययात् गूढोत्मावर्णविकृतेर्वर्णनाशात्पृषोदरंमतो
वह्वचोनजिरादीनां दीर्घःस्यात् अमरावती अनजिरादीनांकिं अजिरवती संज्ञा
यामित्येव नेह वलयवती शरादीनांच शरावती उपसर्गस्यघञ्यमनुष्येवहुलं

१३७

परिपाकः परीपाकः अमनुष्येऽकिं निषादः नरेसंज्ञायांविश्वानर मित्रेचर्षौ विश्वामित्रः मुनी
दंतदंष्ट्राकर्णकुंदवनाहपुच्छपदेषु श्वादंतः प्रनिरंतःशरेक्षुप्लक्षाम्नकार्ष्यखदिरपीयूक्षाभ्यो
संज्ञायामपि एभ्योवनस्यणत्वं प्रवणं विभाषौषधिवनस्पतिभ्यः दूर्वावणं दूर्वावनं शि
रीषवणं शरीषवनं द्यचूत्र्यज्भ्यामेव नेह देवदारुवनं इरिकादिभ्योन इरिकावनं मि
रिकावनं वाहनमाहितात् आहितोय्ययदुह्यतेतद्वाचिषष्ठ्यान्निमित्ताद्वाहनस्यणः इक्षु
वाहन पानंदेशे पूर्वपदस्थान्निमित्तात्पानस्यणः क्षीरंपानंयेषांतेक्षीरपाणाः उशी
नराः सुरापाणाःप्राच्याः वाभावकरणयोः क्षीरपनं क्षीरपाणं प्रातिपदिकांतनु
म्विभक्तिषुच पूर्वपदस्थान्निमित्तात्परस्यएषुस्थितस्यनस्यणोवा माषवापिणौ
व्रीहिवापाणि माषवापेण पक्षेमाषवापिनावित्यादि कुमतिच कवर्गवत्युत्तरपदेप्रा
ग्वत् हरिकामिणौ हरिकामाणि हरिकामेण पदव्यवायेपि णत्वंन माषकुंभवा
पेन अतद्धितइतिवाच्यं आर्द्रगोमयेण शुष्कगोमयेण पारस्करप्रभृतीनिचसंज्ञा

म॰कौ॰
१३८
138

यां एतानि ससुट्कानि निपात्यन्ते पारस्करः किष्किंधा तद्बृहतोः करपत्योश्चोरदेवतयोः सु
ट्तलोपश्च तात्पूर्वं च तलेन दकारो पि विधेयः तद्बृहतोर्दकारतकारौ लुप्येते करपत्यो सुट्सुघु
ट्चोरदेवतयोरिति समुदायोपाधिः तस्करः बृहस्पतिः प्रायस्य चित्तिचित्तयोः
प्रायश्चित्तिः प्रायश्चित्तिः प्रायश्चित्तं वनस्पतिरित्यादि आकृतिगणोयं इ
ति समासाश्रया विधयः समर्थानां प्रथमाद्वा इदमधिक्रियते प्राग्दिशाइति या
वत् प्राग्दीव्यतोण् तेन दीव्यतीत्यतः प्रागणधिक्रियते अश्वपत्यादिभ्यश्च एभ्यो
रस्यात् प्राग्दीव्यतीयेष्वर्थेषु अश्वपतेरपत्यादि आश्वपतं गणपतं दित्यदित्या
दित्यपत्युत्तरपदाण्यः प्राग्दीव्यतीयेष्वर्थेषु दितेरपत्यादि दैत्यः अदितेरादित्यस्य
वा आदित्यः यणोमयोद्धे वा चो मयदुत्तिपंचमीयणइति षष्ठीति पक्षे यस्य द्वित्वं ह
लो यमां यमि लोपः वा स्यात् इति यस्य लोपे द्वित्वे च सति त्रियरूपं असति लोपो द्वि
त्वलोपयोर्वा द्वियं द्वित्वाभावे लोपे च सति एकयं प्राजापत्यः देवाद्यञञौ दैव्यं
दैवं बहिषष्टिलोपो यञ् च बाह्यः ईकक्च किति च तद्धितेऽचामादेरचो वृद्धिः

एम
१३८

वाहीकः गोरजादिप्रसंगे पत् गोरपत्यादिर्गव्यं उत्सादिभ्योञ् औत्सः इत्यपत्यादि
विकारांतार्थसाधारणाः प्रत्ययाः स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् धान्यानां भ
वनइत्यनः प्रागर्थेषु आभ्यामेतौ स्तः स्त्रैणः पौंस्नः तस्यापत्यं षष्ठ्यंतात्कृतसंधेः
समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः ओर्गुणः उवर्णांतस्य भस्यां
गस्य गुणः स्यात्तद्धिते ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयि
तुं तेन स्वायंभुवमित्यादि सिद्धं उपगोरपत्यमौपगवः आश्वपतः दैत्यः आदित्यः
औत्सः स्त्रैणः पौंस्नः अपत्यं पौत्रप्रभृति गोत्रं अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसं
ज्ञं स्यात् एको गोत्रे गोत्र एक एव प्रत्ययः स्यात् उपगोर्गोत्रापत्यं औपगवः गर्गादि
भ्यो यञ् गोत्रापत्ये गर्गस्य गोत्रापत्यं गार्ग्यः वात्स्यः यञञोश्च गोत्रे यञञंतमत्रं तं
तनदवयवयोरेतयोर्लुक् तत्कृते बहुत्वे न तु स्त्रियां गर्गाः वत्साः गोत्रेऽलुगचि अजा
दौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्यालुक् गर्गाणां छात्राः वक्ष्यमाणो वृद्धाच्छः

आपत्यस्य च तद्धितेनाति हलः परस्यापत्ययस्य लोपस्तद्धिते न त्वाकारे गार्गीयाः प्राग्दी
व्यतः किं गर्गीभ्यो हितं गर्गीयं आदिति किं गर्गेभ्य आगतं गर्गरूप्यं जीवति तु वंश्ये युवा
वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् गोत्राद्यून्यस्त्रियां
यून्यपत्ये विवक्षिते गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा यञिञोश्च
गोत्रे यौ यञिञौ तदन्तात् फक् आयनेयीनीयियः फढखछघां प्रत्ययादीनां प्रत्यया
देः फस्य आयन् ढस्य एय् खस्य ईन् छस्य ईय् घस्य इय् एते स्युः गर्गस्य युवापत्यं गार्ग्यायणः
अत इञ् अपत्येर्थे स्यात् बाह्वादिभ्यश्च बाहविः औडुलोमिः औडुलोमी लोम्नो
पत्येषु बहुष्वकारो वक्तव्यः बाह्वादीञोपवादः उडुलोमाः आकृतिगणोयं अनृष्या
नंतर्ये विदादिभ्योञ् ये त्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे विदस्य गोत्रं वैदः वैदौ
विदाः पौत्रः पौत्रौ यञिञोश्चेति सूत्रे प्रवराध्यायप्रसिद्धं गोत्रं तेनेह न पौत्रः शि
वादिभ्योण् अत्ये शैवः गांगः ऋष्यंधकवृष्णिकुरुभ्यश्च वासिष्ठः वैश्वामित्रः

अंधकेभ्यः श्वाफल्कः वृष्णिभ्यः वासुदेवः कुरुभ्यः नाकुलः साहदेवः मातुरुत्सं
ख्यासंभद्रपूर्वायाः संख्यादिपूर्वस्यमातृशब्दस्यउदादेशः अण्प्रत्ययश्च द्वैमातुरः
सांमातुरः भाद्रमातुरः स्त्रीभ्योढक् स्त्रीप्रत्ययांतेभ्योढक् वैनतेयः कन्यायाःकनी
नच चादण् कानीनोव्यासः कर्णश्च राजश्वशुराद्यत् राज्ञोजातावेव यचाभावकर्म
णोः यादौतद्धितेअन्स्यप्रकृत्यास्यान्नतुभावकर्मणोः राजन्यः जातावेवेतिकिं अन्
प्रकृत्याऽणिपरे राजनः श्वशुर्यः क्षत्राद्घः क्षत्रियः जातावेव क्षात्रिरन्यः रेवत्यादि
भ्यष्ठक् ठस्येकः अंगात्परस्यठस्यइकादेशः रैवतिकः गोत्रेकुंजादिभ्यश्च्फञ् व्रा
तच्फञोरस्त्रियां व्रातवाचिभ्यश्च्फञंतेभ्यश्चस्वार्थेञ्यप्रत्ययः कौंजायन्यः बहुत्वेलुक्
वक्ष्यते व्राध्नायन्यः नडादिभ्यःफक् गोत्रइत्येव नाडायनः चारायणः अनंतरोना
डिः अश्वादिभ्यःफञ् गोत्रेआश्वायनः इतश्चानिञः इकारांताद्व्यचोपत्येढक्नत्विञं
तात् दौलेयः नैधेयः आत्रेयः आत्रेयो अत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च
एभ्योगोत्रप्रत्ययस्यतत्कृतबहुत्वेलुक्नतुस्त्रियां अत्रयः भृगवः कुत्साः वसिष्ठाः

आंगिरसः शुभ्रादिभ्यश्च ढगपत्ये गौभ्रेयः कल्याण्यादीनामिनङ् स्यात् ढक् च काल्या
णिनेयः बांधकिनेयः कुलटाया वा इनङ्मात्रं विकल्प्यते ढक् तु नित्यः पूर्वेणैव कौ
लटिनेयः कौलटेयः सतीभिक्षुक्यत्र कुलटा चटकाया ऐरक् चटकादिति वाच्यं प्रा
तिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति सिद्ध्यति चटकस्य चटकाया वाऽप
त्यं चाटकैरः स्त्रियामपत्ये लुक् वक्तव्यः तयोरेवापत्यं चटका गोधाया ढ्रक् गौ
धेरः शुभ्रादित्वाड्ढक् गौधेयः क्षुद्राभ्यो वा अंगहीनाः शीलहीनाश्च क्षुद्रास्ताभ्यो
वा ढ्रक् पक्षे ढक् काणेरः काणेयः दासेरः दासेयः पितृष्वसुश्छण् अणोऽपवा
दः पैतृष्वस्रीयः ढकि लोपः पितृष्वसुर्लोपो ढकि अत एव ज्ञापकात् ढक् पैतृष्वसेयः
मातृष्वसुश्च पितृष्वसुर्यदुक्तं तदस्यापि स्यात् मातृष्वस्रीयः मातृष्वसेयः कुलात्खः
कुलीनः तदंतादपि उत्तरसूत्रे अपूर्वपदादिति लिंगात् आढ्यकुलीनः अपूर्वपदा
दन्यतरस्यां यड्ढकञौ कुलादित्येव पक्षे खः कुल्यः कौलेयकः कुलीनः महाकुला

दञ्खञौ वास्तः पक्षेखः माहाकुलः माहाकुलीनः महाकुलीनः दुष्कुलाड्ढक् वा पक्षे
खः दौष्कुलेयः दुष्कुलीनः स्वसुश्छः स्वस्रीयः भ्रातुर्व्यच्च चाच्छः भ्रातृव्यः भ्रात्रीयः
मनोर्जातावञ्यतौ षुक् च समुदायार्थेजातिः मानुषः मनुष्यः नक्षणेणणउपसंख्यानं
षपूर्वहन्धृतराज्ञामणि एयामणितद्धितेअनोकारस्य लोपः नाक्षणः तिकादिभ्यः
फिञ् तैकायनिः वृद्धिर्यस्याचामादिस्तद्वृद्धं यस्य समुदायस्याचांमध्येआदिर्वृद्धिस्तद्वृद्ध
संज्ञंस्यात् उदीचां वृद्धादगोत्रात् फिञ् आम्रगुप्तायनिः प्राचां तु आम्रगुप्तिः प्राचामव
द्धात्फिन्बहुलं ग्लुचुकायनिः जनपदशब्दात्क्षत्रियादञ् जनपदक्षत्रिययोर्वाचिकादञ्
यत्ये क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् पंचालानांराजापांचालः पूरो
रण् पौरवः पांडोर्ड्यण् पांड्यः वृद्धेत्कोसलाजादाञ्ञ्यङ् वृद्धात् आंबष्ठ्यः इत् आवंत्यः
कौसल्यः अजादस्यापत्यआजाद्यः कुरुनादिभ्योण्यः कौरव्यः नैषध्यः तेतद्राजाः
अजादयस्तद्राजसंज्ञाःस्युः तद्राजस्यबहुषुतेनैवास्त्रियां बहुष्वर्थेषुतद्राजस्यलुक्त

म॰कौ॰
२४१

त्वात्तेवद्बहुत्वेनलुक्स्त्रियां पंचालाः कंबोजाल्लुक् तद्राजस्य कंबोजः कंबोजौ कंबोजादिभ्य
इतिवक्तव्यं चोलः शकः केरलः यवनः अणिः अणिजोरनार्षयोर्गुरूपोत्तमयोःष्यङ्
गोत्रे आदीनामंत्यमुत्तमं तस्यसमीपमुपोत्तमगोत्रेयावणिञोविहितावनार्षौतद
तयोर्गुरूपोत्तमयोः प्रातिपदिकयोःस्त्रियांष्यङादेशः पङश्चाप् कौमुदगंधस्यगोत्रा
पत्यंस्त्रीकौमुदगंध्यावाराह्य अनार्षयोःकिं वासिष्ठी गुरूपोत्तमयोःकिं औपगवी
गोत्रेकिं अहिच्छत्रेजाता आहिच्छत्री इत्यपत्याधिकारः तेनरक्तंरागात् कषायेनर
क्तंवस्त्रंकाषायं मांजिष्ठं रागात्किं देवदत्तेनरक्तंवस्त्रं लाक्षारोचनाट्ठक् लाक्षि
कः रौचनिकः शकलकर्दमाभ्यामुपसंख्यानं शाकलिकः कार्दमिकः नील्याअन
नील्यारक्तंनीलं पीतात्कन् पीतकं हरिद्रामहारजनाभ्यामञ् हारिद्रं माहारज
नं नक्षत्रेणयुक्तःकालः तिष्यपुष्ययोर्नक्षत्राणियलोपः पुष्येणयुक्तंपौषमहः
लुबविशेषो पूर्वेणविहितस्यलुप्स्यात्षष्टिदंडात्मकस्यकालस्यावांतरभेदश्चेन्नगम्येत

एम
२४१

अघपुष्पः दृष्टं साम तेनेत्येवावासिष्ठेन दृष्टं वासिष्ठं साम वामदेवाड्ड्यड्ड्यौ वामदे
वेन दृष्टं वामदेव्यं परिवृतो रथः वस्त्रेण परिवृतो वास्त्रो रथः तत्रोद्धृतममत्रेभ्यः शरावे
उद्धृतः शाराव ओदनः संस्कृतं भक्षाः सप्तम्यंतादणस्यात्संस्कृतेर्थे यत्संस्कृतं भक्षा
श्चेत्तेस्युः भ्राष्ट्रेषु संस्कृताः भ्राष्ट्रा भक्षाः शूलोखाद्यत् अणोपवादः शूलेन संस्कृ
तं शूल्यं मांसं उख्यं दध्नष्ठक् दधिसंस्कृतं दाधिकं सास्मिन्पौर्णमासीति इति शब्दा
त्संज्ञायामिति लभ्यते पौषी पौर्णमास्यस्मिन् पौषो मासः सास्य देवता इंद्रो देवता
अस्येदं हविः पाशुपतं बार्हस्पत्यं सेज्यमानद्रव्ये उद्देश्यविशेषो देवता मंत्रस्तुत्या च
ऐंद्रो मंत्रः कस्येत् कशब्दस्य इकार प्रत्ययसंनियोगेनायस्येति लोपात्परत्वादादिवृ
द्धिः को ब्रह्मा देवताऽस्य कायं हविः श्रीर्देवतास्य श्रायं शुक्राद्घन् शुक्रियं सोमात्यण्
ण् सौम्यं वाय्वृतुपित्रुषसो यत् वायव्यं ऋतव्यं रीङ्ऋतः अकृद्यकारेऽसार्वधातुकयका
रे ङ्वोश्च ऋदंतांगस्य रीङादेशः यस्येति च पित्र्यं उषस्यं द्यावापृथिवीशुनासीरमरुत्वद
ग्नीषोमवास्तोष्पतिगृहमेधाच्छ च च यत् द्यावापृथिवीयं द्यावापृथिव्यं शुनासीरी

म० कौ०
१४२

यं पुनारीयं महाराजप्रोष्ठपदाट्ठञ् माहाराजिकं प्रौष्ठपदिकं देवताद्वन्द्वे चात्र पूर्वोत्तरपदयोराद्यचोर्वृद्धिर्ञिति णिति किति च आग्निमारुतं नेन्द्रस्य परस्य सौमेन्द्रः परस्य किं ऐन्द्राग्नः दीर्घाच्च वरुणस्य चाऐन्द्रावरुणः दीर्घात्किं आग्निवारुणी मनड्वाही पितृव्यमातुलमातामहपितामहाः एतेनिपात्यन्ते पितुर्भ्राता पितृव्यः मातुर्भ्राता मातुलः मातुः पिता मातामहः पितुः पिता पितामहः तस्य समूहः काकानां समूहः काकं वकानां समूहो बाकं भिक्षादिभ्योऽण् भैक्षं गार्भिणीनां समूहो गार्भिणं इहमस्याक्षेइति पुंवद्भावे कृते इनण्यनपत्ये अनपत्योर्थेऽणि इन् प्रकृत्या तेन नस्तद्धितइति टिलोपो ना युवतीनां समूहो यौवतं गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ग्लुचुकायनीनां समूहो ग्लौचुकायनकं औक्षकमित्यादि आपत्यस्य चेति लोपमाप्ते प्रकृत्याऽके राजन्यमनुष्ययुवानः राजन्यकं मानुष्यकं वृद्धाच्चेति वक्तव्यं वार्द्धकं केदाराद्यञ्च चाद्वुञ् कैदार्यं कैदा

राम
१४२

रकं गणिकायायञ्वक्तव्यः गाणिक्यं ठञ्कवचिनश्च वार्त्तिकेदाराद्यपि कवचिनांसमू
हःकावचिकं कैदारिकं ग्रामजनबंधुभ्यस्तल् ग्रामता जनता बंधुता तलंतंस्त्रियां ग
जसहायाभ्यांचेतिवाच्यंगजता सहायता अह्नःख क्रतौ अहीनः अचित्तहस्तिधे
नोष्ठक् इसुसुक्तांतात्कः दूरउस्डउकृतएतदंतात्परस्यठस्यकः हास्तुकं हास्तिकं
धैनुकं केशाश्वाभ्यांयञ्छावन्यतरस्यां पक्षेठगणो कैश्यं कैशिकं अश्वीयं आश्वं
पाशादिभ्योयः पाश्या तृण्या धूम्या वन्या वात्या खलगोरथात् खल्या गव्या
रथ्या इनित्रकट्यचश्च खलादिभ्यःक्रमात्स्युः खलिनी गोत्रा रथकट्या खलादिभ्य
इनिर्वक्तव्यः डाकिनी कुटुंबिनी आकृतिगणोयं तदस्यांप्रहरणमितिक्रीडायांणः
दंडःप्रहरणमस्यांक्रीडायां दांडा मौष्टा घञःसास्यांक्रियेतिञः घञंताक्रियावाचि
न प्रथमांतादस्यामितिसप्तम्यर्थेस्त्रीलिंगेञप्रत्ययः श्येनतिलस्यपातेञे अनयोर्मुम्ञप्र
त्ययपरेपातशब्देउत्तरपदे श्यैनंपाताम्रगया तैलंपातास्वधा श्यैनंतिलस्यकिं दंडपा

तोस्यादावुपातातिष्ठिः तदधीतेतद्वेद नन य्वाभ्यांपदांताभ्यांपूर्वौतुताभ्यामैच् पदांताभ्यां
यवाभ्यांपरस्यनवृद्धिः किंतुपूर्वौताभ्यांक्रमादैजावागमौस्तः व्याकरणमधीतेवेत्तिवावैया
करणः क्रमादिभ्योवुन् क्रमकः पदकः शिक्षकः मीमांसकः क्रतूक्थादिसूत्रांताट्ठक् क्र
तुविशेषवाचिनामेवेहग्रहणं तेभ्योमुख्यार्थेभ्योवेदितरि तत्प्रतिपादकग्रंथेभ्यस्त्वध्येत
रि आग्निष्टोमिकः वाजपेयिकः उक्थंसामविशेषस्तल्लक्षणोग्रंथोलक्षणयाउक्थं
तदधीतेवेदवाऔक्थिकः मुख्यार्थान्नुठगणोनेष्यते नैयायिकः वार्त्तिकः लौकाय
तिकः सूत्रांतात्तु अकल्पादेरेवेष्यतेसांग्रहसूत्रिकः अकल्पादेःकिं काल्पसूत्रः वि
द्यालक्षणकल्पांताच्चेतिवक्तव्यं वायसविद्यिकः गौलक्षणिकः पाराशरकल्पिकः
अंगक्षत्रधर्मत्रिपूर्वाद्विद्यांतान्नेतिवक्तव्यं आंगविद्यः क्षात्रविद्यः धार्मविद्यः
त्रिविद्यास्त्रिविद्यानामधीतेवेत्तिवात्रैविद्यः तदस्मिन्नस्तीतिदेशेतन्नाम्नि उदुं
बराःसंत्यस्मिन्देशेऔदुंबरोदेशः तेननिर्वृत्तं कुशांबेननिर्वृत्ताकौशांबीनगरी तस्य
निवासः शिबीनांनिवासोदेशःशैबः अदूरभवश्च विदिशाया अदूरभवंनगरंवैदिशं

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाश
तृणंप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः सप्तदशा
भ्यः सप्तदशाक्रमात्सुश्चानुरथ्याँ अरीहणादिभ्योवुञ् अरीहणेनानिर्वृत्तमारीहणकं
कृशाश्वादिभ्यश्छण् कार्शाश्वीयः ऋश्यादिभ्यःकः ऋश्यकं कुमुदादिभ्यष्ठच् कुमुदिकं
काशादिभ्यइलः काशिलः तृणादिभ्यःसः तृणसंप्रेक्षादिभ्यइनिः प्रेक्षी अश्मादिभ्यो
रः अश्मवण सख्यादिभ्योढञ् साखेयं संकाशादिभ्योण्यः सांकाश्यं बलादिभ्योयः
बल्यं पक्षादिभ्यःफक् पाक्षायणः पथः पंथच पंथायन कर्णादिभ्यःफिञ् कार्णायनिः
सुतंगमादिभ्यइञ् सौतंगमिः प्रगदिनादिभ्योञ्यः प्रगदिन् प्रागद्यः वराहादि
भ्यःकक् वाराहकः कुमुदादिभ्यष्ठक् कौमुदिकः जनपदेलुप् जनपदेवाच्येचातु
रर्थिकस्यलुप् लुपियुक्तवद्व्यक्तिवचने लुपिसतिप्रकृतिवल्लिंगवचनेस्तः पंचाला
नांनिवासोजनपदः पंचालाः कुरवः अंगाः वरणादिभ्यश्च अजनपदार्थआरंभः

154

वरणानामदूरभवं नगरं वरणाः शर्कराया वा अस्माच्चातुरर्थिकस्य लुप् छण् ठक्छौ च श
र्कराया एतौ स्तः कुमुदादौ वराहादौ च पाठसामर्थ्यात्पक्षे ठच्ठकौ वाग्रहणसामर्थ्या
त्पक्षे औत्सर्गिकोऽण् तस्य लुब्विकल्पः षड्रूपाणि शर्करा शार्करं शार्करिकं शर्करी
यं शार्करिकं शार्करकं नद्यां मतुप् चातुरर्थिकः इक्षुमती कुमुदनडवेतसेभ्यो ड्म
तुप् ड्मतुपः मतोर्मस्य वः कुमुद्वान् नड्वान् मादुपधायाश्च मतोर्वोऽयवादिभ्यः म
वर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः वेतस्वान् न
डशादाड्ड्वलच् नड्वलः शाड्वलः शिखाया वलच् शिखावलं नगरं उत्करादिभ्य
श्छः उत्करीयः नडादीयः नडादीनां कुक् च नडकीयं क्रुञ्चा ह्रस्वत्वं च क्रुञ्चकीय त
क्षन्नलोपश्च तक्षकीयः इति चातुरर्थिकाः शेषे अपत्यादिचतुरर्थ्यन्तादन्यो
र्थः शेषस्तत्राणादयः स्युः चक्षुषा गृह्यते चाक्षुषं रूपं श्रावणः शब्दः औपनिषदः
पुरुषः दृषदि पिष्टा दार्षदाः सक्तवः उलूखले क्षुण्ण औलूखलो यावकः अश्वैः

राम
१५७

ह्यतेआश्वोरथः चतुर्भिर्हूयतेचातुरंशकटं चतुर्दश्यांदृश्यतेचातुर्दशंरक्षः तस्याधि
कारइत्यतःप्राक्शैषाधिकारः राष्ट्रावारपाराद्घखौस्तः राष्ट्रंज्ञानादिः राष्ट्रियः
अवारपारीणः अवारपाराद्विगृहीतादपिविपरीताच्चेतिवक्तव्यं अवारीणः पा
रीणः इहप्रकृतिविशेषाद्घादयः घुंघुलंताड्यं तेनैषांज्ञानादयोऽर्थविशेषाः
समर्थविभक्तयश्चवक्ष्यंते ग्रामयखञौ ग्राम्यः ग्रामीणः नद्यादिभ्योढक् ना
देयं माहेयं वाराणसेयं दक्षिणापश्चात्पुरसस्त्यक् दाक्षिणात्यः पाश्चात्यः
पौरस्त्यः घुप्रागपागुदक्प्रतीचोयत् दिव्यं प्राच्यं उदीच्यं प्रतीच्यं अव्ययात्त्यप्
अमेहक्वतसित्रेभ्यएव अमात्यः इहत्यः क्वत्यः ततस्त्यः तत्रत्यः त्यब्नेर्ध्रुवे
नित्यः निसोगतेः ह्रस्वात्तादौतद्धिते ह्रस्वादिणःपरस्यसस्यषः तादौतद्धिते
निर्गतोवर्णाश्रमेभ्योनिष्ट्यश्चांडालादिः अरण्यान्णः आरण्याः सुमनसः
दे दूरादेत्यः दूरेत्यः उत्तरादाहञ् औत्तराहः ऐषमोह्यःश्वसोऽन्यतरस्यां एभ्यस्त्यब्वा
पक्षेवक्ष्यमाणोघुघुलौ ऐषमस्त्यं ऐषमस्तनं ह्यस्त्यं ह्यस्तनं श्वस्त्यं श्वस्तनं

145

पक्षेशोवास्तिकं वहते वृद्धाच्छः शालीयः मालादीनिचावृद्धसंज्ञानिस्युः तदीयः वाना
मधेयस्य वृद्धसंज्ञा देवदत्तीयः दैवदत्तः भवतष्ठक्छसौ वृद्धाद्भवतष्ठञ्छसौस्तः भावत्कः
सिनिच तद्धितेपूर्वेपदं जस्कं भवदीयः वृद्धादित्यनुवृत्तेः शात्रंतादणवे काश्यादिभ्य
ष्ठञ्ञिठौ उकारउच्चारणार्थः काशिकी काशिका आपदादिपूर्वपदात्कालान्ता
त् आपदादिराकृतिगण आपत्कालिकी आपत्कालिका धन्वयोपधाद्वुञ्
धन्वविशेषवाचिनोयकारोपधाच्चदेशवाचिनोवृद्धाद्वुञ् ऐरावतंधन्व ऐरा
वतकः सांकाश्यकाम्पिल्यशब्दौवुञ्लक्षणादिसूत्रेण्यांतौ सांकाश्यकः का
म्पिल्यकः नगरात्कुत्सनप्रावीण्ययोः कुत्सितेप्रवीणेचजातादौप्रकृत्यर्थे
नगरशब्दाद्वुञ् नागरकश्चोरःशिल्पीवा एतयोःकिं नागराब्राह्मणाः अर
ण्यान्मनुष्ये वुञ् पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यं आरण्य
कः पंथाः अध्यायोन्यायोविहारोहस्तीवा गर्त्तोत्तरपदाच्छः देशइत्येव वृक

एम
१८५

गर्त्तीयं गहादिभ्यश्च गहीयः युष्मदस्मदोरन्यतरस्यांखञ्च चाच्छः इत्येव स्यश्छे
डण् युवयोर्युष्माकंवाऽयंयुष्मदीयः अस्मदीयः तस्मिन्नणिचयुष्माकास्माकौ
युष्मदस्मदोरेतावादेशौ स्तः यौष्माकीणः यौष्माकः आस्माकीनः आस्माकः तव
कममकावेकवचने एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि
च तावकीनः तावकः मामकीनः मामकः छेतु प्रत्ययोत्तरपदयोश्च मपर्यन्त
योरेकार्थवाचिनोरनयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च त्वदीयः मदीयः त्वत्पुत्रः
मत्पुत्र मध्यान्मः मध्यमः अस्मांप्रतिके मध्यन्नादादकारप्रत्ययः साम्प्रतिके
र्थे उत्कर्षापकर्षहीनोमध्योवैयाकरणः मध्यंदारु नातिह्रस्वंनातिदीर्घं द्वी
पादनुसमुद्रंयञ् समुद्रसमीपेयोद्वीपस्तद्भवयाद्वीपशाब्दाघञ् द्वैप्यं द्वैप्या कालाट्
ठञ् मासिकं सांवत्सरिकं अव्ययानांभमात्रेटिलोपः पौनःपुनिकः कथंतर्हिश
र्वरस्यतमसोनिषिद्धयेइतिकालिदासः अनुदिनोषसएगोतिभारविः समानेका
लीनंप्राक्कालीनंइतिच अपभ्रंशाएवैतइतिप्रामाणिकाः तत्रजातइतियाव

१५६

कालाधिकारः श्राद्धे शरदः ठञ् ऋत्वणोपवादः शारदिकं श्राद्धं विभाषा रोगातपयोः
शारदिकः शारदो वा रोगः आतपो वा निशाप्रदोषाभ्यां च नैशिकं नैशं प्रादोषिकं
प्रादोषं श्वसस्तुट् च श्वसष्ठञ् वा तस्य तुट् चा शारदीनां च एषां न वृद्धिरैजागमश्च
शौवस्तिकं संधिवेलाद्यृतुनक्षत्रेभ्योऽण् संधिवेलायां भवं सांधिवेलं ग्रैष्मं नै
षं संधिवेला संध्या अमावास्या त्रयोदशी चतुर्दशी पंचदशी प्रतिपत् प्रावृ
ष एण्यः प्रावृषेण्यः वर्षाभ्यष्ठक् वर्षासु साधु वार्षिकं वासः सर्वत्राण् च त
लोपश्च हेमंतादण् तलोपश्च वा तस्य ऋत्वण् हैमनं हैमंतं सायंचिरंप्राह्णेप्रगे
ऽव्ययेभ्यष्ट्युट्युलौ तुट् च सायमित्यादिभ्यश्चतुर्भ्यः अव्ययेभ्यश्च कालवाचिभ्य
ष्ट्युट्युलौ स्तस्तयोस्तुट् च सायंतनं चिरंतनं प्राह्णप्रगयोरेदंतत्वं निपात्यते प्राह्णे
तनं प्रगेतनं दोषातनं दिवातनं चिरपरुत्परारिभ्यस्त्नो वक्तव्यः चिरत्नं परुत्नं
परारित्नं अग्रादिपश्चाड्डिमच् अग्रिमं पश्चिमं आदिमं अंताच्च अंतिमं
विभाषा पूर्वाह्णापराह्णाभ्यां आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च पक्षे ठञ् पूर्वाह्णे

राम
१५६

ततं अंपरएकतितनं पौर्वाह्णिकं आपराह्णिकं तत्रजातः सप्तमीसमर्थात्तत्रानद्वपर्थोत्र

णादयोघादयश्चस्युः स्रुघ्नेजातःस्रौघ्नः औत्सः राष्ट्रियः अवारपारीणः प्रावृष

इष्यएण्यस्यापवादः प्रावृषिकः प्रायभवः तत्रेत्येव स्रुघ्नेप्रायेणबाहुल्येनभवति

स्रौघ्नः संभूते स्रुघ्नेसंभवतिस्रौघ्नः कोशाड्ढञ् कौशेयं वस्त्रं तत्रभवः स्रुघ्नेभ

वःस्रौघ्नः औत्सः राष्ट्रियः दिगादिभ्योयत् दिश्यं वर्ग्यं शरीरावयवाच्च दंत्यं कं

ठ्यं दतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् दार्तेयं कलशिर्घटः तत्रभवंकालशेयं ग्रीवा

भ्योणच वाढञ् ग्रैवेयं ग्रैवं गंभीराञ्ञ्यः गंभीरेभवंगांभीर्यं अव्ययीभावाच्च

परिमुखंभवंपारिमुख्यं परिमुखादिभ्यएवेष्यते नेह औपकूलः अंतःपूर्वपदा

ट्ठञ् अव्ययीभावादित्येव वेश्मनि अं[illegible]स्मंतत्रभवमांतर्वेश्मिकं आंतर्गणिकं

अध्यात्मादेष्ठञिष्यते आध्यात्मिकं अनुशतिकादीनांच एषामुभयपदवृद्धि

र्जितिणितिकितिच आधिदैविकं आधिभौतिकं ऐहलौकिकं आकृतिगणो

यं जिह्वामूलांगुलेश्छः जिह्वामूलीयं अंगुलीयं वर्गांताच्च कवर्गीयं ततत्र

गतः स्रुघ्नादागतः स्रौघ्नः ठगायस्थानेभ्यः शुल्कशालाया आगतः शौल्कशालिकः
विद्यायोनिसंबंधेभ्यो वुञ् औपाध्यायकः पैतामहकः ऋतष्ठञ् वुञोपवादः
हौतृकं मातृकं भ्रातृकं पितुर्यच्च चात् ठञ् रीङृतः यस्येति लोपः पित्र्यं पैतृकं
गोत्रादंकवत् विदेभ्य आगतं वैदं गार्गं दाक्षं औपगवं हेतुमनुष्येभ्योऽन्यतर
स्यां रूप्यः समादागतं समरूप्यं पक्षे गहादित्वाच्छः समीयं देवदत्तीयं देवदत्त
रूप्यं मयट् च सममयं प्रभवति हिमवतः प्रभवति हैमवती गंगा विदूराञ्ञ्यः
विदूरात्प्रभवति वैदूर्यो मणिः तत्पमध्योयंशाद्वलवन्ननुनड्वलवन्मूर्द्धन्यमध्यः
नन्वयोसंगतिः वालवायाद्धि असौ प्रभवति विदूरे तु संस्क्रियते तस्य अत एव
समाहितं भाष्ये वालवायो विदूरं चेति वालवायशब्दः प्रत्यये प्रलभते विदूरादेशं
च सूत्रे पठितेनादेशेनानुरूप आदेश आक्षिप्यते तद्गच्छति पथिदूतयोः स्रुघ्नं
गच्छति स्रौघ्नः पंथाः दूतो वा अभिनिष्क्रामति द्वारं स्रुघ्नमभिगच्छति स्रौघ्नं कान्य
कुब्जद्वारं अधिकृत्य कृते ग्रंथे शारीरमधिकृत्य कृतो ग्रंथः शारीरकीयः शारीरकं

147

एम
१६०

माथ्यभितृभेदोपचाराएत् सोस्यनिवासः स्रुघ्नोनिवासोऽस्यस्रौघ्नः तेनप्रोक्तं पाणि
निनाप्रोक्तंपाणिनीयं पाराशर्यशिलालिभ्यांभिक्षुनटसूत्रयोः णिनिः स्यात्
पाराशर्येणप्रोक्तंभिक्षुसूत्रमधीयतेपाराशरिणः भिक्षवः शैलालिनोनटाः
कर्मन्दकृशाश्वादिनिः कर्मन्देनप्रोक्तंभिक्षुसूत्रमधीयतेकर्मन्दिनोभिक्षवः कृ
शाश्विनोनटाः उपज्ञाते पाणिनिनाउपज्ञातंपाणिनीयाजस्येदं उपगोरिदमौप
गवं समिधामाधानेषेण्यण् सामिधेन्योमंत्रः रथाद्यत् रथ्यंचक्रं पत्रपूर्वाद
ञ् आश्वरथस्येदमाश्वरथं हलसीराट्ठक् हालिकं सैरिकं गोत्रचरणाद्वुञ् औ
पगवकं चरणाद्धर्माम्नाययोरितिवक्तव्यं काठकं संघांकलक्षणेष्वञ्यञिञा
मण् घोषग्रहणमपिकर्त्तव्यं अञ् वैदः संघोंकोघोषोवा वैदंलक्षणं यञ् गा
र्ग्यः गार्गः इञ् दाक्षः दाक्षः पर्य्ययासंबंधोंकः साक्षात्तुलक्षणं द्रुतिशौभृकाः
तस्यविकारः अश्वग्मनोविकारेटिलोपोवक्तव्यः आश्मः भास्मनः पार्त्तिकः
अवयवेचप्राण्योषधिवृक्षेभ्यः चाद्विकारे मयूरस्यविकारोवयवोवामायू

148

रः मौर्वं कांडं भस्म वा पैप्पलं त्रपुजतुनोः षुक् आभ्यामण् एतयोः षुक् त्रापुषं
जातुषं ओरञ् दैवदारवं अनुदात्तादेश्च अञ् कापित्थं पलाशादिभ्यो वा अञ्
पालाशं खादिरं शम्याः ष्लञ् शामीलं मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः
प्रकृतिमात्रान्मयड्वा स्याद्वैकारिकावयवयोः अश्ममयं आश्मनं अभक्ष्येत्यादि
किं मौद्गः सूपः कार्पासमाच्छादनं नित्यं वृद्धशरादिभ्यः आम्रमयं शरमयं
